KṚDANTARŪPAMĀLĀ

A CONCORDANCE OF VERBAL DERIVATIVES

BY

PANDIT S. RAMASUBBA SASTRI

Samskrit Education Society Teaching Centre,
Pettai

VOLUME ONE

With a Preface by

DR. V. RAGHAVAN

&

General Preface by

DR. C. P. RAMASWAMI AIYAR

Published by

SRI T. V. VISWANATHA AIYAR, *Secretary*

The Samskrit Education Society, Madras

14, EAST MADA STREET, MYLAPORE, MADRAS-4

1965

कृदन्तरूपमाला

मद्रपुरी-संस्कृतविद्यासमितेः कलाशालायां प्रधानाध्यापकैः
पण्डितवर्यैः श्रीमद्भिः श. रामसुब्रह्मण्यशास्त्रिभिः
सन्दृब्धा

प्रथमो भागः

श्रीमतां डा० वे. राघवार्याणां
श्रीमतां डा० वे. प. रामस्वाम्यार्याणां च
आमुखाभ्यां सहिता

मद्रपुरीसंस्कृतविद्यासमितिसचिवैः
श्री. ति. वे. विश्वनाथार्यैः
(14, पूर्वमाडवीथी, मद्रास् 4.)
प्रकाशिता

१९६५

प्रथमावृत्तिः १९६५

Published with the aid of
Govt. of India, Ministry of Education.

मूल्यम्
सवभाग ... नमूल्यं ५० रु.

श्री भारती विजयम् प्रेस्, मद्रास्-५.

GENERAL PREFACE

The Samskrit Education Society is one of the latest efforts made by lovers of Sanskrit in Madras to check the erosion or elimination of Sanskrit which is imminent in the different sectors of its studies in this part of the country, notwithstanding that South India has been a stronghold of this language in the past amongst all those who prize intellectual stimulation and spiritual inspiration. The Society was started with the blessings of H.H. Sri Chandrasekharendra Sarasvati, Sankaracharya of Kanchi Kamakoti Peetha, on the occasion of the Golden Jubilee of his accession to the Peetha. I have had the pleasure and privilege of being connected with its management from the inception.

In spite of the difficulties of the present situation and the many causes demanding the help and patronage of the philanthropists, we may assert that during the short period of our existence, we have made fairly steady progress, although it is not spectacular. In Pettai, near Madras, we have a large area of land where our buildings are coming up and a Sanskrit advanced study centre is functioning. We have been concentrating in training young Pandits already qualified in one Sastra to become equipped in another Sastra. We have started a few research projects and publication schemes : a *Concordance of Verbal Derivatives*, a *New Model Sanskrit Grammar* and a *Dictionary of Indeclinables*. Another undertaking of ours is the book on *The Teaching of Sanskrit*. This and the *Concordance of Verbal Derivatives*, I am happy we are able to release to the public now.

The maintenance and promotion of Sanskrit study in the schools face two difficulties today, one stemming from the language formulae of the Government which is explicitly unfavourable to Sanskrit and secondly, the lack of improved methods of making its learning easy and popular. The Society may well congratulate itself in having addressed itself to the latter problem and brought out these books written by able and experienced scholars, Pt. S. Ramasubba Sastrigal and Prof. K. Rama Varma Raja. On behalf of the Society, I must also express my appreciation of the services rendered to the Society by Dr. V. Raghavan who has been in general charge of these and other research projects and publications of the Society. What he and others have been

doing in this part of the country, in the midst of all sorts of difficulties, must evoke the admiration of Sanskritists all ever the country.

These and other research projects and the teaching work of the Society have been receiving assistance from the Central Sanskrit Board which deserves all praise for its efforts to rehabilitate in the country Sanskrit, the bedrock of Indian culture.

I wish all success to Sri T. V. Viswaṇatha Aiyar, Secretary of the Society, who has been building up the resources of the Society and managing its affairs so well. I am quite sure that the Samskrit Education Society will ere long emerge as an active advanced Centre of a University type for Sanskrit in the South.

C. P. RAMASWAMI AIYAR
President, The Samskrit Education Society, Madras.

PREFACE

In addition to evolving sound methods of teaching the language and works composed in it, ancient Sanskrit writers prepared also several ready-made tools to assist them in their pedagogic mission. The compilation of indexes and concordances is no new line of work fashioned by modern scholarship. These ready-made instruments of scholarship are as old as the post-Vedic literature, when different kinds of *Anukramaṇīs*, lists of words of different kinds of morphological kingship, etc., arose. In grammar itself, separate hand-books for alerting students on gender and other slippery matters were prepared. The difference is that all these old tools, including the dictionaries, were made in metrical form. Special sets of verses were composed to collect together words or roots which underwent identical modifications or took the same grammatical formative characteristics to enable easy memorisation by students, e.g. the verses listing roots which took two objects (*dvi-karmaka*) and the verses enumerating roots which do not take the augment 'i' 'इ' (*Aniṭkārikās*). Difficult forms like the frequentative *Yaṅluganta* were also dealt with in special monographs by writers like S'eṣa Kṛṣṇa.

In modern times, the study of Sanskrit has called for the preparation of not only grammars arranged in a new way but also all kinds of 'made-easy' compilations for ready reference and getting at a glance all possible forms. The roots, *Dhātus*, the variety of conjugations, *Guṇa* and *Vṛddhi*, formative augments and the rules and exceptions in their incidence, these constitute a major scare, if we may say so, to students of Sanskrit. One of the tasks on which many modern teachers and authors of popular grammars and handbooks of Sanskrit had always engaged themselves is the compilation of dictionaries of conjugational forms. These varied in completeness and size but the publication of the stupendous *Dhāturatnākara* by the Jain Sadhu Lavanyavijaya in seven volumes, which superseded all lesser compilations, forms not only a monumental achievement in the field, but also one of the greatest boons to teachers and students alike of Sanskrit.

The difficulty of the *Dhātus* does not end with their conjugation. The primary derivatives from radical bases, the *Kṛt*-forms,-including participles, infinitives, gerunds and reduplicatives, are not easily comprehended and mastered. Even those

constantly in touch with the language and its grammar get confounded in respect of many of these forms: '*num*' coming or not coming in a present participle; the form of the past passive participle in the case of a particular root and the '*seṭ*' and '*aniṭ*' regulations in this respect*; the exact form of a desiderative or one kind or another of a reduplicative form of a root, all such doubts occur constantly, apart from the main doubts regarding the conjugation and the Ātmanepada or Parasmaipada character of a root. In the case of some of the out of the way roots and out of the way derivative forms, even Vyākaraṇa Pandits have doubts and differences of opinion. A carefully compiled concordance of all primary derivatives of all roots, original and derived, which would be an indispensable book of reference, had been in the mind of the undersigned for a long time and he is gratified that the scheme took proper shape and the work could be taken up by the Samskrit Education Society, Madras.

Pandit S. Ramasubba Sastrigal who was entrusted with the work of preparing this *Kṛdanta*-Concordance is the foremost Vaiyākaraṇa of South India. After studying Vyākaraṇa under the late Mahāmahopādhyāya Dandapanisvami Dikshitar of Chidambaram, Sri Ramasubba Sastrigal taught at the Annamalai University, at the Ramesvaram Devasthanam Sanskrit College, Madurai, of which he was also Principal for some time, and later at the R.M.S. Vidyasala, Chidambaram. An honoured member of the galaxy of erudite Pandits associated with the Kanchi Kamakoti Pitha, Śāstraratnākara Ramasubba Sastrigal has distinguished himself in many gatherings of Pandits in different parts of India. When the teaching unit of the Samskrit Education Society was started, and it was happily decided that special steps should be taken to equip the younger generation of Pandits with an adequate depth of knowledge in Vyākaraṇa, it was Sri Ramasubba Sastrigal whom the Society asked to take charge of their post-Śiromaṇi course in Vyākaraṇa.

Apart from devoting its attention to ways and means of deepening the scholarship of young Pandits, the Society legitimately thought also of ways and means of propagating Sanskrit and facilitating its study and mastery by the wider community desirous

Cf. Kāśikā and Padamañjarī on VII. 2.22 where they illustrate the word Kaṣṭa by saying कष्टं व्याकरणम् and explain that it is so because it is hard to understand the rules of 'Iḍāgama' etc. व्याकरणस्य कष्टत्वमिडागमादिव्यवस्थाया दुर्ज्ञानत्वात्।

of learning it. Towards the realisation of this aim, certain research and publication schemes were proposed by the undersigned and the Society approved them. One of the projects thus proposed is the present compilation *Kṛdantarūpamālā*. The idea became a practical proposition because of the availability at the Society of the services of the distinguished Vaiyākaraṇa, Sri Ramasubba Sastrigal, and the assistance of his two students in the first-batch, Nyāya-Śiromaṇis V. S. Srivatsankacharya and T. K. Pranatartiharan, both of whom qualified themselves in Vyākaraṇa under the Society's scheme.

There are about 2000 roots in the ten groups given in the *Dhātupāṭha*; these multiply further when we take also their twelve kinds of derivative forms, desiderative, casual etc., and the frequentatives of different kinds. One hundred and thirty suffixes, forming declinable and indeclinable words, could be added to them in their own form or when compounded with other words. Such formations are also affected by the special characteristics of the group to which a root belongs. All these factors make the *Kṛdanta* a bewildering department of Sanskrit grammar. In the present Concordance, the problems of this subject have been tackled and all possible care has been taken to formulate and present all the possible forms of all the roots. Twenty of the essential *Kṛts* are fully dealt with for every root; the rest are shown wherever, under special circumstances, they occur according to rules applicable to specific roots. For examples of roots under which the largest number of derivatives are given, *Kṛ* and *Gam* may be seen. The forms are presented in a specific order: First the root is given with its number, group and other characteristics which number seven; the meanings of the roots are then given; in respect of the above, authorities are also cited where necessary. Then the twenty *Kṛdanta* - forms are set forth and in the end, additional forms for desiderative etc. are also given; where necessary several further forms are added as under *Kṛ*. To support the forms set forth, citations of usages in *Bhaṭṭi Kāvya*, *Dhātu Kāvya* and other poems and also other relevant treatises are added in the footnotes. To conserve space and make the presentation neat and compact, a scheme of abbreviations has been employed and a key to this has been supplied.

A compilation called *Dhāturūpaprakāśikā* was brought out long ago by Sri Srikantha Sastri in Telugu script from Mysore, where

along with conjugational forms, ten *Krts* alone were worked out. In 1885, W.D. Whitney, as a supplement to his *Sanskrit Grammar*, brought out his *The Roots, Verb-forms and Primary Derivatives of the Sanskrit Language*. The former book, whose scope was limited, is no longer available and the latter, in Roman script, although now reprinted, is neither full nor solely concerned with the derivatives ; also its script prevents its use among the mass of Sanskrit students in the country. It may therefore be said that not only is our present effort more complete than any attempted previously but also the material has been arranged and presented in such a manner that maximum usefulness is assured for the work.

In the present work, it is proposed to deal completely with 1500 roots and with another 500 more in a brief manner. As the whole work will take some time to be completed and will also be very large in size, it is proposed to issue the book in convenient volumes of 250 pages each. The first of these volumes is now placed before the public.

In addition to formulating the lines on which this Concordance should be compiled and arranged, the undersigned has read and checked the proofs of each forme before it was struck ; and in this work, he has been assisted by Pandit A. M. Srinivasachariar.

The Samskrit Education Society and Sri Ramasubba Sastrigal, the author, might be congratulated on undertaking and accomplishing this big and difficult work. Thanks are due to the Central Sanskrit Board who scrutinised and approved the plan of this work and extended some assistance ; in view of the time, labour and expense which this project will involve, it is hoped the Board will continue their interest in this work and give it increased assistance for its early completion.

V. RAGHAVAN

॥ श्रीः ॥

॥ श्रीगुरुभ्यो नमः ॥

उपोद्घातः ।

अयि भोः मान्या गीर्वाणवाणीप्रणयिनः ! भवतां पुरतः **कृदन्तरूपमालाख्य**मिमं ग्रन्थमुपहारतया समर्प्य सविनयं किञ्चिद्विज्ञाप्यते । मद्रपुरीस्थ**संस्कृतविद्यासमितेः** कृते ग्रन्थस्यास्य सम्पादने प्रवृत्तोऽहमभवम् ।

ग्रन्थरचनाप्रकारः ।

ग्रन्थेऽस्मिन् दशविकरणीपठितानां धातूनामकारादिक्रममाश्रित्य लेखनं क्रियते । तादृशी लेखनक्रमानुस्यूता संख्या प्रथमतो निर्दिष्टा । तदनन्तरम्, अर्थविशिष्टत्वेन धातुस्वरूपनिर्देशः । तदनु, उपात्तधातोर्गणसंख्या, पश्चात् गणस्य नाम, ततः धातुपाठपठनक्रमानुसारिणी संख्या, तदुपरि सकर्मकत्वाकर्मकत्वादिनिर्देशः, अनन्तरम्, सेडनिडादिप्रदर्शनम्, ततः परस्मैपदात्मनेपदादिसूचनम्, पश्चात् (सति सम्भवे) अन्तर्गणनिर्देशः (घटादिः, शमादिः), कुत्रचित् (सम्भवे सति) दैवश्लोकश्च इत्येवं रीतिरादृता । क्वचिद्धात्वर्थविचारोऽपि, यत्रावश्यकता, तत्र प्रादर्शि । ततः, ण्वुल्, तृच्, शता, शानच्, क्विप्, निष्ठा (क्तक्तवतू) पचाद्यच्, तव्यत्, अनीयर्, ण्यत्, खल्, (यक्,) घञ्, तुमुन्, क्तिन्, ल्युट्, क्त्वा, ल्यप्, क्त्वाणमुलौ इत्येवं क्रमेण रूपाणि प्रदर्शितानि । तत्र प्रथमतः शुद्धाद्धातोः, अनन्तरं ण्यन्तात्, तदनु सन्नन्तात्, अन्ते सति सम्भवे यङन्ताच्च रूपाणि विलिखितानि । क्वचित् क्वचित् उणादिप्रत्ययनिष्पन्ना अपि शब्दाः तत्तद्धातुप्रसङ्गे अर्थसामञ्जस्यं प्रयोगप्राचुर्यञ्चानुसृत्य **दशपाद्युणादिवृत्त्यनुरोधेन** प्रदर्शिताः ।

मूले यत्र रूपनिष्पत्तौ प्रमाणस्यावश्यकता, तत्राधोभागे 1,2,3 इत्यादिक्रमेण प्रमाणं प्रदर्शितम् । एवमेव प्रयोगप्रदर्शनार्थं A.B.C. इत्यादिक्रमेण उपात्तग्रन्थगतसर्गश्लोकसंख्याप्रदर्शनपूर्वकं श्लोकस्सन्दर्शितः । [अ] इत्युपादाय कुत्रचित् धात्वर्थविचारादिः कृतः ।

यत्रोभयोर्धात्वोः रूपाणि सदृशानि, तत्र पुनर्लेखनस्यानपेक्षितत्वेन पूर्वलिखितधातुसंख्यानिर्देशपूर्वकमतिदेशः कृतः । यद्यस्ति विशेषः, सोऽपि

प्रदर्शितः । तत्तत्सूत्रोपादानस्थलेषु पाठकानां सौकर्याय यथासम्भवम्, अध्यायपादसूत्रसंख्या अपि प्रदर्शिताः । **वार्तिक**विषये तु—उपात्तवार्तिकानां **महाभाष्ये** यत्रावतारः कृतः, तत्सूत्रसंख्या प्रदर्शिता ।

अवधेयाः शास्त्रीया विशेषाः ।

धातवो द्विविधाः–औपदेशिकाः, आतिदेशिकाश्चेति । धातुपाठे **पाणिनिना** साक्षात् पठिताः औपदेशिकाः । 'सनाद्यन्ता धातवः' (3-1-32) इति सूत्रबोधितधातुसंज्ञकाः,

'सन् क्यच् काम्यच् क्यङ् क्यषोऽथाचारक्विब् णिज्यङौ तथा ।
यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः ॥'

इत्युक्ताः सनादिप्रत्ययान्ताः द्वादश आतिदेशिकाः । तेषु णिच्-सन्-यङन्तास्त्रय एवात्र कृत्प्रत्ययप्रकृतित्वेनोपात्ताः । यद्यपि क्यजाद्यन्तेभ्योऽपि धातुभ्यः एते साधारणाः कृत्प्रत्यया भवितुमर्हन्ति–यथा- पुत्रीयकः, पुत्रीयिता, पुत्रकाम्यकः, पुत्रकाम्या–इति ; तथापि क्यजादीनां सुबन्त प्रातिपदिकप्रकृतिकत्वेन तेषामानन्त्यात्, तेभ्यः कृत्प्रत्ययप्रदर्शनं दुस्साधमिति परित्यक्तम् । यङ्लुकस्तु केषाञ्चिन्मते छान्दसत्वात् तदन्तेभ्योऽपि नात्र कृत्प्रत्ययाः प्रदर्शिताः ।

आचार्यः, तत्तद्धातुषु अकाराद्यनुबन्धकरणेन कार्यविशेषं प्रतिपादयति । यथा—'एध वृद्धौ' इत्यादिषु अनुदात्ताकारस्यानुबन्धस्य करणेन, 'ईङ् गतौ' इत्यादिषु ङकारस्यानुबन्धस्य करणेन च 'अनुदात्तङित आत्मनेपदम्' (1-3-12) इति शानच्प्रत्ययं शास्ति—एधमानः, अयमानः इति शानजर्थम् । एवम् 'अल गत्यादिषु' इत्यादिषु अकारस्य स्वरितत्वप्रतिज्ञानेन, 'ऊर्णुञ् आच्छादने' इत्यादिषु ञकारस्येत्संज्ञासम्पादनेन च, 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (1-3-72) इति सूत्रेण विवक्षाभेदेन आत्मनेपदं परस्मैपदं च शास्ति । एवमाकारादीनां वर्णानां, ञि टु डु इत्येतेषाञ्चानुबन्धानां करणेन कार्यविशेषं तत्रतत्र प्रतिपादयति ।

धातोरर्थनिर्देशः मद्रपुरीस्थबालमनोरमामुद्रालयमुद्रितधातुपाठकोशमवलम्ब्य कृतः । तत्र प्रसिद्धिप्राचुर्यात् धात्वर्थ एको निर्दिष्टः । धातूनामनेकार्थत्वात्, प्रामाणिका अन्ये अप्यर्थाः ज्ञेयाः । अत एव **भाष्ये** 'अग्नौ परि-

चाय्योपचाय्यसमूह्याः' (3-1-131) इत्यत्र 'ऊहिरपि वह्यर्थे वर्तते । कथं पुनरन्यो नामान्यस्यार्थे वर्तते? कथमूहिर्वह्यर्थे वर्तते? बह्वर्था अपि धातवो भवन्ति ।' इत्युक्तम् । 'सेधतेर्गतौ' (8-3-113) इत्यत्र गतिग्रहणम्, '........गुद क्रीडायामेव' इत्यत्र एवकारग्रहणम्—इत्यादिकं धातूनामनेकार्थत्वे लिङ्गम् । एतत्सर्वमभिप्रेत्यैव—

'धातवश्चोपसर्गाश्च निपाताश्चेति ते त्रयः ।
अनेकार्थाः स्मृताः प्राज्ञैः ; पाठस्तेषां निदर्शनम् ॥'

इत्यभियुक्तैरुक्तम् ।

क्वचित्—सामान्यतः, अर्थनिर्देशे कृतेऽपि, अर्थविशेषे एव पर्यवसानं भवति । अत एव, "सत्यपि हि शब्दार्थत्वे भिद्यते एवैषामभिधेयम् । तथा हि—कवतिस्तावदव्यक्ते शब्दे वर्तते—उष्ट्रः कोकूयते–इति । कुवतिरप्यार्तस्वरे वर्तते—चोकूयते वृषल इति । पीडित इत्यर्थः । कौतिस्तु शब्दमात्रे ।" इति 'न कवतेर्यङि' (7-4-63) इत्यत्र **न्यासे** प्रोक्तं सङ्गच्छते । एवम्,

'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
विहाराहारसंहारप्रहारपरिहारवत् ॥'

इत्युक्तरीत्यापि धातूनां नानार्थत्वं स्वयमेव यथायथमूह्यम् । यथाप्रमाणमेतादृशार्थानामपि ग्रन्थेऽत्र प्रदर्शनं कृतम् ।

अर्थभेदेन, उपसर्गसमभिव्याहारेण च धातोः सकर्मकत्वमकर्मकत्वं च भवति । यथा-भूधातुरकर्मकोऽपि, सुखमनुभवति इत्यत्रोपसर्गसमभिव्याहारात् सकर्मको भवति । एवं जिधातुः पराभवार्थे सकर्मकः—शत्रून् जयति इति, जयार्थे अकर्मकः–देवदत्तो जयति इति । अतश्च सामान्यतः धातुपाठकोशेषु योऽर्थः प्रदर्शितः, तस्मिन्नर्थे तस्य धातोः कर्मान्वययोग्यतायां सकर्मकत्वम्, नो चेदकर्मकत्वम् इत्याशयेनात्र सकर्मकत्वमकर्मकत्वं च प्रदर्शितमित्यपि ज्ञेयम् ।

धातवः सेटः, अनिटः, विकल्पितेटश्चेति त्रिधा भिन्नाः । सेटोऽपि धातोः कुत्रचित् प्रत्ययेषु इण्णिषेधः, इड्विकल्पश्च भवति । अनिटोऽपि धातोः प्रत्ययविशेषे क्वचिदिड्विधीयते । एतत्सर्वं प्रमाणप्रदर्शनपूर्वकं तत्र तत्र लिखितम् ।

परस्मैपदात्मनेपदोभयपदित्वेन धातवो भिन्नाः । तत्र परस्मैपदिनोऽपि धातोः उपसर्गवशात्, अर्थविशेषनिमित्ताच्च आत्मनेपदं भवति । यथा—जिधातुः

स्वयं परस्मैपद्यपि 'विपराभ्यां जे:' (1-3-19) इति शास्त्रात् वि-परा-पूर्वकत्वे आत्मनेपदी भवति——विजयमान:, पराजयमान: इति। एवं आत्मनेपदिनोऽपि धातो: परस्मैपदं भवति—यथा ; रमुधातुरात्मनेपदी; तस्य 'व्याङ्परिभ्यो रम:' (1-3-83) इति शास्त्रात् परस्मैपदं, शता-भवति विरमन् इति। एवमादयो विशेषा अपि प्रमाणं प्रदर्श्य यथासम्भवं निरूपिता:।

दशस्वपि विकरणेषु अन्तर्गणा: केचन कार्यविशेषार्थं निर्दिष्टा:। तेषां प्रयोजनमपि तत्तद्धातुषु प्रमाणोपन्यासेनास्माभि: प्रदर्शितम्। यथा—भ्वादिषु **घटादय:** इति केचन धातव: पठिता:। तेषां फलं तु—'घटादयो मित:' (गणसूत्रं भ्वादौ) इति मित्संज्ञा। मित्संज्ञाफलं तु—'मितां ह्रस्व:' (6-4-92) इति उपधाह्रस्व:। यथा—घटक: इत्यत्र ण्यन्ताण्ण्वुलि णिज्निमित्तक उपधाह्रस्वो भवति। एवमादयोऽन्तर्गणा: प्राय: सर्वेष्वपि विकरणेषु सन्ति। तत्र तत्रास्माभिस्तेषां प्रदर्शनं कृतम्। तत्र कृदन्तप्रकरणेषूपयुक्तानामेवान्तर्गणानामस्माभि: प्रदर्शनं कृतम्, नान्येषाम्। 'रुदादिभ्य: सार्वधातुके' (7-2-76) इत्यत्रोपात्तस्य रुदादिरूपादादिकावान्तरगणस्य कृदन्तरूपेष्वनुपयुक्ततया नात्रोपादानम्-इत्यादिकं यथायथमूह्यम्।

देवनाम्ना प्राचीनवैयाकरणेन एकस्मिन् गणे, भिन्नेषु गणेषु वा पठितानां सरूपाणाम्, अंशतो भिन्नानां च धातूनां पुन: पाठस्य प्रयोजनप्रदर्शनार्थं श्लोकरूप: कश्चन ग्रन्थो निर्मित:, यस्य ग्रन्थस्य वैयाकरणनिकाये '**दैवम्**' इत्याख्या। यथा—

'पठितस्य पुन: पाठे फलं वृत्तेन वक्ष्यते।
न विना वृत्तबन्धेन वस्तु प्रायेण सुग्रहम्॥

दाञो दत्ते ददातीति, दाणो यच्छति, दो द्यति।
दाति दायति दाप्दैपो:, दयते रक्षणे ङित:॥' इति।

ग्रन्थस्यास्य **श्रीकृष्णलीलाशुकमुनि**विरचिता **पुरुषकारवार्तिका**ख्या व्याख्या वर्तते—यत्र च बहवोऽपूर्वांशा: प्रतिपादिता:। तयो: प्रकृतोपयोगी अवश्यमुपादेयांशोऽस्मिन् ग्रन्थे तत्र तत्र प्रदर्शित:।

पाणिनिना 'भू सत्तायाम्' इत्यारभ्य, 'बहुलम्, एतन्निदर्शनम्' इत्यन्ते धातुपाठे दशस्वपि गणेषु प्रायो द्विसहस्रसंख्याका धातवो निर्दिष्टा:।

तेभ्यस्सर्वेभ्य: कर्तृकर्मभावादिष्वर्थेषु विहिता: कृत्प्रत्यया: प्रायेण त्रिंशदधिकशतसंख्याका उपलभ्यन्ते। ते सर्वेऽपि न सर्वेभ्यो धातुभ्यो भवन्ति। धातुत्वनिमित्तका: केचन प्रत्यया:। ते च ण्वुल्तृजादय आसन्नविंशा:। धातुत्वव्याप्यनिमित्तका: केचन युजादय: प्रत्यया:—ते यथा 'चलनशब्दार्थादकर्मकाद् युच्' (3-2-148) इत्यादय:। अन्ये केचन धातुस्वरूपोपादानेन विहिता:—यथा 'हरतेरनुद्यमनेऽच्' (3-2-9) इत्यादय:। एते सर्वेऽपि तत्र तत्र यथासम्भवं प्रतिपादिता:।

सूत्रपाठक्रमे यद्यपि, 'धातो:' (3-1-91) इत्यनन्तरं तव्यदादय: कृत्यप्रत्यया एव प्रक्रान्ता:; तथापि ग्रन्थेऽस्मिन् कर्तृवाचकानां ण्वुलादीनां प्राथम्यमाश्रितम्। तत्र निदानं तु—सकर्मकाकर्मकसाधारण्येन धातुमात्रात् 'कर्तरि कृत्' (3-4-67) इत्यनुशासनेन ण्वुलादीनां विधानात् तस्य व्यापकत्वेन प्राधान्यमिति। अनन्तरं भावकर्मार्थिकप्रत्ययानाम्, तदनु भावाद्यर्थकानां घञादीनाम्, अन्ते, अव्ययसंज्ञायोग्यानां तुमुनादीनां च निवेश:—इति क्रमोऽत्राहृत:। उणादीनां कुत्रचिदेव प्रदर्शनात्, तेषामन्ते निवेश:।

अत्र ग्रन्थे ण्वुलन्तेन पदेन, 'ण्वुल्तृचौ' (3-1-133), 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (3-3-10), 'रोगाख्यायां ण्वुल् बहुलम्' (3-3-108), 'धात्वर्थनिर्देशे ण्वुल् वाच्य:' (वा. 3-3-108), 'संज्ञायाम्' (3-3-109) इत्यादीनां तन्त्रेण निर्देशो ज्ञेय:। एवम्, तृजन्तेन पदेन तच्छीलाद्यधिकारे 'तृन्' (3-2-135) इति सूत्रेण विहितस्य तृन्नन्तस्यापि ग्रहणं ज्ञेयम्। शानजन्तेन, 'ताच्छील्यवयोवचनशक्तिषु चानश्' (3-2-129) इति विहितस्यापि ग्रहणम्। क्तान्तेन पदेन 'निष्ठा' (3-2-102), 'आदिकर्मणि क्त: कर्तरि च' (3-4-71), 'गत्यर्थाकर्मक—' (3-4-72), '**क्तो**ऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्य:' (3-4-76), 'नपुंसके भावे क्त:' (3-3-114) इति विहितानां तन्त्रेण निर्देश:। क्तवत्वन्तेन पदेन, '**निष्ठा**' (3-2-102), 'आदिकर्मणि **निष्ठा** वक्तव्या' (वा. 3-4-71) इति विहितयोर्ग्रहणम्। तुमुन्नन्तेन, '**तुमुन्**ण्वुलौ क्रियायां क्रियार्थायाम्' (3-3-10), 'समानकर्तृकेषु **तुमुन्**' (3-3-158), 'कालसमयवेलासु **तुमुन्**' (3-3-167) इति विहितानां ग्रहणम्। एतेषां प्रत्येकमर्थ:, काल:,

स्वयं परस्मैपद्यपि 'विपराभ्यां जेः' (1-3-19) इति शास्त्रात् वि-परा-पूर्वकत्वे आत्मनेपदी भवति---विजयमानः, पराजयमानः इति। एवं आत्मनेपदिनोऽपि धातोः परस्मैपदं भवति—यथा ; रमुधातुरात्मनेपदी; तस्य 'व्याङ्परिभ्यो रमः' (1-3-83) इति शास्त्रात् परस्मैपदं, शता-भवति विरमन् इति। एवमादयो विशेषा अपि प्रमाणं प्रदर्श्य यथासम्भवं निरूपिताः।

दशस्वपि विकरणेषु अन्तर्गणाः केचन कार्यविशेषार्थं निर्दिष्टाः। तेषां प्रयोजनमपि तत्तद्धातुषु प्रमाणोपन्यासेनास्माभिः प्रदर्शितम्। यथा—भ्वादिषु **घटादयः** इति केचन धातवः पठिताः। तेषां फलं तु—'घटादयो मितः' (गणसूत्रं भ्वादौ) इति मित्संज्ञा। मित्संज्ञाफलं तु—'मितां ह्रस्वः' (6-4-92) इति उपधाह्रस्वः। यथा—घटकः इत्यत्र ण्यन्ताण्ण्वुलि णिज्निमित्तक उपधाह्रस्वो भवति। एवमादयोऽन्तर्गणाः प्रायः सर्वेष्वपि विकरणेषु सन्ति। तत्र तत्रास्माभिस्तेषां प्रदर्शनं कृतम्। तत्र कृदन्तप्रकरणेषूपयुक्तानामेवान्तर्गणानामस्माभिः प्रदर्शनं कृतम्, नान्येषाम्। 'रुदादिभ्यः सार्वधातुके' (7-2-76) इत्यत्रोपात्तस्य रुदादिरूपादादिकावान्तरगणस्य कृदन्तरूपेष्वनुपयुक्ततया नात्रोपादानम्-इत्यादिकं यथायथमूह्यम्।

देवनाम्ना प्राचीनवैयाकरणेन एकस्मिन् गणे, भिन्नेषु गणेषु वा पठितानां सरूपाणाम्, अंशतो भिन्नानां च धातूनां पुनः पाठस्य प्रयोजनप्रदर्शनार्थं श्लोकरूपः कश्चन ग्रन्थो निर्मितः, यस्य ग्रन्थस्य वैयाकरणनिकाये '**दैवम्**' इत्याख्या। यथा—

'पठितस्य पुनः पाठे फलं वृत्तेन वक्ष्यते।
न विना वृत्तबन्धेन वस्तु प्रायेण सुग्रहम्॥

दाञो दत्ते ददातीति, दाणो यच्छति, दो द्यति।
दाति दायति दाप्दैपोः, दयते रक्षणे ङितः॥' इति।

ग्रन्थस्यास्य **श्रीकृष्णलीलाशुकमुनि**विरचिता **पुरुषकारवार्तिका**ख्या व्याख्या वर्तते—यत्र च बहवोऽपूर्वांशाः प्रतिपादिताः। तयोः प्रकृतोपयोगी अवश्यमुपादेयांशोऽस्मिन् ग्रन्थे तत्र तत्र प्रदर्शितः।

पाणिनिना 'भू सत्तायाम्' इत्यारभ्य, 'बहुलम्, एतन्निदर्शनम्' इत्यन्ते धातुपाठे दशस्वपि गणेषु प्रायो द्विसहस्रसंख्याका धातवो निर्दिष्टाः।

तेभ्यस्सर्वेभ्यः कर्तृकर्मभावादिष्वर्थेषु विहिताः कृत्प्रत्ययाः प्रायेण त्रिंशदधिकशतसंख्याका उपलभ्यन्ते। ते सर्वेऽपि न सर्वेभ्यो धातुभ्यो भवन्ति। धातुत्वनिमित्तकाः केचन प्रत्ययाः। ते च ण्वुल्तृजादय आसन्नविंशाः। धातुत्वव्याप्यनिमित्तकाः केचन युजादयः प्रत्ययाः—ते यथा 'चलनशब्दार्थादकर्मकाद् युच्' (3-2-148) इत्यादयः। अन्ये केचन धातुस्वरूपोपादानेन विहिताः—यथा 'हरतेरनुद्यमनेऽच्' (3-2-9) इत्यादयः। एते सर्वेऽपि तत्र तत्र यथासम्भवं प्रतिपादिताः।

सूत्रपाठक्रमे यद्यपि, 'धातोः' (3-1-91) इत्यनन्तरं तव्यदादयः कृत्यप्रत्यया एव प्रक्रान्ताः; तथापि ग्रन्थेऽस्मिन् कर्तृवाचकानां ण्वुलादीनां प्राथम्यमाश्रितम्। तत्र निदानं तु—सकर्मकाकर्मकसाधारण्येन धातुमात्रात् 'कर्तरि कृत्' (3-4-67) इत्यनुशासनेन ण्वुलादीनां विधानात् तस्य व्यापकत्वेन प्राधान्यमिति। अनन्तरं भावकर्मार्थिकप्रत्ययानाम्, तदनु भावाद्यर्थकानां घञादीनाम्, अन्ते, अव्ययसंज्ञायोग्यानां तुमुनादीनां च निवेशः—इति क्रमोऽत्रादृतः। उणादीनां कुत्रचिदेव प्रदर्शनात्, तेषामन्ते निवेशः।

अत्र ग्रन्थे ण्वुलन्तेन पदेन, 'ण्वुल्तृचौ' (3-1-133), 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (3-3-10), 'रोगाख्यायां ण्वुल् बहुलम्' (3-3-108), 'धात्वर्थनिर्देशे ण्वुल् वाच्यः' (वा. 3-3-108), 'संज्ञायाम्' (3-3-109) इत्यादीनां तन्त्रेण निर्देशो ज्ञेयः। एवम्, तृजन्तेन पदेन तच्छीलाद्यधिकारे 'तृन्' (3-2-135) इति सूत्रेण विहितस्य तृन्नन्तस्यापि ग्रहणं ज्ञेयम्। शानजन्तेन, 'ताच्छील्यवयोवचनशक्तिषु चानश्' (3-2-129) इति विहितस्यापि ग्रहणम्। क्तान्तेन पदेन 'निष्ठा' (3-2-102), 'आदिकर्मणि क्तः कर्तरि च' (3-4-71), 'गत्यर्थाकर्मक—' (3-4-72), 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' (3-4-76), 'नपुंसके भावे क्तः' (3-3-114) इति विहितानां तन्त्रेण निर्देशः। क्तवत्वन्तेन पदेन, 'निष्ठा' (3-2-102), 'आदिकर्मणि निष्ठा वक्तव्या' (वा. 3-4-71) इति विहितयोर्ग्रहणम्। तुमुन्नन्तेन, 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (3-3-10), 'समानकर्तृकेषु तुमुन्' (3-3-158), 'कालसमयवेलासु तुमुन्' (3-3-167) इति विहितानां ग्रहणम्। एतेषां प्रत्येकमर्थः, कालः,

इत्यादिकं यद्यपि भिद्यते एव ; तथापि शब्दस्वरूपमात्रप्रदर्शनपरैरस्माभिस्तेषां विशिष्य निर्देशो न कृतः—इति ज्ञेयम् ।

ण्वुल्, तृच्, शता, शानच्, क्विप्, क्तक्तवतू, पचाद्यच् इत्याद्याः प्रत्ययाः प्रायः 'कर्तरि कृत्' (3-4-67) इत्यनुशासनात् कर्तरि भवन्ति । तव्यत्, अनीयर्, ण्यत् (यत्), खल्, (यक्) (क्वचित् क्तप्रत्ययोऽपि), इत्यादयः प्रत्ययाः 'तयोरेव कृत्यक्तखलर्थाः' (3-4-70) इति वचनात् सकर्मकेभ्यः कर्मणि, अकर्मकेभ्यो भावे च भवन्ति । घञ्, क्तिन्, अप्, अच्, अकारप्रत्ययः, इत्यादयः भावे अकर्तरि च कारकादौ भवन्ति। तुमुन्, क्त्वा, (ल्यप्) क्त्वाणमुलौ इत्येते प्रत्ययाः 'अव्ययकृतो भावे' (**भाष्येष्टिः**) इति वचनात् भावे भवन्ति ।

शत्रन्तात् स्त्रियाम्, 'उगितश्च' (4-1-6) इति ङीपि नुमागमप्रवृत्तौ द्वाभ्यां सूत्राभ्यां पाणिनिर्निर्णयमकरोत्—तद्यथा—'शप्श्यनोर्नित्यम्' (7-1-81) इति भ्वादिदिवादिगणपठितधातुप्रकृतिकशत्रन्तानां नित्यं नुम्—भवन्ती, दीव्यन्ती, इति । तुदादिगणपठितानां, अदादौ आकारान्तधातूनां च 'आच्छीनद्योर्नुम्' (7-1-80) इति वा नुम्–तुदती-तुदन्ती, याती-यान्ती इति। अन्येषां षण्णां शत्रन्तानां नुमागमो नैव भवति । यथा-श्वसती (अदादौ), दधती (जुहोत्यादौ), सुन्वती (स्वादौ), कुर्वती (तनादौ), रुन्धती, (रुधादौ) क्रीणती (क्र्यादौ), इति । चुरादीनां तु शब्रूपे विकरणप्रत्यये सति 'शप्श्यनोः–' (7-1-81) इति नित्ये नुमि चोरयन्ती–इत्येव । एवञ्च 'प्रत्ययादाश्वसन्त्यः' (**मेघसन्देशे १.८**) इति पाठस्तु न प्रामाणिकः। **आश्वसत्य** इत्येव साधु। एतत्सर्वं तत्तद्धातुषु विवेचितम् ।

ग्रन्थेऽत्र प्रदर्शितेषु रूपेषु लिङ्गविशेषविवक्षा न । केवलं प्रातिपदिकप्रदर्शने एव तात्पर्यम् । शास्त्रेण लिङ्गविशेषनिर्देशपूर्वकं प्रत्ययविधानस्थलेषु तु लिङ्गं विवक्षितमेव । यथा—'नपुंसके भावे क्तः' (3-3-114) शयितम्, 'स्त्रियां क्तिन्' (3-3-94) भूतिः, 'घञजपाः पुंसि' (लिङ्गानुशासनम्) भावः, इति । एतत् सर्वमनुभवबलेन ज्ञेयम् ।

सकर्मकेषु धातुषु 'कर्मण्यण्' (3-2-1) इति सामान्येन विहितोऽप्यण् प्रत्ययः प्रयोगबलात् **कुम्भकारः** इत्यादिषु क्वचिदेव भवति ; न तु

'आदित्यं पश्यति' इत्यादौ । अत एव, 'आदित्यं पश्यति' **इत्यादौ** कर्मण्यण् कुतो न? इत्याशङ्क्य, 'अनभिधानात् ।' इत्युक्तं **भाष्ये** (3-2-1) । अत्र **कैयटः**–'नित्यानां शब्दानामिदमन्वाख्यानमात्रम् । न च, आदित्यं पश्यतीत्याद्यर्थप्रतिपादनाय आदित्यदर्शादयः शब्दा लोके प्रयुज्यन्ते, इति शास्त्रेणापि साधुत्वेन नानुशास्यन्त इत्यर्थः ।' इति।

'अज गतिक्षेपणयोः' 'अस भुवि' 'चक्षिङ् व्यक्तायां वाचि' इत्यादिषु, कुत्रचिदेव प्रत्ययेषु धातुस्वरूपस्योपलब्धिः, कुत्रचित् तत्स्थाने आदेशभूतस्यैवोपलब्धिरित्यादिकं यथाप्रमाणमत्र रूपप्रदर्शनसमये प्रदर्शितम् ।

सामान्यतः पठितानामपि धातूनां कुत्रचित् नियतप्रत्ययविषयका एव प्रयोगा इति **भाष्य**वचनादवगम्यते । तद्यथा—'........यथा—अन्यत्राप्यविशेषविहिताः शब्दाः नियतविषया दृश्यन्ते । क्वान्यत्र? तद्यथा—**घरतिरस्मै** अविशेषेणोपदिष्टः ; सः घृतम्, घृणा, घर्म इत्येवंविषयः । **रशिरस्मै** अविशेषेणोपदिष्टः ; स राशिः, रश्मिः, रशना इत्येवंविषयः । **लुशिरस्मै** अविशेषेणोपदिष्टः ; स लोष्ट इत्येवंविषयः ।' इति 'तृज्वत् क्रोष्टुः' (7-1-95) इत्यत्र **भाष्यम् ।**

ग्रन्थोऽयम्, अनधीतव्याकरणानां कृदन्तान् साधून् शब्दान् प्रयुयुक्षूणां महते फलाय प्रकल्पेतेति मन्ये ।

मद्रपुरीयविश्वविद्यालये संस्कृतविभागाध्यक्षाणां संस्कृतविद्यासमितेरङ्गभूतानाम्, तत्र प्रचाल्यमानग्रन्थप्रकाशनादिकार्यवेक्षकाणाम्, **पद्मभूषण** डाक्टर् वे. **राघवार्याणां** जागरूकतया पुनः पुनः पर्यवेक्षणं मुद्रणस्य परिष्कृतत्वे निदानमिति तेभ्यो मदीयां कृतज्ञतां सामोदं निवेदयामि । किंच संस्कृतभाषाध्येतृभिः विद्यार्थिभिः, गैर्वाणीप्रणयिभिश्च धातुकृदन्तविषये अनुभूयमानं क्लेशं सन्देहं च पर्यालोच्य, एतादृशग्रन्थनिर्माणं सुबहु उपकुर्यादिति एतद्ग्रन्थनिर्माणस्यावश्यकतां, तन्निर्माणरेखां च निरूप्य एते एव **श्रीराघव**महाशयाः समितये प्ररोचनामकुर्वन् ।

संस्कृतविद्यासमितेः प्रोत्साहनेनैवातीतवयस्कस्यापि मम, एतद्ग्रन्थनिर्माणे शक्तिः समुत्पन्नेति समित्यै विनयपूर्वकं प्रणामान् समर्पयामि ।

मातृकाग्रन्थलेखने, परिष्कृततया मुद्रणोपयोगितया पुनर्लेखने, मुद्रणकाले संशोधने च सहयोगमातन्वते, न्यायशिरोमणये मन्निकटे व्याकरणमधीत्य व्याकरणविद्याप्रवीणपरीक्षोत्तीर्णाय अधीतवेदान्ताय श्री. उ. वे. पैयम्बाडि-चेट्टलूर्-वा. श्रीवत्साङ्काचार्याय; तथा प्रमाणाद्यन्वेषणे, महाकवीनां प्रयोगादिसङ्कलने, मुद्रणकाले संशोधने च सहायभूताय न्यायव्याकरणशिरोमणये श्री. T. K. प्रणतार्तिहराय च भगवान् श्रेयांसि भूयांसि विदध्यादिति प्रार्थये। मुद्रणपत्राणां शोधनसमये निपुणं तत्तत् परिशोध्योपकृतवद्भ्यः, श्री. उ. वे. अ. मु. श्रीनिवासाचार्येभ्यश्च कार्तज्ञ्यमाविष्करोमि। किञ्चित् कालविलम्बेनापि मुद्रणकार्यं सोत्साहं सम्पादितवते कैरविणीक्षेत्रस्थ भारतीविजयमुद्रणालयाधिकारिणे श्री. C. रामार्याय उत्तरोत्तरं श्रेयांसि भगवान् वितनुतादिति प्रार्थये।

अत्र ग्रन्थे यथामति शास्त्राणि पर्यालोच्य रूपाणि विलिखितानि। तेषु यदि, अनवधानात् प्रमादाद्वा दोषाः स्युः—तर्हि क्षमापरैः पण्डितवरैस्ते

'गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः॥'

इति न्यायेन क्षन्तव्या इति सप्रश्रयं प्रार्थये।

इत्थं सहृदयविधेयः

नासरत्पेट्टै,
पुविरुन्दवल्ली
मद्रास-५६
17-7-1965

शास्त्ररत्नाकर, कुलपति,
कोट्टारग्रामाभिजनः श. रामसुब्रह्मण्यशास्त्री
प्रधानाध्यापकः संस्कृतविद्यासमितेः कलाशाला।

॥ श्रीः ॥

॥ अस्मिन् ग्रन्थे उपयुक्तानां ग्रन्थानां ससङ्केताक्षराणां सूची ॥

अनर्घराघवम्—मुरारिविरचितम्। श्रीलक्ष्मणसूरिविरचितया आकराख्यव्याख्यया सह तञ्जानगरे पूर्णचन्द्रोदयमुद्राक्षरशालायां 1900 वर्षे मुद्रितम्।

अभिधानरत्नमाला— हलायुधविरचिता। Williams & Norgate, London 1861.

अमरकोशः—अमरसिंहविरचितः। भानुजीदीक्षितकृतसुधाख्य-व्याख्यया साकं निर्णयसागरमुद्रणालये मुम्बय्यां 1944 वर्षे (षष्ठं संस्करणम्) मुद्रितः।

अष्टाध्यायी—मद्रपुरीयबालमनोरमामुद्रणालये 1912 वर्षे मुद्रिता। वार्तिक-गणपाठ-धातुपाठसहिता।

आख्यातचन्द्रिका—भट्टमल्लविरचिता। काशी-चौखाम्बासंस्कृत-मुद्रणालये 1936 वर्षे मुद्रिता।

कविकल्पद्रुमः—बोपदेवविरचितः। आशुबोधविद्याभूषणेन कलकत्ता-नगर्यां 1904 वर्षे प्रकाशितः।

काशिका—वामनजयादित्यविरचिता। काश्यां चौखाम्बामुद्रणालये 1952 वर्षे मुद्रिता। तृतीयं संस्करणम्।

किरातार्जुनीयम्—भारविविरचितम्।

कुमारसम्भवः—कालिदासविरचितः।

क्षीरतरङ्गिणी—क्षीरस्वामिरचिता। श्रीरामलाल कपूर् ट्रस्ट्-द्वारा संवत् 2014 वर्षे प्रकाशिता। प्रथमावृत्तिः।

चम्पूरामायणम् (च. रा.)—भोजविरचितम्।

दशपाद्युणादिवृत्तिः (द. उ.)—काश्यां सरस्वतीभवनद्वारा 1943 वर्षे प्रकाशिता।

दुर्घटवृत्तिः—शरणदेवकृता। तिरुवनन्तपुरम् संस्कृत सीरीस्-द्वारा तिरुवनन्तपुरे 1942 वर्षे मुद्रिता। (द्वितीयं संस्करणम्)

दैवम्—देवकृतम् । कृष्णलीलाशुकमुनिविरचितपुरुषकाराख्यवार्ति-कोपेतम् । अजमेर-नगरे भारतीयप्राच्यविद्याप्रतिष्ठान-द्वारा संवत् 2019 वर्षे मुद्रितम् ।

धातुकाव्यम् (धा. का.)—भट्टतिरिनारायणविरचितम् । मुम्बय्यां निर्णयसागरमुद्रणालये 1915 वर्षे काव्यमालायां १० संख्यायां सञ्चिकायां मुद्रितम् । (तृतीयं संस्करणम्)

धातुरूपप्रकाशिका—श्रीकण्ठशास्त्रिविरचिता । आन्ध्राक्षरे मैसूर विद्यातरङ्गिणीमुद्रालये 1898 वर्षे मुद्रिता ।

न्यासः—जिनेन्द्रबुद्धिविरचितः । काशिकावृत्तिव्याख्याभूतः ।

पदमञ्जरी—हरदत्तविरचितकाशिकावृत्तिव्याख्या ।

परिभाषेन्दुशेखरः—नागेशभट्टविरचितः । भैरवी-तत्त्वप्रकाशिका-ख्यव्याख्याद्वयोपेतः । काश्यां चौखाम्बामुद्रणालये 1931 वर्षे मुद्रितः ।

प्रक्रियासर्वस्वम् (प्र. स.)—भट्टतिरिनारायणविरचितम् । तिरुवनन्तपुरे तिरुवनन्तपुरम् संस्कृत सीरीस्-द्वारा मुद्रितम् ।

प्रौढमनोरमा—भट्टोजीदीक्षितविरचिता । शब्दरत्न-भैरवी-भाव-प्रकाश-सरलाव्याख्यानसहिता काश्यां चौखाम्बामुद्रणालये 1939 वर्षे मुद्रिता ।

भट्टिकाव्यम्-I (भ., भ. का.) भट्टिविरचितम् । जयमङ्गलाख्य-व्याख्यासहितम् । निर्णयसागरमुद्रालये मुम्बय्यां 1900 वर्षे मुद्रितम् ।

भट्टिकाव्यम्-II चन्द्रकला-विद्योतिनीसहितम् । काश्यां चौखा-म्बामुद्रणालये 1951 वर्षे भागत्रयात्मना मुद्रितम् । द्वितीयं संस्करणम् ।

भारतचम्पूः—अनन्तकविविरचिता ।

महाभाष्यम्—भगवत्पतञ्जलिमहर्षिभिरनुगृहीतम् । मुम्बय्यां निर्ण-यसागरमुद्रालये कैयटकृतप्रदीप-नागेशभट्टकृतोद्योतसहितं 1951 वर्षे पञ्चमसंस्करणतया मुद्रितम् ।

माधवीयधातुवृत्तिः (मा. धा. वृ.)—सायणाचार्यविरचिता । काश्यां मेडिकल् हाल् नामके यन्त्रालये 1897 वर्षे मुद्रिता ।

यादवाभ्युदयः (या. अ.)—वेङ्कटनाथ(वेदान्तदेशिक)कृतः ।

रघुवंशः—कालिदासविरचितः ।

लघुशब्देन्दुशेखरः—नागेशभट्टविरचितः । चन्द्रिकादिव्याख्या-सहितः काश्यां गायघाट भार्गवपुस्तकालये 1932 वर्षे मुद्रितः ।

वाचस्पत्यम्—तारानाथतर्कवाचस्पतिविरचितम् । काश्यां चौखा-म्बामुद्रणालये 1962 वर्षे पुनः प्रकाशितम् ।

वासुदेवविजयम्—(वा. वि.) वासुदेवविरचितम् । मुम्बय्यां निर्ण-यसागरमुद्रणालये काव्यमालायां १०-सञ्चिकायां तृतीयसंस्करणतया 1915 वर्षे मुद्रितम् ।

शब्दकल्पद्रुमः—स्यार राजा राधाकान्तदेवबहादुरेण विरचितः । वाराणस्यां मोतिलाल् बनारसीदास् द्वारा 1961 वर्षे पुनः प्रकाशितः ।

शब्दकौस्तुभः—भट्टोजीदीक्षितविरचितः । चौखाम्बासंस्कृतमुद्रणा-लये वाराणस्यां 1933 वर्षे मुद्रितः ।

शाकुन्तलम्—कालिदासविरचितम् ।

शिशुपालवधः—माघविरचितः । मुम्बय्यां निर्णयसागरमुद्रालये मल्लिनाथकृतव्याख्यया सह 1910 वर्षे पञ्चमसंस्करणतया मुद्रितः ।

सरस्वतीकण्ठाभरणम्—भोजदेवविरचितम् । तिरुवनन्तपुरं संस्कृत सीरीस् द्वारा तिरुवनन्तपुरे 1937 वर्षे मुद्रितम् । दण्डनाथकृतव्याख्यानेन सहितम् ।

सिद्धान्तकौमुदी (सि. कौ.)—तत्त्वबोधिनीव्याख्यया सह मुम्बय्यां श्री वेङ्कटेश्वर स्टीम् मुद्रणालये मुद्रिता ।

सिद्धान्तकौमुदी—II बालमनोरमाव्याख्यासहिता । मद्रपुर्यां बालमनोरमामुद्रालये 1929 वर्षे मुद्रिता । एतद्ग्रन्थगतसंख्यैव धातुसंख्यायां सूत्रपाठसंख्यायां चोपयुक्ता ।

अन्येऽपि वैराग्यपञ्चकादयः—यथायथमुपात्ताः ।

पारिभाषिकशब्दसङ्केताक्षरविवरणम्

अक	—	अकर्मकः
अनि-	—	अनिट्
आ or आत्म-	—	आत्मनेपदम्
उ or उभ-	—	उभयपदी
ग. सू.	—	गणसूत्रम्
प or पर	—	परस्मैपदम्
वे.	—	वेट्
श्लो.	—	श्लोकः
स or सक.	—	सकर्मकः
से.	—	सेट्

श्रीः

श्रीवाग्देवतायै नमः

कृदन्तरूपमाला

(1) जगन्माता परा शक्तिर्भजतामिष्टदायिनी ।
कुरुताद् भावुकं देवी शब्दब्रह्मस्वरूपिणी ॥

(2) पाणिनिं परमाचार्यं कात्यायनमुनिं तथा ।
भाष्यकारं फणीशं च नमामि सततं गुरून् ॥

(3) शङ्कराभिख्यया ख्यातौ श्रौतस्मार्तक्रियारतौ ।
पितरावन्वगृह्णीतां माम्, अहं तौ सदा भजे ॥

(4) श्रीदण्डपाणिमखिनामखिलागमवेदिनाम् ।
अव्याजकृपयाऽवाप्ता पाणिनीये नये मतिः ।

(5) आलम्ब्य तां यथाबुद्धि प्राचीनार्यैर्विनिर्मितान् ।
ग्रन्थान् संशील्य यत्नेन कृदन्तानां प्रदर्शिका ॥

(6) पाणिनीयमहासूत्रग्रथिता सुमनोहरा ।
कृदन्तरूपमालेयं गुम्फिता सुधियां मुदे ॥

(7) अत्यन्तक्लेशजटिलं कार्यं यत्साधितं मया ।
विबुधामोदनं तस्य पर्याप्तं पारितोषिकम् ॥

(8) कोट्टारग्रामसम्भूतरामसुब्बाख्यशास्त्रिणा ।
कृदन्तरूपमालेयं रचिता जयताद्भुवि ॥

॥ कृदन्तरूपमाला ॥

(1) **"अक कुटिलायां गतौ"** (I -भ्वादिः-792 सकर्मकः-सेट्-परस्मैपदी)

घटादिः मित् ।

'इदितस्त्वङ्कते तत्र कुटिलायां गतावकेत् ।' (श्लो 41) इति **देवः** ।

		णिच्-	सन्-
ण्वुल्	आककः–किका,	[1]अककः–किका,	अचिकिष[1A]कः–षिका;
तृच् (तृन्)	अकिता-त्री,	अकयिता-त्री,	अचिकिषिता-त्री ;
शता	अकन्-न्ती,	अकयन्-न्ती,	अचिकिषन्-न्ती ;
	अकिष्यन्-न्ती-ती,	अकयिष्यन्-ती-न्ती,	अचिकिषिष्यन्-[न्ती-ती;
शानच्		अकयमानः,	अकयिष्यमाणः;
क्विप्	अक्-अकौ-अकः ;		
निष्ठा	अकितम्-[A]तः,	अकितः ,	अचिकिषितः-तम्-तवान् ;
अन्ये प्रत्ययाः	अकः, अकः,	[2]अचिकिषुः,	अचिकयिषुः ;
तव्यः	अकितव्यम् ,	अकयितव्यम्,	अचिकिषितव्यम् ;
अनीयर्	अकनीयम् ,	अकनीयम् ,	अचिकिषणीयम् ;
ण्यत् or यत्	आक्यम् ,	अक्यम् ,	अचिकिष्यम् ;
खल्	ईषदकः-दुरकः-स्वकः ;		
यक्	अक्यमानः,	अक्यमानः,	अचिकिष्यमाणः ;
घञ्	आकः,	अकः,	अचिकिषः;
तुमुन्	अकितुम्,	अकयितुम् ,	अचिकिषितुम्;
क्तिन्	[2A]अक्तिः,	अकना,	अचिकिषा[3],अचिकयिषा;

1. 'मितां ह्रस्वः' (6-4-92) इति णौ उपधाया ह्रस्वः ।

1A 'अजादेर्द्वितीयस्य' (*6-1-2*) इति द्वितीयस्यैकाचः द्वित्वम् । 'कुहोश्चुः' (*7-4-6*2) इत्यभ्यासस्य चुत्वम् ।

2. 'सनाशंसभिक्ष उः' (3-2-168) इति उः प्रत्ययः ।

2A 'तितुत्र—'(7-2-9.) इतीण्णिषेधः ।

3. 'अ प्रत्ययात्' (3-3-102) इति स्त्रियामकारः प्रत्ययः । टाप् ।

A. 'असाग्यमास्त्रं स्थगये कथं वा कगामि किं वा हरयेऽकिताय' **धातुकाव्ये** 2-8. श्लोकः ।

ल्युट्
क्त्वा
ल्यप्
क्त्वाणमुलौ

अकनम्, अकनम्, अचिकिषणम्;
अकित्वा, अकयित्वा, अचिकिषित्वा;
समक्य, समकय्य[1], समचिकिष्य;
अकित्वा २, आकमाकम्, } [2]आकम् २, अकम् २, अकयित्वा २, } अचिकिषम् २; अचिकिषित्वा २; }

(2) **"अकि लक्षणे"** (भ्वादिः-I-87. सक- सेट् - आत्मनेपदी।)

लक्षणं=चिह्नम्।

'इदितस्त्वङ्कते तत्र कुटिलायां गतावकेत्।' (श्लो 41) इति **देवः**।

अ[3]ङ्ककः—ङ्किका, अङ्ककः-किका, [4]अञ्चिकिषकः—षिका;
अङ्किता-त्री, अङ्कयिता-त्री, अञ्चिकिषिता-त्री;
अङ्कयन्-न्ती, अङ्कयिष्यन्-न्ती-ती;
अङ्कमानः, अङ्कयमानः, अञ्चिकिषमाणः;
अङ्किष्यमाणः, अङ्कयिष्यमाणः, अञ्चिकिषिष्यमाणः;
अन्[5]-अङ्कौ-अङ्कः;
अङ्कितः-[B] तं, अङ्कितः- तम्-तवान्, अञ्चिकिषितः - तवान्;
अङ्कः, अङ्कः, अञ्चिकिषुः, अञ्चिकयिषुः;
अङ्कितव्यम्, अङ्कयितव्यम्, अञ्चिकिषितव्यम्;
अङ्कनीयम्, अङ्कनीयम्, अञ्चिकिषणीयम्;
अङ्क्यम्, अङ्क्यम्, अञ्चिकिष्यम्;
ईषदङ्कः-दुरङ्कः-स्वङ्कः;
[6]अङ्क्यमानः, अङ्क्यमानः, अञ्चिकिष्यमाणः;

---

1. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः।
2. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इत्युपधाया दीर्घविकल्पः।
3. 'इदितो नुम् धातोः' (7-1-58) इति नुम्।
4. 'न न्द्राः संयोगादयः' (6-1-3) इति नकारस्य द्वित्वनिषेधः। 'कुहोश्चुः' (7-4-62) इत्यभ्यासस्य चकारः॥
5. 'संयोगान्तस्य लोपः' (8-2-23)।
6. इदित्त्वात् 'अनिदितां' (6-4-24) इति नलोपो न।

B. 'फलाङ्कितान् वङ्कितवल्लिमङ्कितान् वनप्रदेशान् उरुकाककोकिलान्' धा-का. 1-13.

अङ्कः, पर्यङ्कः-[1] पल्यङ्कः, अङ्कः, अञ्चिकिषः;
अङ्कितुम्, अङ्कयितुम्, अञ्चिकिषितुम्;
अङ्का[2], अङ्कना, अञ्चिकिषा, अञ्चिकयिषा;
अङ्कनम्, [3]प्राङ्कनम् } अङ्कनम्, अञ्चिकिषणम्;
अङ्कित्वा, अङ्कयित्वा, अञ्चिकिषित्वा;
समङ्क्य, समङ्कय्य, समञ्चिकिष्य;
अङ्कमङ्कम् २ अङ्कित्वा २, } अङ्कम् २, अङ्कयित्वा २, } अञ्चिकिषम्; २ अञ्चिकिषित्वा; २ } अङ्कुरः[4];

(3) **" अक्षू व्याप्तौ "** (भ्वादिः-I-654. सक- वेट्- पर-)

'संघाते च' इति क्षीरस्वामी।

अक्षकः- क्षिका, अक्षकः-क्षिका, अचिक्षिषकः-षिका;
[5]अक्षिता - त्री, अष्टा - ष्ट्री, } अक्षयिता - त्री, अचिक्षिषिता - त्री;
अक्षन् - न्ती, अक्षयन् - न्ती, अचिक्षिषन् - न्ती;
[6]अक्ष्णुवन् - वती,
अक्षिष्यन्-अक्ष्यन्-ती-न्ती, अक्षयिष्यन् ती-न्ती, अचिक्षिषिष्यन्-[ती-न्ती;
अक्षयमाणः, अक्षयिष्यमाणः;
अट्[7]-अक्षौ-अक्षः, अक्[8] अक्षौ-अक्षः,
[9]अष्टः-ष्टम् - ष्टवान्, अक्षितः, अचिक्षिषितम्-तः-तवान्;

---

1. 'परेश्च घाङ्कयोः' (8-2-22) इति लत्वं वा। मञ्च इत्यर्थः।
2. 'गुरोश्च हलः' (3-3-103) इति स्त्रियां अकारप्रत्ययः।
3. 'इजादेस्सनुमः' (8-4-32) इति नियमात् णत्वं न।
4. औणादिक उरच्।
5. 'स्वरतिसूति—' (7-2-44) इतीड्विकल्पः।
6. 'अक्षोऽन्यतरस्याम्' (3-1-75) इति वा श्नुः। उवङ्।
7. 'स्कोः—' (8-2-29) इति कलोपः।
8. 'संयोगान्तस्य लोपः' (8-2-23)।
9. ऊदित्त्वात्, 'यस्य विभाषा' (7-2-15) इतीण्णिषेधः। ककारलोपः।

अक्षः, अक्षः,	[1]काष्ठाक्षः (ज्वलनः), अचिक्षिषुः, अचिक्षयिषुः;	
अक्षितव्यम् / अष्टव्यम्	अक्षयितव्यम्,	अचिक्षिषितव्यम्;
अक्षणीयम्,	अक्षणीयम्,	अचिक्षिषणीयम्;
अक्ष्यम्,	अक्ष्यम्,	अचिक्षिष्यम्;
ईषदक्षः-दुरक्षः-स्वक्षः;		
अक्ष्यमाणः,	अक्ष्यमाणः,	अचिक्षिष्यमाणः;
अक्षः,	अक्षः,	अचिक्षिषः;
अक्षितुम् - / अष्टुम्,	अक्षयितुम्,	अचिक्षिषितुम्;
अष्टिः,	अक्षणा, अचिक्षिषा,	अचिक्षयिषा;
अक्षणम्,	अक्षणम्,	अचिक्षिषणम्;
अक्षित्वा, अष्ट्वा,	अक्षयित्वा,	अचिक्षिषित्वा;
समक्ष्य,	समक्ष्य,	समचिक्षिष्य;
अक्षम् २, / अक्षित्वा २, / अष्ट्वा २	अक्षम् २, / अक्षयित्वा २,	अचिक्षिषम् २, / अचिक्षिषित्वा २, / अक्षि[2]॥

(4) **"अग कुटिलायां गतौ"** (भ्वादिः-I-793-सक. से. पर.) **घटादिः।**

आगकः-गिका, अगकः-गिका, अजिगिषकः-षिका; इत्यादि सर्वं **अक** (1.) धातुवत् बोद्धव्यम्।

(5) **"अगि गतौ"** (भ्वादिः-I-146-सक. से. पर.)

अङ्गन्-न्ती, अङ्गिष्यन्-न्ती-ती, अङ्गयन्-न्ती, अङ्गयिष्यन्-न्ती-ती; अजिगिषन्-न्ती इत्यादिरूपाणि विना, अवशिष्टानि **अकि**(2.) धातुवत् बोद्धव्यानि।

अस्य धातोरौणादिके निप्रत्यये नलोपे (अङ्गति=ज्वालारूपेणोर्ध्वं गच्छति इत्यर्थे) अग्निः॥

---

1. 'कर्मण्यण्' (3-2-1) इत्यण्। 2. औणादिक इन् प्रत्ययः।

संज्ञायां घः = अङ्गम्। प्रशस्तानि अङ्गानि यस्याः सा = **अङ्गना।** 'अङ्गात् कल्याणे' (ग. सू.,-5-2-100) इति पामादित्वात् नः प्रत्ययः। 'विलङ्घदेणं शबराङ्गनाजनप्रवङ्कितं मङ्गलधेनुतङ्गितम्' धा-का. 1-20.

(6) **'अघि गत्याक्षेपे'** (भ्वादिः-I-109-सक. सेट्-आ.)

गत्याक्षेपो = निन्दा (गतौ-गत्यारम्भे च)।

अङ्घकः - ङ्घिका, अञ्जिघिषकः-षिका, इत्यादिरूपाणि 'अकि लक्षणे' (2.) इति धातुवद् बोध्यानि। अङ्घितम्=भावे क्तः - 'अरङ्घि कोलैर्लघु तद्रथस्वनात् प्रबुद्धच सिंहैः पुनरङ्घितं सदा' धा. का-1-15.

(7) **'अङ्क पदे लक्षणे च'** (X-1927-चुरादिः सक. सेट्-उभ-) **अदन्तः।**

'अङ्क लक्षण इत्यस्य भवेदङ्कयतीति णौ' (श्लो 41) इति **देवः।**

[1]अङ्ककः - ङ्किका,	अञ्चिकयिषकः - षिका;
अङ्कयिता - त्री,	अञ्चिकयिषिता - त्री;
अङ्कयन् - न्ती,	अञ्चिकयिषन् - न्ती;
अङ्कयिष्यन्-न्ती-ती,	अञ्चिकयिषिष्यन् - ती-न्ती;
अङ्कयमानः,	अञ्चिकयिषमाणः;
अङ्कयिष्यमाणः,	अञ्चिकयिषिष्यमाणः;
अन् - अङ्कौ - अङ्कः;	
अङ्कितम् - तः - तवान्,	अञ्चिकयिषित :- तवान्;
अङ्क :,	अञ्चिकयिषुः;
अङ्कयितव्यम्,	अञ्चिकयिषितव्यम्;
अङ्कनीयम्,	अञ्चिकयिषणीयम्;
अङ्क्यम्,	अञ्चिकयिष्यम्;
ईषदङ्कः-दुरङ्कः-स्वङ्कः;	
अङ्क्यमानः,	अञ्चिकयिष्यमाणः;
अङ्कः,	अञ्चिकयिषः;
अङ्कयितुम्,	अञ्चिकयिषितुम्;
अङ्कना,	अञ्चिकयिषा;

अङ्कनम्,	अञ्चिकयिषणम्;
अङ्कयित्वा,	अञ्चिकयिषित्वा;
समङ्क्य,	समञ्चिकयिष्य;
अङ्कम् २, }	अञ्चिकयिषम् २ }
अङ्कयित्वा २, }	अञ्चिकयिषित्वा २ }

1. धातोर्नित्यणिजन्तत्वात् णिज्रहितादूपाणि न भवन्ति। अनेकाच्-त्वाद् यङन्तरूपाण्यपि न।

(8) 'अङ्क पदे लक्षणे च' (X-1928-चुरादिः-सक. सेट्- उभ-) अदन्तः।

पूर्वधातुवत् (7) सर्वाणि रूपाणि ज्ञेयानि।

(9) "अज गतिक्षेपणयोः" (भ्वादिः-I-230-सक. सेट्-पर-)

क्षेपणम्=प्रेरणम्।

[1]वायक :-यिका, वायकः-यिका विवीषकः- [2]अजिजिषकः-षिका, ; वेवीयक ;[1A]
वेता-त्री,[2]अजिता-त्री, वाययिता-त्री, विवीषिता-त्री,अजिजिषिता, वेवीयिता-त्री;
अजन्[A]- न्ती, वाययन् - न्ती, विवीषन् - न्ती, अजिजिषन्-न्ती ;
वेष्यन्-न्ती-ती , अजिष्यन् - ती - न्ती, वाययिष्यन् - ती-न्ती,
विवीषिष्यन् - ती - न्ती, अजिजिषिष्यन्-ती-न्ती ;
वाययमानः, वाययिष्यमाणः, वेवीयमानः, वेवीयिष्यमाणः ;
परिवीः-परिव्यौ-परिव्यः, समक्-समजौ-समजः ;
वीतः, अजितः-वायितम्-तः, विवीषितः, अजिजिषितः, वेवीयितः-तम्-तवान्,
अजः,[A] अजा,[3] आजिः,[4] पदाजिः,[4] विवीषुः, विवाययिषुः, अजिजिषुः,
आजिजयिषुः, वेवीय;

1. 'अजेर्व्यघञपोः' (2-4-56) इति वीभावः।
1. A. आर्धधातुकविवक्षायां वीभावात् हलादित्वात् यङ्।
2. 'वलादावार्धधातुके वेष्यते' (2-4-56 वा) इति वा वीभावः।
3. 'अजाद्यतष्टाप्' (4-1-4) इति टाप्
4. 'अज्यतिभ्याम्–पादे च' (4-131) इत्यौणादिकः इण् प्रत्ययः।
A. 'अकर्जितोऽसौ हरिखर्जनोत्कधीः **अजत्पशुव्रातमजेन** तेजितम्' धा-का-1-31.

वेतव्यम्-अजितव्यम्, वाययितव्यम्, विवीषितव्यम्, अजिजिषितव्यम्, वेवीयितव्यम्;

वयनीयम्, वायनीयम्, विवीषणीयम्, अजिजिषणीयम्, वेवीयनीयम्;
वेयम्, वाय्यम्, विवीष्यम्, अजिजिष्यम्, वेवीय्यम्;
ईषद्वयः, दुर्वयः, सुवयः;

वीयमानः, वाय्यमानः, विवीष्यमाणः, अजिजिष्यमाणः ; वेवीय्यमानः ;
[1]समजः, [1A] समाजः[B], उदाजः,-वायः, वात[C]मजा[2]:(मृगाः), व्यजः[3], व्याजः[D];
वेतुम्, अजितुम्, वाययितुम्, विवीषितुम्, अजिजिषितुम्, वेवीयितुम्;
वीतिः, अक्तिः,[4]समज्या, वायना, विवीषा, विवाययिषा, अजिजिषा, आजिजयिषा,
वेवीया ;

प्रवयणम्[5] - प्राजनम्, वायनम्, विवीषणम्, अजिजिषणम्, वेवीयनम्;
वीत्वा, अजित्वा, वाययित्वा, विवीषित्वा, अजिजिषित्वा, वेवीयित्वा;
प्रवीय, प्राज्य, प्रवाय्य, प्रविवीष्य, प्राजिजिष्य, प्रवेवीय्य;
वायम् २, वीत्वा २, अजित्वा २, वायम् २ वाययित्वा २, विवीषम् २,
विवीषित्वा २, अजिजिषम् २, अजिजिषित्वा २, वेवीयम् २, वेवीयित्वा २;
औणादिके = अजिनम्[6] - अजिरम्[7];

1. 'समुदोरजः पशुषु' (3-3-69) इत्यप्।
1-A 'अजिव्रज्योश्च' (7-3-60) इति कुत्वं न भवति। 'पशूनां **समजो**ऽन्येषां **समाजो**ऽथ सधर्मिणाम्' इति **अमरकोशः**।
2. 'वातशुनीतिलशर्धेषु अजधेट्जहातीनां' (वा. 3-2-28) इति खश्। मुम्। सार्वधातुकत्वान्न वीभावः।
3. 'गोचरसंचरवहव्रजव्यज-' (3-3-119) इति घान्तो निपातितः।
4. 'संज्ञायां समज-' (3-3-99) इति स्त्रियां क्यप्। निपातनात् वीभावो न।
5. 'वा यौ' (2-4-57) इति वीभावो वा।
6. अजिनम् =चर्म। अजति - वीयते वा तत्-कर्म, कर्ता वा। इन प्रत्ययः।
7. अजिरम् = वेश्म। अजन्त्यस्मिन् इत्यधिकरणे किर प्रत्ययः।
B. 'गुहाद्वारेण निर्यातः **समजेन** पशूनिव' **भट्टिकाव्ये** -7-59.
C. 'मेघात्ययोपात्तवनोपशोभं कदम्बकं **वातमजं** मृगाणाम्' भ-का-2-17.
D. 'नि**र्व्याज**मिज्या ववृते वचश्च भूयो बभाषे मुनिना कुमारः' भ-का-2-37.

(10) 'अजि भाषार्थः' (X - चुरादिः 1786-सक. सेट्. उभ.)

अञ्जकः - ञ्जिका, व्यञ्जकः, अञ्जिजयिषकः - षिका ;
अञ्जयिता - त्री, अञ्जिजयिषिता - त्री ;
अञ्जयन् - न्ती, अञ्जिजयिषन् - न्ती ;
अञ्जयिष्यन् - ती-न्ती, अञ्जिजयिषिष्यन् - ती - न्ती ;
अञ्जयमानः, अञ्जिजयिषमाणः ;
अञ्जयिष्यमाणः, अञ्जिजयिषिष्यमाणः ;
व्यन्-व्यञ्जौ - व्यञ्जः;
अञ्जितम् - तः-तवान्, अञ्जिजयिषितः - तवान् ;
व्यञ्जः, अञ्जिजयिषुः ;
अञ्जयितव्यम्, अञ्जिजयिषितव्यम् ;
व्यञ्जनीयम्, अञ्जिजयिषणीयम् ;
अञ्ज्यम्, अञ्जिजयिष्यम् ;
ईषदञ्जः, दुरञ्जः, स्वञ्जः ;
अञ्ज्यमानः, अञ्जिजयिष्यमाणः ;
अञ्जः, अञ्जिजयिषः;
अञ्जयितुम्, अञ्जिजयिषितुम् ;
अञ्जना - व्यञ्जना, अञ्जिजयिषा ;
व्यञ्जनम्, अञ्जिजयिषणम् ;
अञ्जयित्वा, अञ्जिजयिषित्वा ;
अभिव्यञ्ज्य, व्यञ्जिजयिष्य ;
व्यञ्जम् २, अञ्जयित्वा २, } अञ्जिजयिषम् २; अञ्जिजयिषित्वा २ ; }

(11) 'अट गतौ' (I-भ्वादिः-295 सक. सेट्. पर.)

आटकः - टिका, आटकः - टिका, अटिटिषकः - षिका, [1]अटाटकः-टिका ;
अटिता - त्री, आटयिता - त्री ; अटिटिषिता - त्री, अटाटिता-त्री ;

1. 'सूचिसूत्रि—' (वा. 3-1-22) इति यङ्। 'अटाटकः' इत्यत्र 'यस्य हलः' (6-4-49) इति यकारस्य लोपः 'अतो लोपः' (6-4-48) इत्यकारलोपः ।

अटन्-पर्यटन् - न्ती, आटयन् - न्ती ; अटिटिषन् - न्ती;
अटिष्यन् - ती - न्ती, आटयिष्यन् - ती-न्ती, अटिटिषिष्यन् - न्ती-ती ;
आटयमानः, आटयिष्यमाणः, अटाट्यमानः[A] ;
अट्, अटौ - अटः ;
अटितम्, आटितम्, अटिटिषितम् - तः - तवान्; अटाटितम् - तः तवान् ;
अटः,[B] [1]पर्याटी, [2]भिक्षाटः, [C]रात्रिमटः [3]रात्र्यटः, अटिटिषुः, आटिटयिषुः, [4]कुलटा, अटाटः, अटनः[V] ;

अटितव्यम्, आटयितव्यम्, अटिटिषितव्यम्, अटाटितव्यम् ;
अटनीयम्, आटनीयम्, अटिटिषणीयम्, अटाटनीयम् ;
आट्यम्, आट्यम्, अटिटिष्यम्, अटाट्यम् ;
ईषदटः-दुरटः-स्वटः ;
अट्यमानः, आट्यमानः, अटिटिष्यमाणः, अटाट्यमानः ;
आटः, आटः, अटिटिषः, अटाटः;
अटितुम्, आटयितुम्, अटिटिषितुम्, अटाटितुम् ;
अट्टिः, अटा, आटना, पर्याटना, अटाटा[5], अटिटिषा, आटिटयिषा, अटा[5]ट्या ;
पर्यटनम्, आटनम्, अटिटिषणम्, अटाटनम् ;
अटित्वा, आटयित्वा, अटिटिषित्वा, अटाटित्वा ;
पर्यट्य, समाट्य, समटिटिष्य, समटाट्य ;

1. 'सुप्यजातौ णिनिस्ताच्छील्ये' इति (3-2-78) णिनिः ।
2. 'कर्मण्यण्' (3-2-1) इति अण् ।
3. 'रात्रेः कृति विभाषा' (6-3-72) इति मुम् वा ।
4. शकन्ध्वादित्वात् (वा. 1-1-64) पररूपम् ।
5. 'परिसर्यापरिचर्यामृगयाटाट्या - नामुपसंख्यानम्' वा (3-3-101) इति शे यकिटयशब्दस्य द्वित्वम्, पूर्वभागे यकारनिवृत्तिर्दीर्घश्च निपात्यते । केवलं गमनमात्रमर्थः ।

A. '**अटाट्यमानो**ऽरण्यानि ससीतः सहलक्ष्मणः' भ-का. 4-2

B. 'अम्लेटकैः चाकटुचाटुभाषितै**रटैः** पटत्संरटिताञ्जनोत्करैः' धा. का. 1-39. 5.

C. 'नारायणे **रात्रिमटाङ्**गनानामसातये तत्र जनिष्यमाणे' **वासुदेवविजयकाव्ये** 3.1.

V. नन्द्यादेराकृतिगणत्वाल्ल्युः ।

आटम् २, अटित्वा २, } आटम् २, आटयित्वा २, } अटिटिषम् २, अटिटिषित्वा २, } अटाटम् २ ; अटाटित्वा २; } .

अटविः[R], अटवी ;

(12) अट्ट[A] अतिक्रमहिंसनयोः (I-भ्वादिः-254. सक-सेट्. आ.)

अट्टकः-ट्टिका, अट्टकः-ट्टिका, [1]अटिट्टिषकः, अट्टिटिषकः-षिका ;

अट्टिता-त्री, अट्टयिता-त्री, अटिट्टिषिता-त्री, अट्टिटिषिता-त्री ;

अट्टयन्-न्ती, अट्टयिष्यन्-ती-ती ;

अट्टमानः, अट्टयमानः, अटिट्टिषमाणः, अट्टिटिषमाणः ;

अट्टिष्यमाणः, अट्टयिष्यमाणः, अटिट्टिषिष्यमाणः, अट्टिटिषिष्यमाणः ;

अट्, अट्टौ-अट्टः, [B]मार्गात् ;

अट्टितम्-तः-तवान्, अट्टितः, अटिट्टिषितम्, अट्टिटिषितम्-तः-तवान् ;

अट्टः, अट्टः, अटिट्टिषुः, अट्टिटिषुः ;

अट्टितव्यम्, अट्टयितव्यम्, अटिट्टिषितव्यम्, अट्टिटिषितव्यम् ;

अट्टनीयम्, अट्टनीयम्, अटिट्टिषणीयम्, अट्टिटिषणीयम्;

अट्टयम्, अट्टयम्, अटिट्टिष्यम्, अट्टिटिष्यम् ;

ईषटट्टः, दुरट्टः, स्वट्टः ;

अट्टयमानः, अट्टयमानः, अटिट्टिष्यमाणः, अट्टिटिष्यमाणः ;

अट्टः, अट्टः, अटिट्टिषः, अट्टिटिषः ;

अट्टितुम्, अट्टयितुम्, अटिट्टिषितुम्, अट्टिटिषितुम् ;

अट्टा[2], अट्टना, अटिट्टिषा, अट्टिटिषा ;

R. औणादिकौ शब्दौ ।

1 धातुरयं तोपधः दोपध इति मतद्वयम् । तोपधत्वे - अटिट्टिषकः इत्यादि, दोपधत्वे अट्टिटिषक इत्यादि च रूपाणीति ज्ञेयम् । टोपधोऽपि कल्पद्रुमे—तत्पक्षे क्विपि **अट्** इति ।

2. 'गुरोश्च हलः' (3-3-103) इत्यः प्रत्ययः ।

A. 'हिंसातिक्रमयोरट्टेरट्टतेऽनादरेऽट्टयेत् ।' (श्लो 72) इति **देवः** । **अतिक्रमः** = उल्लङ्घनम् ।

B. '**मार्गात्** स दृष्ट्वा हरिपादलाञ्छनं व्यवेष्टनोर्व्यां महनीयचेष्टितः। तत्केलिसंघोष्टितलोष्टमानमद्वने मरुद्घट्टितपोस्फुटद्रुमे ॥'

धा. का 1-34. तोपधे दोपधे वा क्विपि रूपम् ।

अट्टनम्, अट्टनम्, अटिट्टिषणम्, अट्टिटिषणम् ;

अट्टित्वा, अट्टयित्वा, अटिट्टिषित्वा, अट्टिटिषित्वा ;

समट्टय, समट्टय, समटिट्टिष्य, समट्टिटिष्य ;

अट्टम् 2 अट्टित्वा 2 } अट्टम् 2 अट्टयित्वा } अटिट्टिषम् 2 अटिट्टिषित्वा 2 } अट्टिटिषम् 2 अट्टिटिषित्वा 2 };

(13) '**अट्ट अनादरे**' (X - चुरादिः- 1561 अक-सेट्-उभयपदी ।)

'**हिंसातिक्रमयोरट्टेरट्टतेऽनादरेऽट्टयेत्**' (श्लो 72) इति **देवः** ।

अट्टकः-ट्टिका, [A] अट्टिटयिषकः-षिका ;

अट्टयिता-त्री, अट्टिटयिषिता-त्री ;

अट्टयन्-न्ती, अट्टिटयिषन्-न्ती ;

अट्टयिष्यन्-न्ती-ती, अट्टिटयिषिष्यन्-न्ती-ती ;

अट्टयमानः, अट्टिटयिषमाणः ;

अट्टयिष्यमाणः, अट्टिटयिषिष्यमाणः ;

अत्[1], अद्, अट्टौ-अट्टः,

अट्टितम्-तः-तवान्, अट्टिटयिषितम्-तः-तवान् ;

अट्टः, अट्टिटयिषुः ;

अट्टयितव्यम्, अट्टिटयिषितव्यम् ;

अट्टनीयम्, अट्टिटयिषणीयम् ;

अट्टयम्, अट्टिटयिष्यम् ;

ईषदट्टः, दुरट्टः, स्वट्टः ;

अट्टयमानः, अट्टिटयिष्यमाणः ;

अट्टयितुम्, अट्टिटयिषितुम् ;

अट्टना, अट्टिटयिषा ;

अट्टनम्, अट्टिटयिषणम् ;

अट्टयित्वा, अट्टिटयिषित्वा ;

समट्टय, समट्टिटयिष्य ;

1अयं दोपधः । तत्पक्षे टकारस्य संयोगान्तलोपे 'वाऽवसाने' (8-4-56) इति चर्त्वे रूपद्वयम् ।

A. अस्य चुरादित्वात् शुद्धधातो रूपाणि, अजादित्वाद्यङन्तरूपाणि च न भवन्ति ।

अट्टम् २, } अट्टिटयिषम् २ ;
अट्टयित्वा २, } अट्टिटयिषित्वा २ ;

(14) **‘अठि गतौ’** (I-भ्वादिः-261-सक. से- आ.)

‘अकि लक्षणे’ (2.) इति धातुवद्रूपाणि ज्ञेयानि ।

क्विपि अन्-इति रूपम् । संयोगान्तलोपः । न+अन्=A**अनन्** ।

(15) **‘अड उद्यमने’** (I-भ्वादिः - 358-सक. से. पर.)

शतरि अडन्B। अडतीत्यडः=वृश्चिकलाङ्गूलः । विशिष्टोऽडः=व्यडः। तस्यापत्यमत इञ् व्याडिः आचार्यः। संग्रहनामकस्य लक्षग्रन्थपरिमितस्य व्याकरण-शास्त्रस्य कर्ता पाणिनेर्भागिनेयः । स्वागतादित्वात् आदिवृद्धिप्रतिषेधः । इति मा. धा. वृत्तिः । अन्यानि सर्वाणि रूपाणि ‘अट गतौ’ (11) इतिवत् बोध्यानि ।

(16) **“अड्डु अभियोगे”** (I-भ्वादिः-348-सक. से - पर.)

अभियोगः=समाधानम् । **अयं दोपधः** ।

अड्डकः-ड्डिका, अड्डकः-ड्डिका, [1]अड्डिडिषकः-षिका ;
अड्डिता-त्री, अड्डयिता-त्री, अड्डिडिषिता-त्री ;
अड्डन्-न्ती, अड्डयन्-न्ती, अड्डिडिषन्-न्ती ;
अड्डिष्यन्-न्ती-ती, अड्डयिष्यन्-न्ती-न्ती, अड्डिडिषिष्यन्-ती-न्ती ;
अड्डयमानः, अड्डयिष्यमाणः ;
अद्ङ्,[2] अत् - अद्[A] - अड्डौ - अड्डः ;
अड्डितम् - तः-तवान् , अड्डितः, अड्डिडिषितम्-तः-तवान् ;
अड्डः, अड्डः, अड्डिडिषुः, अड्डिडयिषुः ;

A. ‘**अनन्** कुमार्गेषु शुभाध्वनैव वन् प्रमन भृशोत्कण्ठितगोपिके हरौ ।’ धा. का. 1.35

B ‘प्ररोडकानङ्गविलोलितैर्वृतान् रतावडद्भिः ललनाजनैः खलैः ।’ धा. का. 1.46.

1. ‘न न्द्राः संयोगादयः’ (6-1-3) इति दकारस्य द्वित्वनिषेधः ।
2. डोपधपक्षे एवं रूपम् ।

A. ‘प्ररुण्ठिताघैरनुलुण्ठकैर्हरेः प्रचुड्डबोधाद्भिः अतीव शोभितान्’ धा. का. 1-45.

अड्डितव्यम् ,	अड्डयितव्यम् ,	अड्डिडिषितव्यम् ;
अड्डनीयम् ,	अड्डनीयम् ,	अड्डिडिषणीयम् ;
अड्ड्यम् ,	अड्ड्यम् ,	अड्डिडिष्यम् ;
ईषदड्डः-दुरड्डः,	स्वड्डः;	
अड्ड्यमानः,	अड्ड्यमानः,	अड्डिडिष्यमाणः ;
अड्डः,	अड्डः,	अड्डिडिषः ;
अड्डा,	अड्डना,	अड्डिडिषा, अड्डिडयिषा ;
अड्डितुम् ,	अड्डयितुम् ,	अड्डिडिषितुम् ;
अड्डनम् ,	अड्डनम् ,	अड्डिडिषणम् ;
अड्डित्वा,	अड्डयित्वा,	अड्डिडिषित्वा ;
प्राड्ड्य,	समड्ड्य,	समड्डिडिष्य ;

अड्डम् २, } अड्डम् २, } अड्डिडिषम् २ ;
अड्डित्वा २, } अड्डयित्वा २, } अड्डिडिषित्वा २ ;

(17) **“अण शब्दार्थः”** (I-भ्वादिः 444-अक. से-पर.)

‘अणेरणति शब्दार्थे, प्राणते त्वण्यते श्यनि ।’ (92) इति **देवः** ।

आणकः-णिका, आणकः-णिका, अणिणिषकः-षिका ;
अणिता-त्री, आणयिता-त्री, अणिणिषिता, त्री ;
अणन्[A]-न्ती, आणयन्-न्ती, अणिणिषन्-न्ती ;
अणिष्यन्-ती-न्ती, आणयिष्यन्-ती-न्ती, अणिणिषिष्यन्-ती-न्ती ;
आणयमानः, आणयिष्यमाणः ;
आण्[1] आणौ-आणः ;
अणितम्-तः-तवान् , आणितम् तः-तवान् , अणिणिषितम्-तः-तवान् ;
अणः, प्राणः, आनः ध्वाङ्क्षाणी,[2] अणिणिषुः, आणिणयिषुः ;

---

1 ‘अनुनासिकस्य क्विझलोः क्ङिति’ (6-4-15) इति दीर्घः ।

2 ‘कर्तर्युपमाने’ (3-2-79) इति णिनिः ।

A ‘**अण**द्दिशः केलिरणैर्मनोज्ञया वाण्या भणन्तो मणिभूषणोत्कणाः । वनात् कुमाराः क्वणिताग्रचवेणवो व्रणद्विषाणभ्रणिताभ्रमाययुः ॥ धा.का. 1-58.

अणितव्यम्, आणयितव्यम्, अणिणिषितव्यम्;
अणनीयम, आणनीयम्, अणिणिषणीयम;
आण्यम्, आण्यम्, अणिणिष्यम;
ईषदणः - दुरणः - स्वणः;
अण्यमानः, आण्यमानः, अणिणिष्यमाणः;
आणः, आणः, अणिणिषः;
अणितुम्, आणयितुम्, अणिणिषितुम्;
[1]आण्टिः, आणना, अणिणिषा, आणिणयिषा;
अणनम्, आणनम्, अणिणिषणम्;
अणित्वा, आणयित्वा, अणिणिषित्वा;
प्राण्य, प्राण्य, समणिणिष्य;
आणम् 2, अणित्वा 2 } आणम् 2, आणयित्वा 2, } अणिणिषम् 2, अणिणिषित्वा 2 };

(18) "अण प्राणने" (IV. दिवादिः-1175 अक. से. आ.)

[A]'अणेरणति शब्दार्थे प्राणते त्वण्यते श्यनि' (श्लो 92) इति **देवः**।

आ[2]णकः-णिका, आणकः-णिका, अणिणिषकः-षिका;
अणिता-त्री, आणयिता-त्री, अणिणिषिता-त्री;
आणयन्-न्ती, आणयिष्यन्-न्ती-ती;
अण्य[3]मानः, आणयमानः, अणिणिषमाणः;
अणिष्यमाणः आणयिष्यमाणः, अणिणिषिष्यमाणः;
[4]प्राण्-प्राणौ-प्राणः;
अणितः-तम् तवान्, आणितः, अणिणिषितम्-तः-तवान्;
अणः, आणः, अणिणिषुः, आणिणयिषुः;

1'अनुनासिकस्य–' (6-4-15) इति दीर्घः। छुत्वम्।

2. 'अत उपधायाः' (7-2-116) इति वृद्धिः।

3. दिवादित्वात् श्यन्।

4. 'अनुनासिकस्य—' (6-4-15) इति उपधायाः दीर्घः।

A. 'अन' इति नकारान्तः, तवर्गीयान्तेषु पाठात्—इति **शाकटायनः**

अणितव्यम्, आणयितव्यम्, अणिणिषितव्यम्;
अणनीयम्, आणनीयम्, अणिणिषणीयम्;
आण्यम्, आण्यम्, अणिणिष्यम्;
ईषदणः, दुरणः, स्वणः; ईषदाणः, दुराणः, स्वाणः;
अण्यमानः, आण्यमानः, अणिणिष्यमाणः;
आणः, आणः, अणिणिषः;
अणितुम, आणयितुम्, अणिणिषितुम्;
आ[1]ण्टिः, आणना, अणिणिषा, आणिणयिषा;
अणनम्[A], आणनम्, अणिणिषणम्;
अणित्वा, आणयित्वा, अणिणिषित्वा;
प्राण्य, प्राण्य, प्राणिणिष्य;
आणम् २, अणित्वा २, } आणम् २, आणयित्वा २, } अणिणिषम् २; अणिणिषित्वा २; }

(19) "अत सातत्यगमने" (I-भ्वादिः-38-सक. से. पर.)

'बन्धनेऽन्तति, सातत्यगमनेऽतति, चिन्तयेत्।' (श्लो. 94) इति **देवः**।

सातत्यगमनम्=सन्ततगमनम्।

आतकः-तिका, आतकः-तिका, अतितिषकः-षिका;
अतिता-त्री, आतयिता-त्री, अतितिषिता-त्री;
(अ) अतन्-न्ती, आतयन्-न्ती, अतितिषन्-न्ती;
अतिष्यन्-न्ती-ती, आतयिष्यन्-ती-न्ती, अतितिषिष्यन्-न्ती-ती;
आतयमानः, आतयिष्यमाणः;
अत्-अतौ-अतः, मागात्;
(आ) अतितम्-तः-तवान्, आतितः, अतितिषितम्-तः-तवान्;

---

1. 'अनुनासिकस्य—' (6-4-15) इति उपधादीर्घः। छुत्वम्।

अ. 'ग्रामं ग्रामाय वा अतन्-' इत्यत्र 'गत्यर्थकर्मणि—'(2-3-12.) इत्यनेन द्वितीयाचतुर्थ्यौ भवतः।

आ. 'अतितो ग्रामम्, अतितो ग्रामः, अतितं देवदत्तेन, इदमेषामतितम्।' इत्यादौ 'गत्यर्थाकर्मक—' (3-4-72) इति, 'क्तोऽधिकरणे च ध्रौव्यगति–' (3-4-76) इति च क्रमेण कर्तृ-कर्म-भाव-अधिकरणेषु क्तः प्रत्ययः।

A. 'कंसानुरोध्यणनहृन्मतिमद्युगर्च्यः शेषं व्यसृज्यत पटौघमलिश्यमानम्' (धा. का. 2-62)

अतः[A], पदातिः[1], मार्गातः, आतः, अतितिषुः, आतितयिषुः ;

अतितव्यम्, आतयितव्यम्, अतितिषितव्यम् ;

अतनीयम्, आतनीयम्, अतितिषणीयम् ;

आत्यम्, आत्यम्, अतितिष्यम् ;

ईषदतः, दुरतः, स्वतः; ईषदातः, दुरातः, स्वातः ;

अत्यमानः, आत्यमानः, अतितिष्यमाणः ;

आतः, आतः, अतितिषः ;

अतितुम्, आतयितुम्, अतितिषितुम् ;

अत्तिः, आतना, अतितिषा, आतितयिषा ;

अतनम्, आतनम्, अतितिषणम् ;

अतित्वा, आतयित्वा, अतितिषित्वा ;

समत्य, समात्य, समतितिष्य ;

आतम् २, अतित्वा २, } आतम् २, आतयित्वा २, } अतितिषम् २ ; अतितिषित्वा २ ; }

[2]अतिथिः, आत्मा[3] ॥

(20) " अति बन्धने " (I-भ्वादिः-61-सक. सेट्. पर.)

' बन्धनेऽन्तति, सातत्यगमनेऽतति, चिन्तयेत् ।' (श्लो 94) इति देवः ।

अन्तB[B]कः-न्तिका, अन्तकः-न्तिका, अन्ति[4]तिषकः-षिका ;

अन्तिता-त्री, अन्तयिता-त्री, अन्तितिषिता-त्री ;

अन्तन्-न्ती, अन्तयन्-न्ती, अन्तितिषन्-न्ती ;

अन्तिष्यन्-ती-न्ती, अन्तयिष्यन्-ती-न्ती, अन्तितिषिष्यन्-ती-न्ती ;

A. "अभियाऽतावरं तुङ्गं भूभृतं रुचिरं पुरः। कर्कशं प्रस्थितं धाम ससत्त्वं पुष्करेक्षणम् ।' भ. का. 10-21. अतस्यावरः । पचाद्यच्

1. 'पादस्य पदाज्याति—'(6-3-52) इति पद्भावः। औणादिक इण् प्रत्ययः।

2. दशपाद्युणादिवृत्तौ 1-44. इथिन् प्रत्ययः।

3. मनिण् प्रत्ययः 6-81. द-उ.

4. 'न न्द्राः संयोगादयः' (6-1-3) इति नकारस्य द्वित्वनिषेधः।

B. 'अतर्दकास्त्वद्य विकर्दमाशयाः प्रखर्दवृत्तैरसमन्तितान्तिकाः । श्रुतान्दुकैश्चित्तगजेन्द्ररोधिनस्तुष्यन्तु सन्तो गुणबिन्दुलोलुपाः ॥ ' (धा. का. 1-9.)

अन्तयमानः, अन्तयिष्यमाणः ;

अन्[1], अन्तौ, अन्तः ;

अन्तितम्-तः-तवान्, अन्तितः, अन्तितिषितम्-तः-तवान् ;

अन्तः, सम[2]न्ती, अन्तितिषुः, अन्तितयिषुः ;

अन्तितव्यम्, अन्तयितव्यम्, अन्तितिषितव्यम् ;

अन्तनीयम्, अन्तनीयम्, अन्तितिषणीयम् ;

अन्त्यम्, अन्त्यम्, अन्तितिष्यम् ;

ईषदन्तः, दुरन्तः, स्वन्तः ;

अ[3]न्त्यमानः, अन्त्यमानः, अन्तितिष्यमाणः ;

अन्तः, अन्तः, अन्तितिषः ;

अन्तितुम्, अन्तयितुम्, अन्तितिषितुम् ;

अ[4]न्ता, अन्तना, अन्तितिषा, अन्तितयिषा ;

अन्तनम्, अन्तनम्, अन्तितिषणम् ;

अन्तित्वा, अन्तयित्वा, अन्तितिषित्वा ;

समन्त्य, समन्त्य, समन्तितिष्य ;

अन्तम् २, अन्तित्वा २, } अन्तम् २, अन्तयित्वा २, } अन्तितिषम् २ ; अन्तितिषित्वा २ }

(21) " अद भक्षणे " (II-अदादिः-1011-सक-अनि. पर.)

आदकः-दिका, आदकः-दिका, [5]जिघत्सकः-त्सिका ;

[6]अत्ता-त्री, आदयिता-त्री, जिघत्सिता, त्री ;

[A]अदन्-ती, आदयन्-न्ती, जिघत्सन्-न्ती ;

अत्स्यन्-ती-न्ती, आदयिष्यन्-ती-न्ती, जिघत्सिष्यन्-ती-न्ती;

---

1. 'संयोगान्तस्य लोपः' (8-2-23) इति तकारस्य लोपः।

2. 'सुप्यजातौ णिनिः'—(3-2-78) इति णिनिः।

3. इदित्त्वात् 'अनिदितां—' (6-4-24) इति नलोपो न।

4. 'गुरोश्च हलः' (3-3-103) इत्यप्रत्ययः।

5. 'लुङ्सनोर्घस्लृ' (2-4-37) इति घस्लृ। 'सस्स्यार्धधातुके' (7-4-49) इति सकारस्य तकारः।

6. 'एकाच उपदेशे-' (7-2-10) इतीण्णिषेधः।

A. 'अदन् मधुघ्नो द्विषते विसृज्य श्ववल्कजं विश्वमुदं दुहानः' धा. का. 2. 44.

आ[1]दयमानः, आदयिष्यमाणः;

सस्या[2]त्, आमात्, क्रव्यात्[B] [3], क्रव्या[4]दः, प्रा[C]णात्, आमिषा[D]दः;

[5]जग्धम्-ग्धः-ग्धवान्,
[6]अन्नम्-न्नवान्; } आदितम्-तः, जिघत्सितम्-तः-तवान्,

[7]घसः, अन्ना[8]दी, पुत्रादिनी, आदिवान्, जक्षि[9]वान्, अद्[10]मरः, जिघत्[E]सुः,

अत्तव्यम्, आदयितव्यम्, जिघत्सितव्यम्;

अदनीयम्, आदनीयम्, जिघत्सनीयम्;

आद्यम्, आद्यम्, जिघत्स्यम्;

ईषददः-दुरदः-स्वदः;

अद्यमानः, आद्यमानः, जिघत्स्यमानः;

[11]घासः, घसः, [12]न्यादः[F], निघसः, आदः, [G]संघसः[13], प्रघसः, जिघत्सः;

[14]अत्तुम्-आदको (वा याति), आदयितुम्, जिघत्सितुम्;

---

1. 'अदेः प्रतिषेधः' (वा-1-3-87) इति अस्य भक्षणार्थत्वेऽपि आत्मनेपदित्वमेव।
2. 'अदोऽनन्ने' (3-2-68) इति विट्।
3. 'क्रव्ये च' (3-2-69) इति विट्।
4. 'वाऽसरूपो–' (3-1-94) इति न्यायेनाणपि।
5. 'अदो जग्धिर्ल्यप् ति किति' (2-4-36) इति जग्ध्यादेशः।
6. 'बहुलं तणि, अन्नवधक–' (2-4-54) इति वार्तिकात् प्रयोगोऽयमपि साधुः। '**अन्नाण्णः**' (4-4-85) इति निर्देशाच्च।
7. 'अच्युपसंख्यानम्-' (वा. 2-4-37) इति घस्लृ।
8. 'सुप्यजातौ–' (3-2-78) इति णिनिः।
9. 'लिट्यन्यतरस्याम्' (2-4-40) इति घस्लृ विकल्पेन। 'वस्वेकाज्–' (7-2-67) इति इट्।
10. 'सृघस्यदः क्मरच्' (3-2-160) इति तच्छीलादिषु कर्तृषु क्मरच् प्रत्ययः।
11. 'घञपोश्च' (2-4-38) इति घस्लृ।
12. 'नौ ण च' (3-3-60) इति वा अप्।
13. 'उपसर्गेऽदः' (3-3-59) इत्यप्।
14. 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (3-3-10) इति तुमुण्वुलौ।

B. 'व्याप्तं गुहाशयैः क्रूरैः **क्रव्याद्भिस्स** निशाचरैः' भ. का. 6-94.
C. 'वालितो दूरभाग् रामः बाणं **प्राणाद**मत्यजत्' भ. का. 6.123.
D. 'तव विदितविषादो दृष्टकृत्स्ना**मिषादः**' भ. का. 10-17.
E. '**जिघत्सोः** नूनमापादि ध्वंसोऽयं तां निशाचरात्' भ-का 6-31.
F. 'व्याप्नुवन्तो दिशोऽ**न्यादान्** कुर्वन्तस्सव्यधान् हरीन्' भ. का. 7-56. अविद्यमानः न्यादः=आहारः येषां तान् इत्यर्थः।
G. 'आदरेण गमं चक्रुर्विषमेष्वप्य**संघसाः**' भ. का. 7-56.

अदनम्, आदनम्, जिघत्सनम्;

जग्धिः, आदना, जिघत्सा, जिघत्सयिषा;

जग्ध्वा, आदयित्वा, जिघत्सित्वा;

प्रजग्ध्य, समाद्य, प्रजिघत्स्य;

आदम् २, } आदम् २, } जिघत्सम् २; }
जग्ध्वा २, } आदयित्वा २, } जिघत्सित्वा २ }

[1]अत्त्रिः, [2]अद्रिः;

(22) '**अदि बन्धने**' (I-भ्वादिः-62-सक. से. पर-)

धातोरस्य पूर्वलिखितान्ततिवत् (20) सर्वाणि रूपाणि बोध्यानि।

(23) "**अन प्राणने**" (II-अदादिः-1070-अक. से. पर.)

प्रपूर्वकोऽयं प्रायेण।

आनकः-निका, आनकः-निका, अनिनिषकः-षिका;

अनिता-त्री, आनयिता-त्री, अनिनिषिता-त्री;

अनन्-ती,
[3]प्राणन्[A], } आनयन्-न्ती,
प्राणयन्[B] } अनिनिषन्-न्ती;

प्राणिष्यन्-ती-न्ती, प्राणयिष्यन्-ती-न्ती, [4]प्राणिणिषिष्यन्-न्ती-ती;

प्राणयमानः, प्राणयिष्यमाणः;

हे [5]प्राण्; प्रा-[6]प्राणौ-प्राणः;

प्राणितम्-तः-तवान्; आनितम्-तः, अनिनिषितम्-तः-तवान्;

---

1. औणादिकः त्रिन् प्रत्ययः (द. उ. 1.37.)। ऋषिः।
2. औणादिकः (द. उ. 1-34.) क्रिन् प्रत्ययः।
3. 'अनितेः' (8-4-19) इति णत्वम्।
4. 'उभौ साभ्यासस्य' (8-4-21) इति णत्वम्।
5. 'पदान्तस्य' (8-4-37) इति निषेधं बाधित्वा 'अन्तः' (8-4-20) इति णत्वम्।
6. क्विपि, 'अनुनासिकस्य क्वि—' (6-4-15) इति दीर्घः। 'नलोपः प्रातिपदिकान्तस्य' (8-2-7) इति नकारलोपः।

A. 'न जिजीवासुखी तातः **प्राणता** रहितस्त्वया' भ. का. 14-58.
B. '**प्राणयन्त**मरिं प्रोचे राक्षसेन्द्रो विभीषणम्' भ. का. 9-101.

प्राणः, प्राणः, अनिनिषुः, [C]प्राणिणिषुः, आनिनयिषुः ;
प्राणितव्यम्, प्राणयितव्यम्, प्राणिणिषितव्यम् ;
प्राणनीयम्, आननीयम्, अनिनिषणीयम् ;
प्राण्यम्, प्राण्यम्, प्राणिणिष्यम् ;
ईषदनः-दुरनः-स्वनः ;
अन्यमानः, आन्यमानः, अनिनिष्यमाणः ;
प्राणः[D], अपानः, व्यानः, उदानः, समानः, प्राणः, अनिनिषः ;
अनितुम्, आनयितुम्, अनिनिषितुम् ;
आन्तिः[1], प्राणना, अनिनिषा, आनिनयिषा ;

अननम्, प्राणनम्, } आननम्, अनिनिषणम् ;

अनित्वा, आनयित्वा, अनिनिषित्वा ;
प्राण्य, प्राण्य, प्राणिणिष्य ;

प्राणम् २, अनित्वा २, } प्राणम् २, आनयित्वा २, } अनिनिषम् २, अनिनिषित्वा २ }

(24) " अन्चु गतिपूजनयोः " (I-भ्वादिः-188-स-पर.से.)

'गतियाचनयोरञ्चत्यञ्चते, णौ विशेषणे। अञ्चयत्यञ्चतीत्येकं गतिपूजनयोरपि ॥' इति (श्लो 50) देवः।

अञ्चकः-ञ्चिका, अञ्चकः-ञ्चिका, अञ्चिचिषकः-षिका ;
अञ्चिता-त्री, अञ्चयिता-त्री, अञ्चिचिषिता-त्री ;
अञ्चन्-न्ती, अञ्चयन्-न्ती, अञ्चिचिषन्-न्ती ;
अञ्चिष्यन्-ती-न्ती, अञ्चयिष्यन्-ती-न्ती, अञ्चिचिषिष्यन्-ती-न्ती ;
अञ्चयमानः, अञ्चयिष्यमाणः ;

1. 'अनुनासिकस्य क्वि—' (6-4-15) इति दीर्घः।

C. '**प्राणिणिषुर्न** पापोऽयं योऽभाङ्क्षीत् प्रमदावनम्।' भ. का. 9-101.

D. 'उदश्वसन् **प्राण**मिवाप्य काश्चित् दृष्ट्वा सलीलं मृदु जक्षतं तम्' धा. का. 2-51.

[1]प्राङ्, उदङ्, देवद्र्यङ्, तिर्यङ्, अध[A]यङ्, न्यङ्[A], सध्र्यङ्, सध्री[B]ची ;

अञ्चितम्[2]-तः[C]-तवान्, अक्तम्-क्तः-क्तवान्, [3]समक्नः-समक्नवान्, } अञ्चितम्-तः-तवान्, } अञ्चिचिषितम्-तः-तवान् ;

अञ्चः, अञ्चः, अञ्चिचिषुः, अञ्चिचयिषुः ;
अञ्चितव्यम्, अञ्चयितव्यम्, अञ्चिचिषितव्यम् ;
अञ्चनीयम्, अञ्चनीयम्, अञ्चिचिषणीयम् ;

अङ्क्यम्, [4]अञ्च्यम्, } अञ्च्यम्, अञ्चिचिष्यम् ;

ईषदञ्चः, दुरञ्चः, स्वञ्चः ;

अञ्च्[5]यमानः, अच्यमानः, } अञ्च्यमानः, अञ्चिचिष्यमाणः ;

अञ्चः, [6]उदङ्कः,[D] अङ्कः, } अञ्चः, अञ्चिचिषः ;

1. 'ऋत्विग्—' (3-2-59) इत्यादिना क्विन्। 'अनिदितां—' (6-4-24) इति नलोपे, 'उगिदचां—' (7-1-70) इति नुम्। नुमो नकारस्य, 'क्विन्प्रत्ययस्य कुः' (8-2-62) इति कुत्वम्।

2. 'अञ्चेः पूजायाम्' (7-2-53) इतीट्। गतौ तु नलोपः।

3. 'अञ्चोऽनपादाने' (8-2-48) इति निष्ठानत्वम्। अपादाने तु '**उदक्त**मुदकं कूपात्' इति भवति। 'उदितो वा' (7-2-56) इति क्त्वायां इड्विकल्पात् 'यस्य विभाषा' (7-2-15) इतीण्णिषेधः।

4. गत्यर्थे निष्ठायामनिट्त्वात् कुत्वम्। पूजायां 'अञ्चेः पूजायाम्' (7-2-53) इति सेट्त्वात् कुत्वाभावः। 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वम्।

5. 'नाञ्चेः पूजायाम्' (6-4-30) इति पूजायां नलोपनिषेधः। गतौ तु 'अनिदिताम्—' (6-4-24) इति नलोपः।

6. 'उदङ्कोऽनुदके' (3-3-123) इति घञन्तो निपातितः।

A. '**अध्यङ्** शस्त्रभृतां रामः **न्यञ्च**त्त्वं प्राप्य मद्विधाः' भ. 5-36.

B. 'सीतां सौमित्रिणा त्यक्तां **सध्रीचीं** त्रस्नुमेकिकाम्' भ. 6-7.

C. 'उच्चै**रञ्चित**लाङ्गूलः शिरो**ऽञ्चित्वेव** संवहन्' भ. 9-40.

D. 'हृद**योदङ्क**संस्थानं कृतान्ताऽऽनायसन्निभम्' भ. 7-83.

अञ्चितुम्, } अञ्चयितुम्, अञ्चिचिषितुम् ;
अक्तुम्, }

अञ्चा, अञ्चना, अञ्चिचिषा, अञ्चिचयिषा ;

अञ्चनम्, } अञ्चनम्, अञ्चिचिषणम् ;
उदकोदञ्चनः, }

अञ्चित्वा, } अञ्चयित्वा, अञ्चिचिषित्वा ;
अक्त्वा, }

समञ्च्य, } प्राञ्च्य, समञ्चिचिष्य ;
समच्य, }

अञ्चम् २, } अञ्चम् २, } अञ्चिचिषम् २; }
अञ्चित्वा २, अक्त्वा २, } अञ्चयित्वा २, } अञ्चिचिषित्वा २ }

(25) "अन्चु गतौ याचने च" (I-भ्वादिः-862. उभ.सक.से.)

'गतियाचनयोरञ्चत्यञ्चते, णौ विशेषणे। अञ्चयत्यञ्चतीत्येकं गतिपूजनयोरपि ॥' इति (श्लो 50) **देवः**। शानचि-अञ्चमानः, अञ्चिष्यमाणः, अञ्चिचिषमाणः, अञ्चिचिषिष्यमाणः, इत्यादिरूपाणि अधिकानि। अवशिष्टानि गतिपूजनार्थक (24) धातौ गत्यर्थकधातुवत् ज्ञेयानि। '**अचि**' इति पाठे तु निष्ठायां **अञ्चितः** इत्येकमेव रूपम्। 'अनिदिताम्—' (6-4-24) इति नलोपो न भवति। "**अचु**" इति पाठे तु **अचन्-अचन्ती** इत्यादिरूपाणि। क्त्वायाम्, 'उदितो वा' (7-2-56) इतीड्विकल्पः—**अचित्वा-अक्त्वा** इति रूपे। निष्ठायां तु 'यस्य विभाषा' (7-2-15) इति वचनात् **अक्तम्**-इत्येकमेव रूपम्।

(26) 'अन्चु विशेषणे' (X-चुरादिः-1739. उभ. से.)

विशेषणम्=व्यावर्तनम्। उदित्करणात् विभाषितो णिच्। 'गतियाचनयोरञ्चत्यञ्चते णौ विशेषणे। अञ्चयत्यञ्चतीत्येकं गतिपूजनयोरपि ॥' इति (श्लो-50) **देवः**। णिच्पक्षे गतिपूजनार्थकधातौ (24) णिजन्तरूपाणीव, णिजभावपक्षे च भौवादिकगत्यर्थका (24) न्चुधातुवद्रूपाणीति च ज्ञेयानि ॥

(27) "अन्जू व्यक्तिम्रक्षण(क्षण)कान्तिगतिषु"

(VII–रुधादिः - 1458-सक. वेट्-पर.)

व्यक्तिः=प्रकटता। **म्रक्षणं**=घृतादिसेकः।

व्यञ्जकः-ञ्जिका, व्यञ्जकः - अञ्जिका, अञ्जिजिष[1]कः - षिका ;

अञ्जिता - त्री, } अञ्जयिता-त्री, अञ्जिजिषिता - त्री ;
[1A]व्यङ्क्ता-त्री, }

[2]व्यञ्जन् - न्ती, व्यञ्जयन्-न्ती, अञ्जिजिषन् - न्ती ;

व्यञ्जिष्यन् - } न्ती, ती, व्यञ्जयिष्यन्-न्ती, ती, अञ्जिजिषिष्यन्-न्ती-ती;
व्यङ्क्ष्यन् - }

व्यञ्जयमानः, व्यञ्जयिष्यमाणः ;

व्यन् - व्यञ्जौ - व्यञ्जः ;

व्यक्तम्-क्तः-क्तवान्, व्यञ्जितम्, अञ्जिजिषितम्-तः-तवान् ;

अञ्जः, अञ्जः, अञ्जिजिषुः, व्यञ्जिजिषुः[A], अञ्जिजयिषुः ;

व्यञ्जितव्यम्, } अञ्जयितव्यम्, अञ्जिजिषितव्यम् ;
अङ्क्तव्यम्, }

व्यञ्जनीयम्, व्यञ्जनीयम्, अञ्जिजिषणीयम् ;

[3]व्यङ्ग्यम्, } व्यञ्ज्यम्, अञ्जिजिष्यम् ;
[4]आज्यम्, }

ईषदञ्जः- दुरञ्जः-स्वञ्जः;

[5]व्यज्यमानः, व्यञ्ज्यमानः, अञ्जिजिष्यमाणः ;

अङ्गः, अञ्जः, अञ्जिजिषः ;

---

1. 'स्मिपूङ्रञ्ज्वशां सनि' (7-2-74) इति नित्यमिट्।
1. A. 'स्वरतिसूति—'(7-2-44) इति ऊदित्त्वादिड्विकल्पः।
2. 'रुधादिभ्यः' (3-1-78) इति श्नम्प्रत्यये 'श्नान्नलोपे' (6-4-23) 'श्नसोरल्लोपः' (6-4-111)।
3. 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वम्।
4. 'आङ्पूर्वादन्जेः संज्ञायामुपसंख्यानम्।' (वा 3-1-109) इति क्यपि रूपम्। उपधानकारलोपः।
5. 'अनिदिताम्—' (6-4-24) इति नलोपः।

A 'संसिस्मयिषमाणोऽगात् मायां **व्यञ्जिजिषुः** द्विषः' भ. का. 9-53.

व्यञ्जितुम्, व्यङ्क्तुम्,	अञ्जयितुम्,	अञ्जिजिषितुम्;
व्यक्तिः, व्यञ्जा, अञ्जना,	व्यञ्जिजिषा,	व्यञ्जिजयिषा;
व्यञ्जनम्,	व्यञ्जनम्,	अञ्जिजिषणम्;
अञ्जित्वा [1]अक्त्वा अङ्क्त्वा	अञ्जयित्वा,	अञ्जिजिषित्वा;
अभिव्यज्य,	अभिव्यञ्ज्य,	समञ्जिजिष्य;
अञ्जम् २, अञ्जित्वा २, अक्त्वा २, अङ्क्त्वा २,	अञ्जम् २, अञ्जयित्वा २,	अञ्जिजिषम् २; अञ्जिजिषित्वा २;
अञ्जलिः,[2]		

(28) 'अन्ध दृष्ट्युपघाते'

(X-चुरादिः- 1925. सक. सेट्-उभ-)

'उपसंहारे' इत्येके।

अन्धकः-न्धिका,	अन्दिधयिषकः-षिका;
अन्धयिता-त्री,	अन्दिधयिषिता-त्री;
[A]अन्धयन्-न्ती,	अन्दिधयिषन्-न्ती;
अन्धयिष्यन्-न्ती-ती,	अन्दिधयिषिष्यन्-न्ती-ती;
अन्धयमानः,	अन्दिधयिषमाणः;
अन्धयिष्यमाणः,	अन्दिधयिषिष्यमाणः;
अन् - अन्धौ - अन्धः;	

1. 'जान्तनशां विभाषा' (6-4-32) इति वा उपधानकारलोपः। 2. औणादिक अलिच् प्रत्ययः॥

A. 'यो ह्यच्छिद्रित एव वीर्यशतकृत् तस्मिन् पतत्यन्धयन्
पिष्टाङ्गस्स ममार दण्डितखलस्येशस्य पादाङ्कितः।
कृष्णोऽप्यश्रुजलाङ्कितेऽतिसुखयत्यामुच्य पुष्पोत्करं
देवौघे हृतदुःखने रसयति व्याकर्षदेनं क्षितौ॥' (धा. का. 3-62)

अन्धितम् - तः - तवान्,	अन्दिधयिषितम् - तः - तवान्;
अन्धः, [1]जनुषाऽन्धः,	अन्दिधयिषुः;
अन्धयितव्यम्,	अन्दिधयिषितव्यम्;
अन्धनीयम्,	अन्दिधयिषणीयम्;
अन्ध्यम्,	अन्दिधयिष्यम्;
ईषदन्धः - दुरन्धः - स्वन्धः;	
अन्ध्यमानः,	अन्दिधयिष्यमाणः;
अन्धः,	अन्दिधयिषः;
अन्धयितुम्,	अन्दिधयिषितुम्;
अन्धना,	अन्दिधयिषा;
अन्धनम्,	अन्दिधयिषणम्;
अन्धयित्वा,	अन्दिधयिषित्वा;
समन्ध्य,	समन्दिधयिष्य;
अन्धम् २, अन्धयित्वा २,	अन्दिधयिषम् २; अन्धिदयिषित्वा २;

(29) "अबि शब्दे" (I-भ्वादिः- 378. अक-से-आ-)

अम्बकः-म्बिका,	अम्बकः-म्बिका,	अम्बिबिषकः-षिका;
अम्बिता-त्री,	अम्बयिता-त्री,	अम्बिबिषिता-त्री;
अम्बयन्-न्ती,	अम्बयिष्यन्-न्ती-ती,	--
अम्बमानः,	अम्बयमानः,	अम्बिबिषमाणः;
अम्बिष्यमाणः,	अम्बयिष्यमाणः,	अम्बिबिषिष्यमाणः;
अन् - अम्बौ - अम्बः;		
अम्बि[A]तम्-तः-तवान्,	अम्बितः,	अम्बिबिषितम्-तः-तवान्;
अम्बः,	अम्बः,	अम्बिबिषुः, अम्बिबयिषुः;
अम्बितव्यम्,	अम्बयितव्यम्,	अम्बिबिषितव्यम्;

1. 'पुंसाऽनुजो जनुषान्ध इति वक्तव्यम्' (6-3-3-वा.) इति तृतीयायाः अलुक्।

A 'सकम्पहेरम्बसमानलम्बनाः समाव्रजन् अम्बितघण्डिकास्तदा। प्रलम्बसास्नाः कबरत्विषो वृषाः अक्लीबिताः क्षीवतयाऽतिशीभराः॥' धा. का. 1-49,

अम्बनीयम् , अम्बनीयम् , अम्बिबिषणीयम् ;

अम्ब्यम् , अम्ब्यम् , अम्बिबिष्यम् ;

ईषदम्बः-दुरम्बः-स्वम्बः ;

अम्ब्यमानः, अम्ब्यमानः, अम्बिबिष्यमाणः ;

अम्बः, अम्बः, अम्बिबिषः ;

अम्बितुम् , अम्बयितुम् , अम्बिबिषितुम् ,

अम्बा, अम्बना, अम्बिबिषा, अम्बिबयिषा ;

अम्बनम् , अम्बनम् , अम्बिबिषणम् ;

अम्बित्वा, अम्बयित्वा, अम्बिबिषित्वा ;

समम्ब्य, समम्ब्य, समम्बिबिष्य ;

अम्बम् २, अम्बित्वा २, } अम्बम् , अम्बयित्वा २, } अम्बिबिषम् २ ; अम्बिबिषित्वा २ ; }

(30) "**अभि शब्दे**" (I-भ्वादि :-385. अक. से. आ.)

(29) **अम्बति**वद्रूपाणि सर्वाणि ज्ञेयानि ।

(31) "**अभ्र गतौ**" (I-भ्वादिः-556-सक. से. पर.)

अभ्रकः-भ्रिका, अभ्रकः-भ्रिका, अबिभ्रिषकः-षिका ;

अभ्रिता-त्री, अभ्रयिता-त्री, अबिभ्रिषिता-त्री ;

अभ्रन्-न्ती, अभ्रयन्-न्ती, अबिभ्रिषन्-न्ती ;

अभ्रिष्यन्-न्ती-ती, अभ्रयिष्यन्-न्ती-ती, अबिभ्रिषिष्यन्-न्ती-ती ;

— अभ्रयमाणः, अभ्रयिष्यमाणः ;

अप् - अभ्रौ - अभ्रः ; — —

अ[A]भ्रितम्-तः-तवान्, अभ्रितः, अबिभ्रिषितम्-तः-तवान् ;

अभ्रः, पर्यभ्री[1], अभ्रः, अबिभ्रिषुः, अबिभ्रयिषुः ;

अभ्रितव्यम् , अभ्रयितव्यम् , अबिभ्रिषितव्यम् ;

---

1. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78.) इति ताच्छील्ये णिनिः ।

A. 'अखोरधौरतूपतगेन्द्रवाहनं स्वसेविनां तित्सरिषां निराडिनम् । कमरन् मनोदुर्गममभ्रमेचकं बभ्रद्धूविभ्रमवृष्टिम**भ्रितम्**' धा. का 1-71.

अभ्रणीयम् , अभ्रणीयम् , अबिभ्रिषणीयम् ;

अभ्र्यम् , अभ्र्यम् , अबिभ्रिष्यम् ;

ईषदभ्रः, दुरभ्रः, स्वभ्रः ;

अभ्र्यमाणः, अभ्र्यमाणः, अबिभ्रिष्यमाणः;

अभ्रः, अभ्रः, अबिभ्रिषः;

अभ्रितुम् , अभ्रयितुम् , अबिभ्रिषितुम् ;

अभ्रा, अभ्रणा, अबिभ्रिषा, अबिभ्रयिषा ;

अभ्रणम् , अभ्रणम् , अबिभ्रिषणम् ;

अभ्रित्वा, अभ्रयित्वा, अबिभ्रिषित्वा ;

समभ्र्य, समभ्र्य, समबिभ्रिष्य ;

अभ्रम् २, अभ्रित्वा २, } अभ्रम् २, अभ्रयित्वा २, } अबिभ्रिषम् २ ; अबिभ्रिषित्वा २ ; }

(32) '**अम गत्यादिषु**' (I-भ्वादि : - 465-सक-से-पर.)

'गत्यादावमतीति स्याद् रोगे स्यादामयत्यमेः ।' (श्लो 147, पूर्वार्धम्) इति **देवः** ।

[1]अमकः-मिका, आमक[1A]:-मिका, अमिमिषकः-षिका ;

अमिता-त्री, आमयिता-त्री, अमिमिषिता-त्री ;

अ[A]मन्-न्ती, आमयन्-न्ती, अमिमिषन्-न्ती ;

अमिष्यन्-न्ती-ती, आमयिष्यन्-न्ती-ती, अमिमिषिष्यन्-न्ती-ती ;

आमयमानः, आमयिष्यमाणः ;

[2]आन्-आमौ-आमः;

---

1. 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (7-3-34) इति वृद्धिनिषेधः ।

1 A. अस्य धातोरमन्तत्वेन प्राप्तं मित्वं, 'न कम्यमिचमाम्' (ग. सू. भ्वादौ) इति निषिध्यते । अतः 'मितां ह्रस्वः' (6-4-32) इति ह्रस्वो न ।

2. 'अनुनासिकस्य क्विझलोः क्ङिति' (6-4-15) इति दीर्घः । 'मो नो धातोः' (8-2-64) इति नत्वम् ।

A 'वनाद्वनं सानु**ममन्** द्रमन् गृहं व्याधोत्करोऽहम्मतिमीमिताशयः । चान्तामिषश्छान्तजलः फलावलीं जान्त्वा झमज्झेमनमक्रमीद् गुहाम् ॥' धा. का. 1-60.

अमितम्[A]-तः-तवान्,
[1]आन्तम्-न्तः-न्तवान्, } आमितः, अमिमिषितः-तवान् ;

अमः, आमः, अमिमिषुः, आमिमयिषुः, अभ्य[2]मी ;[B]

अमितव्यम्, आमयितव्यम्, अमिमिषितव्यम् ;

अमनीयम्, आमनीयम्, अमिमिषणीयम् ;

[3]अम्यम्, आम्यम्, अमिमिष्यम् ;

ईषदम :-दुरम :-स्वमः ;

अम्यमानः, आम्यमानः, अमिमिष्यमाणः ;

अमः, आमः, अमिमिषः ;

अमितुम्, आमयितुम्, अमिमिषितुम् ;

[4]आन्तिः, आमना, अमिमिषा, आमिमयिषा ;

अमनम्, आमनम्, अमिमिषणम् ;

अमित्वा, आमयित्वा, अमिमिषित्वा ;

समम्य, समाम्य, समिमिष्य ;

आमम् २, अमित्वा २, } आमम् २, आमयित्वा २, } अमिमिषम् २ अमिमिषित्वा २ } ;

(33) **'अम रोगे'** (X-चुरादिः 1721-सक. से. उ.)

'गत्यादावमतीति स्याद् रोगे स्यादामयत्यमेः ।' (श्लो 147 पूर्वार्धम् ।)

इति देवः ।

आमकः-मिका, आमिमयिषकः-षिका ;

---

1. 'रुष्यमत्वरसंघुषाऽऽस्वनाम्' (7-2-28) इति निष्ठायामिड्विकल्पः । इड-भावपक्षे 'अनुनासिकस्य—' (6-4-15) इति दीर्घः ।

2. 'जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च' (3-2-157) इति तच्छीला-दिषु कर्तृषु इनिः ।

3. 'पोरदुपधात्' (3-1-98) इति यत् ।

4. 'तितुत्र—' (7-2-9) तीण्णिषेधः । 'अनुनासिकस्य—' (6-4-15) इति दीर्घः ।

A 'तेषां निहन्यमानानां संघुष्टैः कर्णभेदिभिः । अभूदभ्य**मित**त्रासमास्वान्ता-शेषदिग् जगत् ॥' भ. का. 9-21.

B 'शैले विश्रयिणं क्षिप्रं अनादरिण**मभ्यमी** । न्याय्यं परिभवी ब्रूहि पापमव्य-थिनं कपिम् ॥' भ. का. 7-20.

[1]आमयिता-त्री, (A) आमिमयिषिता-त्री ;

[B]आमयन्-न्ती, आमिमयिषन्-न्ती ;

आमयिष्यन्-न्ती-ती, आमिमयिषिष्यन्-न्ती-ती ;

आमयमानः, आमिमयिषमाणः ;

आमयिष्यमाणः, आमिमयिषिष्यमाणः ;

[2]आन्-आमौ-आमः ; —

आमितम्-तः-तवान्, आमिमयिषितम्-तः-तवान्,

आमः, आमयः,[3] आमिमयिषुः ;

आमयितव्यम्, आमिमयिषितव्यम् ;

आमनीयम्, आमिमयिषणीयम् ;

आम्यम्, आमिमयिष्यम् ;

ईषदामः, दुरामः, स्वामः ;

आम्यमानः, आमिमयिष्यमाणः ;

आमः, आमिमयिषः,

आमयितुम्, आमिमयिषितुम् ;

आमना, आमिमयिषा ;

आमनम्, आमिमयिषणम् ;

आमयित्वा, आमिमयिषित्वा ;

समाम्य, समामिमयिष्य ;

आमम् २, आमयित्वा २, } आमिमयिषम् २ ; आमिमयिषित्वा २ ; }

---

1. अमन्तत्वेन मित्त्वं तु न । 'नान्ये मितोऽहेतौ' (ग. सू. चुरादौ) इति निषेधात् । स्वार्थे णिचि परतः ज्ञपादिपञ्चकव्यतिरिक्ताः मितो न भवन्तीति तदर्थः ।

2. 'मो नो धातोः' (8-2-64) इति नत्वम् । न चात्र स्थानिवद्भावः—'पूर्वत्रा-सिद्धे—' (वा. 1-1-58) इति तन्निषेधात् ।

3. औणादिकः अयच् । रोगः ।

A अस्य धातोश्चुरादिपाठात् शुद्धधातोरेव रूपाणि । अजादित्वात् यङ् न ।

B '**द्रागामयन्** विचटदस्थिकयाऽथ मुष्ट्या प्रास्फोटयत् तमजितोऽपि स घाटि-ताक्षम् । दिष्ट्यैष हिंसयति देव्यममुं युधीति संमोदमर्जयति घोषति नाकिलोके ॥' धा. का. 3-39.

(34) "अय गतौ" (I-भ्वादिः - 474. सक. से. आ.)

आयकः-यिका,	आयकः-यिका,	अयियिषकः-षिका ;
अयिता-त्री,	आययिता-त्री,	अयियिषिता-त्री ;
—	आययन्-न्ती,	आययिष्यन्-न्ती-ती ;
प्लायमानः, [1]पलायमानः, अयमानः,	आययमानः,	अयियिषमाणः ;
अयिष्यमाणः,	आययिष्यमाणः,	अयियिषिष्यमाणः ;
[2]अत्, अतौ, अतः ;		
अयितम्-तः-तवान्,	आयितम्-तः,	अयियिषितम्-तः-तवान् ;
अयः,	आयः,	अयियिषुः, आयिययिषुः ;
अयितव्यम्,	आययितव्यम्,	अयियिषितव्यम् ;
अयनीयम्,	आयनीयम्,	अयियिषणीयम् ;
आय्यम्,	आय्यम्,	अयियिष्यम् ;
ईषदयः, दुरयः, स्वयः ;		
अय्यमानः,	आय्यमानः,	अयियिष्यमाणः ;
आयः,	आयः,	अयियिषः ;
अयितुम्,	आययितुम्,	अयियिषितुम् ;
[3]अतिः,	आयना,	अयियिषा, आयिययिषा ;
अयनम्, [1]प्लायनम्-दुलयनम्, पलायनम्,	आयनम्,	अयियिषणम् ;
शोभनं अन्त[4]रयणं, (देशादन्यत्र)		अन्तरयनः-देशः,
अयित्वा,	आययित्वा,	अयियिषित्वा ;
समय्य,	समाय्य,	समयियिष्य ;
आयम् २, अयित्वा २,	आयम् २, आययित्वा २,	अयियिषम् २ ; अयियिषित्वा २ ;

1. 'उपसर्गस्यायतौ' (8-2-19) इति लत्वम् ।
2. वलि लोपे तुक् ।
3. वलि लोपः ।
4. 'अयनं च' (8-4-25) इति णत्वम् ।

(35) "अर्क स्तवने" (X-चुरादिः -1644. सक. सेट्. उभ.)

'तपने' इत्येके ।

अर्ककः-र्किका,	अर्चि[1]कयिषकः-षिका ;
अर्कयिता-त्री,	अर्चिकयिषिता-त्री ;
अर्कयन्-न्ती,	अर्चिकयिषन्-न्ती ;
अर्कयिष्यन्-न्ती-ती,	अर्चिकयिषिष्यन्-न्ती-ती ;
अर्कयमाणः,	अर्चिकयिषमाणः ;
अर्कयिष्यमाणः,	अर्चिकयिषिष्यमाणः ;
[2]अर्क्-अर्कौ-अर्कः ;	
अर्कित[3]ः- तम्- तवान्,	अर्चिकयिषितम्-तः-तवान् ;
अर्कः,	अर्चिकयिषुः ;
अर्कयितव्यम्,	अर्चिकयिषितव्यम्ः ;
अर्कणीयम्,	अर्चिकयिषणीयम् ;
अर्क्य[A]म्,	अर्चिकयिष्यम् ;
ईषदर्कः, दुरर्कः, स्वर्कः ;	
अर्क्यमाणः,	अर्चिकयिष्यमाणः ;
अर्कः,	अर्चिकयिषः ;
अर्कयितुम्,	अर्चिकयिषितुम् ;
अर्कणा[4],	अर्चिकयिषा ;
अर्कणम्,	अर्चिकयिषणम् ;
अर्कयित्वा,	अर्चिकयिषित्वा ;
समर्क्य,	समर्चिकयिष्य ;
अर्कम् २, अर्कयित्वा २,	अर्चिकयिषम् २ ; अर्चिकयिषित्वा २ ;

1. 'न न्द्राः संयोगादयः' (6-1-3) इति रेफस्य द्वित्वनिषेधः ।
2. 'रात्सस्य' (8-2-24) इति नियमात् ककारस्य संयोगान्तलोपो न ।
3. 'निष्ठायां सेटि' (6-4-52) इति णेर्लोपः ।
4. 'ण्यासश्रन्थो युच्' (3-3-107) इति युच् ।

A. 'सौधे विटङ्कजुषि पश्यति धूसितोऽयं राजारिकीटबलचूर्णनयातिपूज्यः । अर्क्येण तेन समरेष्वविशोठितस्त्वं संशुण्ठिताहितमदेन विजोडितोऽसि॥' धा. का. 3-27.

(36) "अर्च पूजायाम्" (I-भ्वादि :-204-सक. से. पर.)

'पूजायां णौ विभाषाऽर्चेरर्चयत्यर्चतेऽर्चति । भूवादौ पाठसामर्थ्यात् कर्तृगामिफलेऽर्चति ॥' (श्लो-49.) इति देवः ।

अर्चकः-र्चिका, अर्चकः-र्चिका, [1]अर्चिचिषकः-षिका ;
अर्चिता-त्री, अर्चयिता-त्री, अर्चिचिषिता-त्री ;
अर्चन्-न्ती, अर्चयन्-न्ती, अर्चिचिषन्-न्ती ;
अर्चिष्यन्-न्ती-ती, अर्चयिष्यन्-न्ती-ती, अर्चिचिषिष्यन्-न्ती-ती ;
— अर्चयमानः, अर्चयिष्यमाणः ;
अ[1A]र्क्-अर्चौ-अर्चः ; — —
अर्चितम्-[A]तः-[2]तवान्, अर्चितः, अर्चिचिषितम्-तः-तवान् ;
अर्चः, अर्चः, अर्चिचिषुः, अर्चिचयिषुः ;
अर्चितव्यम्, अर्चयितव्यम्, अर्चिचिषितव्यम् ;
अर्चनीयम्, अर्चनीयम्, अर्चिचिषणीयम् ;
[3]अर्च्यम्[B], अर्च्यम्, अर्चिचिष्यम् ;
ईषदर्चः-दुरर्चः-स्वर्चः ; — —
अर्च्यमानः, अर्च्यमानः, अर्चिचिष्यमाणः ;
अर्चः, अर्चः, अर्चिचिषः ;
अर्चितुम्, अर्चयितुम्, अर्चिचिषितुम् ;
अर्चा, अर्चना, अर्चिचिषा, अर्चिचयिषा ;
अर्चनम्, अर्चनम्, अर्चिचिषणम् ;
अर्चित्वा, अर्चयि[B]त्वा, अर्चिचिषित्वा ;

---

1. 'न न्द्राः संयोगादयः' (6-1-3) इति रेफस्य द्वित्वनिषेधः ।
1. A. 'रात्सस्य' (8-2-24) इति नियमात् चकारस्य लोपो न ।
2. 'मतिबुद्धिपूजार्थेभ्यश्च' (3-2-188) इति वर्तमाने क्तः । राज्ञामर्चितः 'क्तस्य च वर्तमाने' (2-3-67) इति षष्ठी ।
3. निष्ठायां सेट्त्वात् 'चजोः'-(7-3-52) इति कुत्वं न ।
A. '**सुरार्चिते** म्लेच्छजनैर्दुरासदे श्रीलाञ्छिताङ्गे स्मितपुष्पलाञ्छिते' धा. का. 1-28.
B. "अथार्घ्यं मधुपर्कार्घमुपनीयाऽऽदरादसौ। **अर्चयित्वा फलैरर्घ्यौ** सर्वत्राख्यदनामयम्" भ. का. 6-71.

समर्च्य, समर्च्य, समर्चिचिष्य ;
अर्चम् २, अर्चित्वा २, } अर्चम् २, अर्चयित्वा २, } अर्चिचिषम् २ ; अर्चिचिषित्वा २ ; }
[1]अर्कः ;

(37) 'अर्च पूजायाम्' (X-चुरादि :-1809. से. उ. [A]आधृषीयः ।)

'पूजायां णौ विभाषाऽर्चेरर्चयत्यर्चतेऽर्चति । भूवादौ पाठसामर्थ्यात् कर्तृगामिफलेऽर्चति ॥' (श्लो.49.) इति देवः ।

अर्चकः-र्चिका इत्यादिकानां ण्यन्ताण्यन्तसाधारण्येन लिखितत्वात् पूर्वोक्त (36) पूजार्थकार्चतिवद्रूपाणि ज्ञेयानि । ण्यन्तात् सनि तु

अर्चिचयिषकः-षिका, अर्चिचयिष्यम् ;
अर्चिचयिषिता-त्री, अर्चिचयिष्यमाणः ;
अर्चिचयिषन्-न्ती, अर्चिचयिषः ;
अर्चिचयिषिष्यन्-न्ती-ती, अर्चिचयिषितुम् ;
अर्चिचयिषमाणः, अर्चिचयिषा ;
अर्चिचयिषिष्यमाणः, अर्चिचयिषणम् ;
अर्चिचयिषितम्-तः-तवान्, अर्चिचयिषित्वा, समर्चिचयिष्य;
अर्चिचयिषुः, अर्चिचयिषम् २, }
अर्चिचयिषितव्यम् ; अर्चिचयिषित्वा २, }
अर्चिचयिषणीयम् ;

इमानि रूपाणि—इति विशेषः ।

A. 'आधृषाद्वा' (ग. सू.) इति णिचो वैकल्पिकत्वम् । 'शेषात् कर्तरि परस्मैपदम्' (1-3-78) इति णिजभावपक्षे परस्मैपदी । शाकटायनस्तु अनुदात्तेत्त्वमस्य धातोरङ्गीकृत्यात्मनेपदित्वं ब्रूते । तत्पक्षे शानचि 'अर्चमानः' इति रूपम् ।

---

1. औणादिकः कः प्रत्ययः । अर्च्यते, अर्चयन्ति वा तं इति व्युत्पत्तिः— (द. उ. 3-18) भास्करो पुष्पजातिश्च ।

(38) **‘अर्ज अर्जने’** (I-भ्वादिः-224-सक. सेट्. पर.)

पूजार्थक-भौवादिकार्चति (36) वद्रूपाणि सर्वाण्यप्यस्य ज्ञेयानि ।

(39) **‘अर्ज प्रतियत्ने’** (X-चुरादिः-1726-सक. से. उभ.)

‘प्रतियत्नेऽर्जयेदर्जेरर्जतीत्यर्जने पदम्’ इति (63) **देवः** । **प्रतियत्नः** = गुणाधानमिति **कौमुदी** ।

अर्जकः-र्जिका,	अर्जिजयिषकः-षिका ;
अर्जयिता-त्री,	अर्जिजयिषिता-त्री ;
अर्जयन्-न्ती,	अर्जिजयिषन्-न्ती,
अर्जयिष्यन्-न्ती-ती,	अर्जिजयिषिष्यन्-न्ती-ती ;
अर्जयमानः,	अर्जिजयिषमाणः ;
अर्जयिष्यमाणः,	अर्जिजयिषिष्यमाणः ;
अर्जितम् , तः,	अर्जिजयिषितम्-तः-तवान् ;
अर्जः,	अर्जिजयिषुः ;
अर्जयितव्यम् ,	अर्जिजयिषितव्यम् ;
अर्जनीयम् ,	अर्जिजयिषणीयम् ;
अर्ज्यम् ,	अर्जिजयिष्यम् ;
ईषदर्जः-दुरर्जः-स्वर्जः ;	
अर्ज्यमानः,	अर्जिजयिष्यमाणः ;
अर्जः,	अर्जिजयिषः ;
अर्जयितुम् ,	अर्जिजयिषितुम् ;
अर्जना,	अर्जिजयिषा ;
अर्जनम् ,	अर्जिजयिषणम् ;
अर्जयित्वा,	अर्जिजयिषित्वा ;
समर्ज्य,	समर्जिजयिष्य ;
अर्जम् २ , }	अर्जिजिषम् २ ; }
अर्जयित्वा २, }	अर्जिजयिषित्वा २; }

[1] अर्जुनः ;

1. औणादिकः उनन् प्रत्ययो णिलुक् च । वृक्षः पार्थश्च ।

(40) **‘अर्थ उपयाच्ञायाम्’** (X-चुरादिः-1905-सक. सेट्-आत्मने-आ[1]गर्वीयः । अदन्तः)

अर्थकः-र्थिका,	अर्तिथयिषकः-षिका ;
अर्थयिता-त्री,	अर्तिथयिषिता-त्री ;
अर्थ[1]यमानः,	अर्तिथयिषमाणः ;
अर्थयिष्यमाणः,	अर्तिथयिषिष्यमाणः ;
अर्थ्[2]-अर्थौ-अर्थः ;	—
अर्थितम्[A]-तः-तवान् ,	अर्तिथयिषितम्-तः-तवान् ;
अर्थः, विद्या[3]र्थी,	अर्तिथयिषुः ;
अर्थयितव्यम् ,	अर्तिथयिषितव्यम् ;
अर्थनीयम् ,	अर्तिथयिषणीयम् ;
अर्थ्यम् ,	अर्तिथयिष्यम् ,
ईषदर्थः, दुरर्थः, स्वर्थः ;	—
अर्थ्यमानः,	अर्तिथयिष्यमाणः ;
अर्थः ;	अर्तिथयिषः ;
अर्थयितुम् ,	अर्तिथयिषितुम् ;
अर्थना, अभ्यर्थना,	अर्तिथयिषा ;
अर्थनम् ,	अर्तिथयिषणम् ;
अर्थयित्वा,	अर्तिथयिषित्वा ;
समर्थ्य, अभ्यर्थ्य,[B]	समर्तिथयिष्य ;
अर्थम् २, अर्थयित्वा २,	अर्तिथयिषम् २, अर्तिथयिषित्वा २ ;

1. ‘आगर्वादात्मनेपदिनः’, इति ग. सू. चुरादौ । तेन ण्यन्ताच्छानजेव । “**प्रार्थयन्ति** शयनोत्थितं प्रियाः” ‘इत्यादि तु कृदन्तात् ‘तत्करोति—’ इति णिचि नेयम्’’ इति **मा धा. वृत्तौ** ॥
2. ‘रात् सस्य’ (8-2-24) इति नियमात् संयोगान्तलोपो न ।
3. ‘सुप्यजातौ णिनिस्ताच्छील्ये’ (3-2-78) इति णिनिः ।

A. ‘तच्चाकर्ण्य सरोषमुत्पदयते स्मोत्तुङ्गमञ्चं हरिः
प्रोत्तिष्ठन्नसिचर्मणी गृहितवान् कंसोऽपि मृग्योऽसताम् ।
द्रष्टॄणां कुहकोऽथ शूरयितृभिः स्तुत्योऽसिना वीरयां-
चक्रे स्थूलितभीतिर**र्थित**वधास्सत्राशनैर्गर्वितैः’ (धा. का. 3-58.)

B. ‘न जिह्रियाञ्चकाराथ सीताम**भ्यर्थ्य** तर्जितः ।
नाप्यूर्जं बिभरामास वैदेह्यां प्रसितो भृशम् ॥’’ भ. का. 6.3.

(41) **'अर्द गतौ याचने च'** (I-भ्वादिः- 55-सक. से. पर.)

'अर्दयेदर्दतेऽर्देथौं हिंसनेऽर्दति याचने।' (103) इति देवः। **शाकटायनस्तु** अनुदात्तेतमिमं धातुं मन्यते।

'यातने च इत्येके' -इति **क्षीरस्वामी**। याचने द्विकर्मकः।

अर्दकः-र्दिका, अर्दकः-र्दिका, अर्दिदिष[1]कः-षिका ;
अर्दिता-त्री, अर्दयिता-त्री, अर्दिदिषिता-त्री ;
अर्दन्-न्ती, अर्दयन्-न्ती, अर्दिदिषन्-न्ती ;
अर्दिष्यन्-न्ती-ती, अर्दयिष्यन्-न्ती-ती, अर्दिदिषिष्यन्-ती-न्ती ;
—, अर्दयमानः, अर्दयिष्यमाणः ;
अर्त्-अर्द्-अर्दौ-अर्दः ; — —
समर्ण[1A]:, न्यर्णः, व्य[B]र्णः, अभ्य[2]र्णः-अभ्यर्दितः (विदूरे) }
[A]अर्दितम्-तः-तवान्, अर्दितः, अर्दिदिषितम्-तः-तवान् ; }
अर्दः, जना[3]र्दनः, अर्दः, अर्दिदिषुः, अर्दिदयिषुः ;
अर्दितव्यम्, अर्दयितव्यम्, अर्दिदिषितव्यम् ;
अर्दनीयम्, अर्दनीयम्, अर्दिदिषणीयम् ;
अर्द्यम्, अर्द्यम्, अर्दिदिष्यम् ;
ईषदर्दः-दुरर्दः-स्वर्दः ; — —
अर्द्यमानः, अर्द्यमानः, अर्दिदिष्यमाणः ;
अर्दः, अर्दः, अर्दिदिषः ;
अर्दितुम् ; अर्दयितुम्, अर्दिदिषितुम् ;

---

1. 'न न्द्राः संयोगादयः' (6-1-3.) इति रेफस्य द्वित्वनिषेधः।

1.A. 'अर्देस्संनिविभ्यः' (7-2-24) इति इण्णिषेधः। 'रदाभ्यां निष्ठातो नः—' (8-2-42) इति नत्वे, णत्वे च रूपम्।

2. 'अभेश्चाविदूर्ये' (7-2-25) इति इण्णिषेधः।

3. 'नन्दिग्रहिपचादिभ्यो—' (3-1-134) इति नन्द्यादित्वात् कर्तरि ल्युः।

A. 'पलान्यखाद्यानि खदन् बदद्वपुर्गदन्नवाच्यानि रदन् सतां मनः। नदन् मदादर्दित-संक्षयोऽधुना क्षणं खलो नर्दतु गर्दभस्वनैः' धा. का. 1-8.

B. '**अव्यर्णो** गिरिकूटाभान् **अभ्यर्णा**नार्दिदद् द्रुतम्।
धूतशस्त्रान् महारम्भान् भवान्तास्त्रिदशैरपि ॥' (भ. का. 9-19.)

अर्दा, अर्दना, अर्दिदिषा, अर्दिदयिषा ;
अर्दित्वा, अर्दयित्वा, अर्दिदिषित्वा ;
समर्द्य, समर्द्य, समर्दिदिष्य ;
अर्दम् २, } अर्दम् २, } अर्दिदिषम् २ ; }
अर्दित्वा २, } अर्दयित्वा २, } अर्दिदिषित्वा २; }

(41 A) **'अर्द हिंसायाम्'** (X - चुरादिः - 1829. सक. सेट्. उभ.)

आधृषीयः। 'अर्दयेदर्दतेऽर्देथौ हिंसनेऽर्दति याचने' (103) इति **देवः**।
शाकटायनपक्षे आत्मनेपदी।

अर्दकः-र्दिका, अर्दिदयिषकः-षिका, अर्दकः-र्दिका ;[1]
अर्दयिता-त्री, अर्दिदयिषिता-त्री, अर्दिता-त्री ;
अर्दयन्-न्ती, अर्दिदयिषन्-न्ती, अर्दन्-न्ती ;
अर्दयिष्यन्-न्ती-ती, अर्दिदयिषिष्यन्-न्ती-ती, अर्दिष्यन्-न्ती-ती ;
अर्दयमानः, अर्दिदयिषमाणः, [2]अर्दमानः ;
अर्दयिष्यमाणः, अर्दिदयिषिष्यमाणः, अर्दिष्यमाणः ;
अर्त्[2A]-अर्द्-अर्दौ-अर्दः ; — —
अर्दितम्-तः, अर्दिदयिषितः, [3]समर्णः-न्यर्णः-व्यर्णः- [4]अभ्यर्णः, अभ्यर्दितः ;
तवान् ;
अर्दः, अर्दिदयिषुः, अर्दः, [5]जनार्दनः, अर्दिदिषुः, [6]समर्दी ;
अर्दयितव्यम्, अर्दिदयिषितव्यम्, अर्दितव्यम् ;
अर्दनीयम्, अर्दिदयिषणीयम्, अर्दनीयम् ;

---

1. णिजभावपक्षे शुद्धाद्धातोस्सनि रूपाणि पूर्वलिखिता (41) र्दतिवत् ज्ञेयानि।
2. शाकटायनमते णिजभावपक्षेऽनुदात्तेत्त्वात् शानज् भवति।
2.A. 'वाऽवसाने' (8-4-56) इति चर्त्वविकल्पः। 'रात् सस्य' (8-2-24) इति नियमात् संयोगान्तलोपो न।
3. णिजभावपक्षे 'अर्देस्संनिविभ्यः' (7-2-24) इतीण्णिषेधे, 'रदाभ्यां—' (8-2-42) इति निष्ठानत्वे णत्वम्।
4. 'अभेश्चाविदूर्ये' (7-2-25) इति निष्ठायामिण्णिषेधः। विदूरे तु 'अभ्यर्दित' इत्येव।
5. णिजभावपक्षे नन्द्यादित्वात् (3-1-134) कर्तरि ल्युः।
6. 'सुप्यजातौ—' (3-2-78) इति णिनिः ताच्छील्ये।

[A]अर्द्यम् , अर्दिदयिष्यम् , अर्द्यम् ;

ईषदर्दः, दुरर्दः, स्वर्दः ;

अर्द्यमानः, अर्दिदयिष्यमाणः, अर्द्यमानः ;

अर्दः, अर्दिदयिषः, अर्दः ;

अर्दयितुम् , अर्दिदयिषितुम् , अर्दितुम् ;

अर्दना, अर्दिदयिषा, अर्दा ;

अर्दयित्वा, अर्दिदयिषित्वा, अर्दित्वा ;

समर्द्य, समर्दिदयिष्य, समर्द्य ;

अर्दम् २, अर्दयित्वा २, } अर्दिदयिषम् २, अर्दिदयिषित्वा २, } अर्दम् २ अर्दित्वा २ };

(42) 'अर्ब गतौ' (I-भ्वादिः 415-सक. से. पर.)

अर्बकः-र्बिका, अर्बकः-र्बिका, [1]अर्बिबिषकः-षिका ;

अर्बिता-त्री, अर्बयिता-त्री, अर्बिबिषिता-त्री ;

[B]अर्बन्-न्ती, अर्बयन्-न्ती, अर्बिबिषन्-न्ती ;

अर्बिष्यन्-न्ती-ती, अर्बयिष्यन् न्ती-ती,, अर्बिबिषिष्यन्-न्ती-ती ;

— अर्बयमाणः, अर्बयिष्यमाणः ;

अर्प् - अर्ब् - अर्बौ - अर्बः ;

अर्बितम् - तः-तवान् , अर्बितः अर्बिबिषितम्-तः-तवान् ;

अर्बः, अर्बः, अर्बिबिषुः, अर्बिबयिषुः ;

अर्बितव्यम् , अर्बयितव्यम् , अर्बिबिषितव्यम् ;

अर्बणीयम् , अर्बणीयम् , अर्बिबिषणीयम् ;

अर्ब्यम् , अर्ब्यम् , अर्बिबिष्यम् ;

ईषदर्बः-दुरर्बः-स्वर्बः; — —

1. 'न न्द्राः—' (6-1-3) इति रेफस्य द्वित्वनिषेधः ।

A. 'कृष्णोऽविश्रथितारिभीरभिमयन् दोष्णा ग्रथन् भ्रामयन्
क्राथ्यं प्रोथितवान् अशीकितमतिं भूमावचीकन्नमुम् ।
मल्लोऽर्द्यः स च हिंसितः पदमुपासास्सीद्धरेः शुन्धितः
तावत् स्वं बलमच्छर्द जुषितवान् मुष्ट्या हली मुष्टिकम् ॥' धा. का. 3-50

B. 'हयैस्सुरम्फैर्द्रुतमर्बतो रवेः पर्बद्भिरालब्यत रक्तिमा करैः ।
प्रबर्ब्य शैलानुपमर्ब्य पद्मिनीं प्रकर्ब्य चाशाः श्रमशोणितैरिव ॥ धा. का. 1-54.'

अर्ब्यमाणः, अर्ब्यमाणः, अर्बिबिष्यमाणः ;

अर्बः, अर्बः, अर्बिबिषः ;

अर्बितुम् , अर्बयितुम् , अर्बिबिषितुम् ;

[1]अर्बा, अर्बणा, अर्बिबिषा, अर्बिबयिषा;

अर्बणम् , अर्बणम् , अर्बिबिषणम् ;

अर्बित्वा, अर्बयित्वा, अर्बिबिषित्वा ;

समर्ब्य, समर्ब्य, समर्बिबिष्य ;

अर्बम् २, अर्बित्वा २, } अर्बम् २, अर्बयित्वा २, } अर्बिबिषम् २ ; अर्बिबिषित्वा २. }

(43) "अर्व हिंसायाम्" (I-भ्वादिः-584. सक, सेट्. पर.)

अर्वक[A] :-र्विका, अर्विविषकः- षिका,

इत्यादिकानि (42) अर्बतिवद्रूपाणि सर्वाणि ज्ञेयानि ।

A 'अफर्विताकाङ्क्षितमर्वकं सतां मांसादिसञ्चर्वकदुष्टमर्वकम् ।
कर्वद्वधूकेलिरसेन खर्वितं गर्वार्वकं शर्वपरेण सर्वताम् ॥' धा. का. 1-74

(44) "अर्ह पूजाजाम्" (I-भ्वादिः-740-सक. से. पर.)

'—पूजनेऽर्हति चार्हयेत् ।' (197) इति देवः ।

अर्हकः-र्हिका, अर्हकः-र्हिका, [2]अर्जिहिषकः-षिका ; .

अर्हिता-त्री, अर्हयिता-त्री, अर्जिहिषिता-त्री ;

अर्हन्-न्ती, अर्हयन्-न्ती, अर्जिहिषन्-न्ती ;

अर्हिष्यन् - न्ती-ती, अर्हयिष्यन्-न्ती - ती, अर्जिहिषिष्यन्-न्ती-ती;

— अर्हयमाणः, अर्हयिष्यमाणः ;

[3]अर्ट्-अर्ड्-अर्हौ-अर्हः ; — —

अर्हः, पूजा[4]र्हः-पूजार्हा, अर्हः, अर्जिहिषुः, अर्जिहयिषुः, [5]अर्हन् ;

1. 'गुरोश्च हलः' (3-3-103) इति स्त्रियां अकारप्रत्ययः भावादौ ।
2. 'न न्द्राः—' (6-1-3) इति रेफस्य द्वित्वनिषेधे 'कुहोश्चुः' (7-4-62) इति चुत्वम् ।
3. 'हो ढः' (8-2-31) इति ढत्वम् ।
4. 'अर्हः' (3-2-12) इत्यच् कर्मण्युपपदे । अदन्तत्वात् टाप् ।
5. 'अर्हः प्रशंसायाम्' (3-2-133) इति प्रशंसायां शता । प्रशंसाया अन्यत्र 'वधमर्हति चोरः' इति लडेव ।

अर्हितव्यम् ,	अर्हयितव्यम् ;	अर्जिहिषितव्यम् ;
[A]अर्हणीयम् ,	अर्हणीयम् ,	अर्जिहिषणीयम् ;
अर्ह्यम् ,	अर्ह्यम् ,	अर्जिहिष्यम् ;
ईषदर्हः, दुरर्हः, स्वर्हः ;		—
अर्ह्यमाणः,	अर्ह्यमाणः,	अर्जिहिष्यमाणः ;
अर्हः, [1]अर्घः,	अर्हः,	अर्जिहिषः ;
अर्हितुम् ,	अर्हयितुम् ,	अर्जिहिषितुम् ;
अर्हा,	अर्हणा,	अर्जिहिषा, अर्जिहयिषा ;
अर्हणम् ,	अर्हणम् ,	अर्जिहिषणम् ;
अर्हित्वा,	अर्हयित्वा,	अर्जिहिषित्वा ;
समर्ह्य,	समर्ह्य,	समर्जिहिष्य ;
अर्हम् २, }	अर्हम् २, }	अर्जिहिषम् २ ; }
अर्हित्वा २, }	अर्हयित्वा २, }	अर्जिहिषित्वा २. }

(45) **" अर्ह पूजायाम् "** (X-चुरादिः-1732-सक. सेट्. उभ.)

'—पूजनेऽर्हति चार्हयेत ।' (197) इति **देवः** ।

पूर्वोक्तभौवादिकार्हतिवत् (44) रूपाणि सर्वाणि ज्ञेयानि । ण्यन्तात् सनि तु इमानि रूपाणि—

अर्जिहयिषकः-षिका ;	अर्जिहयिषितव्यम् ;
अर्जिहयिषिता-त्री;	अर्जिहयिषणीयम् ;
अर्जिहयिषन्-न्ती;	अर्जिहयिष्यम् ;
अर्जिहयिषिष्यन्-न्ती-ती ;	ईषदर्जिहयिषः-दुरर्जिहयिषः-स्वर्जिहयिषः ;
अर्जिहयिषमाणः ;	अर्जिहयिष्यमाणः;
अर्जिहयिषिष्यमाणः ;	अर्जिहयिषः ;
अर्जिहयिषितम्-तः-तवान् ;	अर्जिहयिषितुम् ;
अर्जिहयिषुः ;	अर्जिहयिषा ;

1. 'न्यङ्क्वादीनां च' (7-3-53) इति कुत्वम् । 'मूल्ये पूजाविधावर्घः—' **इत्यमरः**

A. 'गोविन्दस्तुहिनांशुरम्यवदनः कंसं जगद्दोहिनं प्रोहिष्यञ्जगदर्हणीयमहिमा मोदेन निन्ये निशाम्' धा. का. 1-92.

अर्जिहयिषणम् ;	अर्जिहयिषम् २; }
अर्जिहयिषित्वा ;	अर्जिहयिषित्वा २ ; }
समर्जिहयिष्य ;	इति ॥

(45A) **" अर्ह पूजायाम् "** (X-चुरादिः-1831. सक. से. उभ.)

आधृषीयः ।

'—पूजनेऽर्हति चार्हयेत ।' (197) इति **देवः** ।)

'आधृषाद्वा' (गणसूत्रं चुरादौ) इति णिचो वैकल्पिकत्वम् । णिजन्तात् पूजार्थक-चौरादिका (45) र्हयतिवत् , णिजभावपक्षे भौवादिकार्हतिवत् (44) च रूपाणि ज्ञेयानि । **शाकटायनमते** णिजभावपक्षे आत्मनेपदी । तदानीं शानचि 'अर्हमाणः' इति रूपम्—इति विशेषः ।

(46) **" अल भूषणपर्याप्तिवारणेषु "** (I-भ्वादिः-515-सक. से. पर.)

आलकः-लिका,	आलकः-लिका,	अलिलिषकः-षिका ;
अलिता-त्री,	आलयिता-त्री,	अलिलिषिता-त्री ;
अलन्-न्ती,	आलयन्-न्ती,	अलिलिषन् - न्ती ;
अलिष्यन्-न्ती-ती,	आलयिष्यन्-न्ती-ती,	अलिलिषिष्यन्-न्ती-ती;
[A]अलमानः	आलयमानः,	अलिलिषमाणः;
अलिष्यमाणः,	आलयिष्यमाणः,	अलिलिषिष्यमाणः ;
अल् - अलौ-अलः ;	—	—
अलितः-तं-तवान् ,	आलितं-तः,	अलिलिषितः-तवान् ;
अलः, आलः,	अलिलिषुः,	आलिलयिषुः ;
अलितव्यम् ,	आलयितव्यम् ,	अलिलिषितव्यम् ;
अलनीयम् ,	आलनीयम् ,	अलिलिषणीयम् ;
आल्यम् ,	आल्यम् ,	अलिलिष्यम् ;
ईषदलः-दुरलः-स्वलः ;	—	—

A. अयं धातुः स्वरितेत्—इत्येके—इति **सिद्धान्तकौमुदी** । तदानीं शानजपीति विशेषः । **मैत्रेयो**ऽप्येवमेव ।

अल्यमानः, आल्यमानः, अलिलिष्यमाणः ;

आलः, आलः, अलिलिषः, [1]आली-आलिः, अ[2]लकम्, अ[3]लका ;

अलितुम्, आलयितुम्, अलिलिषितुम् ;

[4]अलितिः, आलना, अलिलिषा, आलिलयिषा ;

अलनम्, आलनम्, अलिलिषणम् ;

अलित्वा, आलयित्वा, अलिलिषित्वा ;

समल्य, समाल्य, समलिलिष्य ;

आलम् २, अलित्वा २, } आलम् २, आलयित्वा २, } अलिलिषम् २ ; अलिलिषित्वा २ . }

(47) "अव रक्षण गति कान्ति प्रीति तृप्ति अवगम प्रवेश श्रवण स्वाम्यर्थ याचन क्रियेच्छा दीप्ति अवाप्ति आलिङ्गन हिंसाऽऽदान भाग वृद्धिषु" (I-भ्वादिः-600 सक. से-पर.)

'अव्=रक्षणे गतौ कान्तौ प्रीतौ तृप्तौ द्युतौ श्रुतौ । प्राप्तौ श्लेषेऽर्थने वेशे भागे वृद्धौ ग्रहे वधे ॥ स्वाम्यर्थेऽवगमे कामे कृतौ— ' इति **बोपदेवः** ।

आवकः-विका, आवकः-विका, अविविषकः-षिका ;

अविता-त्री, आवयिता-त्री, अविविषिता-त्री ;

अवन्[A]-न्ती, आवयन्-न्ती, अविविषन्-न्ती ;

अविष्यन्-न्ती-ती, आवयिष्यन्-न्ती-ती, अविविषिष्यन्-न्ती-ती ;

—, आवयमानः, आवयिष्यमाणः ;

---

1. 'इञ् वपादिभ्यः' (वा. 3-3-108) इतीञ् । 'कृदिकारादक्तिनः' (ग. सू. 4-1-45) इति ङीष् ।
2. 'क्वुन् शिल्पिसंज्ञयोः' (द. उणा-3-5.) इति क्वुन् ।
3. 'क्षिपकादीनां च' (वा. 7-3-44) इति इत्वं न ।
4. 'तितुत्रेष्वग्रहादीनां—' (7-2-9. वा) इति पर्युदासात् इड् भवति ।

A. तव विदितविषादो दृष्टकृत्स्नाऽऽमिषादः श्रियमनिशमवन्तं पर्वतं माल्यवन्तम् ॥ भ. का. 10-17.

[1]ऊः-जनौः, [1A]जनावौ-जनावः ; —

अवितः-तम्-तवान्, आवितम्, अविविषितम्-तः-तवान् ;

अवः, आवः, अविविषुः, आविवयिषुः ;

अवितव्यम्, आवयितव्यम्, अविविषितव्यम् ;

अवनीयम्, आवनीयम्, अविविषणीयम् ;

आव्यम्, आव्यम्, अविविष्यम् ;

ईषदवः, दुरवः, स्ववः ; — —

अव्यमानः, आव्यमानः, अविविष्यमाणः ;

आवः, आवः, अविविषः ;

[2]ऊतिः, आवना, अविविषा, आविवयिषा ;

अवितुम्, आवयितुम्, अविविषितुम् ;

अवनम्, आवनम्, अविविषणम् ;

अवित्वा, आवयित्वा, अविविषित्वा ;

समव्य, समाव्य, समविविष्य ;

आवम् २, अवित्वा २, } आवम् २, आवयित्वा २, } अविविषम् २ ; अविविषित्वा २ ; }

[3]ओम्, अवनी-[4]अवनिः, ओतुः[5] (बिडालः).

(48) "अश भोजने" (IX-क्र्यादिः-1523. सक. से-पर-)

'व्याप्तावश्नुत इत्याहुः, अश्नातीति तु भोजने ।' (166) इति **देवः** ।

आशकः-आशकः-शिका, अशिशिषकः-षिका, [6]अशाशकः-शिका,

अशिता-त्री, आशयिता-त्री, अशिशिषिता-त्री, अशाशिता-त्री ;

---

1. 'ज्वरत्वर—' (6-4-20) इत्युपधावकारयोरूठ् ।

1A. 'एत्येधत्यूठ्सु' (6-1-89) इति वृद्धिः ।

2. 'ऊतियूति—' (3-3-97) इति क्तिनि उदात्तान्तो निपातितः ।
3. औणादिके मन्प्रत्यये प्रत्ययस्य टिलोपे इडभावे ऊठि गुणे च रूपम् ।
4. औणादिकेऽनिप्रत्यये 'कृदिकारात्—' (4-1-45. ग. सू.) इति ङीषि रूपद्वयम् ।
5. औणादिकः तुन् प्रत्ययः, ऊट् गुणः ।
6. 'सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्यः' (वा. 3-1-22) इति यङ् ।

[1]अश्नन्-ती, आ[2]शयन्-न्ती, अशिशिषन्-न्ती ; —

अशिष्यन्-न्ती-ती, आशयिष्यन्-न्ती-ती, अशिशिषिष्यन्-न्ती-ती ;

— अशाश्यमानः, अशाशिष्यमाणः

[3]अट्-अशौ-अशः ; — —

[3 A]अशितम्-[A]तः, आशितम्-तः, अशिशिषितम्, अशाशितः-तवान् ;

अशः, आशः, [4]अन्नाशः, कुण्डाशी,[5] नराशी,[B] [C]फलाशी, अशि[D]शिषुः ;

अना[6]श्वान् ;

अशितव्यम्, आशयितव्यम्, अशिशिषितव्यम्, अशाशितव्यम् ;

अश[E]नीयम्, आशनीयम्, अशिशिषणीयम्, अशाशनीयम् ;

आश्यम्, आश्यम्, अशिशिष्यम्, अशाश्यम् ;

ईषदशः-दुरशः-स्वशः ; — —

अश्यमानः, आश्यमानः, अशिशिष्यमाणः, अशाश्यमानः ;

आशः, आशः ; अशिशिषः, अशाशः ;

अशितुम्, आशयितुम्, अशिशिषितुम्, अशाशितुम् ;

---

1. 'क्र्यादिभ्यः–' (3-1-81.) इति श्ना-विकरणप्रत्ययः। 'श्नाऽभ्यस्तयोरातः' (6-4-111) इति आलोपः।
2. 'निगरणचलना–' (1-3-87) इति ण्यन्तात् परस्मैपदमेव ।
3. 'व्रश्चभ्रस्ज–' (8-2-36) इति षत्वम् । तस्य जश्त्वेन डः ।

3. A 'क्तोऽधिकरणे च ध्रौव्यगति**प्रत्यवसानार्थेभ्यः**' (3-4-76) इति अधिकरणे क्तः ।

4. 'कर्मण्यण्' (3-2-1) इत्यण् ।
5. 'सुप्यजातौ णिनिः–' (3-2-78) इति णिनिः ।
6. 'उपेयिवान्–' (3-2-109) इति नञ्-पूर्वकादस्मात् क्वसन्तो निपातितः ।

A. 'सदोद्गारसुगन्धीनां फलानामलमा**शिताः**' भ. का. (7-38) आङ्-पूर्वात् 'आदिकर्मणि क्तः'– (3-4-71) इति कर्तरि क्तः ।

B. 'परस्त्रीभोगहरणं धर्म एव **नराशिनाम्** । सुखमस्तीत्यभाषिष्ठाः का मे साशङ्कता त्वयि' भ. का. (9-122)

C. '**फलाशिनो** निर्झरकुञ्जभाजः दिव्याङ्गनाऽनङ्गरसानभिज्ञाः । ' भ. का. (12-49)

D. 'लोकान**शिशिषो**स्तुल्यः कृतान्तस्य विपर्यये । वने चिकरिषोर्वृक्षान् बलं जिगरिषुः कपेः ॥' भ. का. (3-54)

E. '**अशनीय**मिवाशंसुर्महानायादशोभनः, भ-का. (7-79)

[1]अष्टिः, आशना, अशिशिषा, आशिशयिषा, अशाशा,[2] अशनाया ;[3]

अशनम्, आशनम्, अशिशिषणम् ; अशाशनम् ;

अशित्वा, आशयित्वा, अशिशिषित्वा, अशाशित्वा ;

समश्य, प्राश्य, समशिशिष्य, समशाश्य ;

आशम् २, अशित्वा २, } आशम् २, आशयित्वा २, } अशिशिषम् २, अशिशिषित्वा २, } अशाशम् २ ; अशाशित्वा. }

(49) "अशू व्याप्तौ सङ्घाते च" (V-स्वादिः-1264-सक-वेट् - आ-)

'व्याप्तावश्नुत इत्याहुरश्नातीति तु भोजने। ' इति देवः (166)

आशकः- शिका, आशकः-शिका, [4]अशिशिषकः-षिका, [5]अशाशकः-शिका ;

[6]अष्टा-ष्ट्री, अशिता-त्री, आशयिता-त्री, अशिशिषिता-त्री, अशाशिता-त्री ;

— आशयन्-न्ती, आशयिष्यन्-न्ती-ती ;

[7]अश्नुवानः,[A] आशयमानः, [8]अशिशिषमाणः, अशाश्यमानः;

अशिष्यमाणः अक्ष्यमाणः } आशयिष्यमाणः, अशिशिषिष्यमाणः; अशाशिष्यमाणः

अट्-अशौ-अशः ; — — —

[9]अष्टम् - ष्टः-ष्टवान् [7]आशितम्-तः, अशिशिषितः, अशाशितः-तवान् ;

अशः, आशः, अशिशिषुः, आशिशयिषुः, अशाशः[10] ;

---

1. षत्वम् ष्टुत्वम् । 'तितुत्र–' (7-2-9) इति नेट् ।
2. 'अ प्रत्ययात्' (3-3-102) इत्य-प्रत्ययः ।
3. अशनमात्मन इच्छतीत्यर्थे क्यचि, '**अशना**योदन्यधनाया बुभुक्षापिपासागर्धेषु' (7-4-34) इति निपातनादीत्वाभावः ।
   स्त्रियां क्यजन्तादकारप्रत्ययः ।
4. 'स्मिपूङ्रञ्ज्वशां–' (7-2-74) इति नित्यमिट् ।
5. 'सूचिसूत्रि—' (वा. 3-1-22.) इति यङ् । 'दीर्घोऽकितः' (7-4-83) इत्यभ्यासस्य दीर्घः ।
6. 'स्वरतिसूति—' (7-2-44) इति वा इट् ।
7. 'स्वादिभ्यः—' 3. इति श्नुविकरणप्रत्ययः । 'अचि श्नुधातु—' (6-4-77) इत्युवङ् ।
8. 'पूर्ववत् सनः' (1-3-62) इति शानच् ।
9. ऊदित्त्वात् इड्विकल्पः 'यस्य विभाषा' (7-2-15) इति इण्णिषेधः ।
10. पचाद्यच् (3-1-134.) 'यङोऽचि च' (2-4-74.) इति यङो लुक् ।

A. "शक्त्यृष्टिपरिघप्रासगदामुद्गरपाणयः। **व्यश्नुवाना** दिशः प्रायुः वनं दृष्टिविषोपमाः" भ. का. (9.4.)

अशितव्यम् , } आशयितव्यम्, अशिशिषितव्यम् , अशाशितव्यम् ;
अष्टव्यम् , }

अशनीयम् , आशनीयम् , अशिशिषणीयम् , अशाशनीयम् ;

आश्यम् , आश्यम् , अशिशिष्यम् , अशाश्यम् ;

ईषदशः-दुरशः-स्वशः , — —

अश्यमानः, आश्यमानः, अशिशिष्यमाणः, अशाश्यमानः ;

आशः, आशः, अशिशिषः, अशाशः ;

अशितुम् , } आशयितुम् , अशिशिषितुम् , अशाशितुम् ;
अष्टुम् , }

अष्टिः, आशना, अशिशिषा, आशिशयिषा, अशाशा[1] ;

अशनम् , आशनम् , अशिशिषणम् , अशाशनम् ;

अशित्वा, } आशयित्वा, अशिशिषित्वा, अशाशित्वा ;
अष्ट्वा , }

समश्य, प्राश्य, प्राशिशिष्य , समशाश्य ,

आशम् २, } आशम् २, } अशिशिषम् २, } अशाशम् २, }
अशित्वा २, } आशयित्वा २, } अशिशिषित्वा २, } अशाशित्वा २, }
अष्ट्वा २, }

[2]अश्वः, [3] अशनिः, [4] अश्मा, [5]अक्षः, [6]अक्षरम् , —इमे औणादिकाः ।

(50) " अष गतिदीप्त्यादानेषु "

(I-भ्वादिः-886-सक-सेट्-उभयपदी)

उत्तरत्र विलेख्यमानस्य अस (51) धातोः पाठभेदोऽयम् - तद्वत् सर्वाणि रूपाणि बोध्यानि ।

1. ' अ प्रत्ययात् ' (3-3-102) । इति यङन्तात् अकारप्रत्ययः ।
2. क्वन्प्रत्ययः (द. उ. 8-125) ।
3. अनिप्रत्ययः (द. उ. 1-1.) ।
4. मनिन् (द. उ. 6-75) प्रत्ययः ।
5. सः प्रत्ययः (द. उ. 9. 24.) ।
6. ' अशेः सरन् ' (द. उ. 8. 50) इति सरन्प्रत्ययः ।

(51) " अस गतिदीप्त्यादानेषु "

(I-भ्वादिः-886-सक-सेट् - उभयपदी)

'असतेऽसति गत्यादौ, भुव्यस्ति, क्षेपणेऽस्यति ।' (184 श्लोकः ।) इति देवः ।

आसकः-सिका, आसकः-सिका, [1]असिसिषकः-षिका ;

असिता-त्री, आसयिता-त्री, असिसिषिता-त्री ;

असन्-न्ती, आसयन्-न्ती, असिसिषन्-न्ती ;

असिष्यन्-न्ती-ती, आसयिष्यन्-न्ती-ती, असिसिषिष्यन्-न्ती-ती ;

असमानः, आसयमानः, असिसिषमाणः ;

असिष्यमाणः, आसयिष्यमाणः, असिसिषिष्यमाणः ;

[2]अः, असौ, असः ; — —

असितम्-तः, आसितम्-तः, असिसिषितः-तवान् ;

असः, आसः, असिसिषुः, आसिसयिषुः ;

असितव्यम् , आसयितव्यम्, असिसिषितव्यम् ;

असनीयम् , आसनीयम् , असिसिषणीयम् ;

आस्यम्, आस्यम् , असिसिष्यम् ;

ईषदसः, दुरसः, स्वसः, — —

आसः, आसः, असिसिषः ;

असितुम् , आसयितुम्, असिसिषितुम् ;

अस्तिः, आसना, असिसिषा, आसिसयिषा ;

असनम् , आसनम् , असिसिषणम् ;

असित्वा, आसयित्वा, असिसिषित्वा ;

प्रास्य, समास्य, प्रासिसिष्य ;

आसम् २, } आसम् २, } असिसिषम् २ ; }
असित्वा २, } आसयित्वा २, } असिसिषित्वा २. }

1. ' सन्यङोः ' (6-1-9) इति द्वित्वम् ।
2. क्विपि, ' ससजुषो रुः ' (8-2-66) इति रुत्वम् । ' खरवसानयोर्विसर्जनीयः ' (8-3-15) इति विसर्गः ।

(52) " **अस भुवि** " (II-अदादिः-1065-अक. सेट्. पर.)

'असतेऽसति गत्यादौ' भुव्यस्ति, क्षेपणेऽस्यति' (184) इति **देवः** ।

[1]भावकः-विका, भावकः-विका, [1A]बुभूषकः-षिका, [2]बिभावयिषकः-षिका, [2A] बोभूयकः-यिका ;

भविता, भावयिता, बुभूषिता, बिभावयिषिता-बोभूयिता-त्री;

[3]सन्-सती, भावयन्, बुभूषन्, बिभावयिषन्-न्ती ;

भविष्यन्, भावयिष्यन्, बुभूषिष्यन्, बिभावयिषिष्यन्-न्ती-ती;

[3A]व्यतिषाणः, भावयमानः, भावयिष्यमाणः, बोभूयमानः, बोभूयिष्यमाणः ;

भूः-भुवौ-भुवः ; — — —

[4]भूतः-तम्-तवान्, भावितः, बुभूषितः, बिभावयिषितः-बोभूयितः-तवान् ;

भवः, भावः, बुभूषुः, बिभावयिषुः, बोभूयः ;

भवितव्यम्, भावयितव्यम्, बुभूषितव्यम्, बिभावयिषितव्यम्, बोभूयितव्यम् ;

भवनीयम्, [5]प्रभवनीयम्, } प्र[6]भावनीयम्, बुभूषणीयम्, बिभावयिषणीयम्, बोभूयनीयम् ;

[6A]भव्यम्, अवश्य[7]भाव्यम्, भाव्यम्, बुभूष्यम्, बिभावयिष्यम्, बोभूय्यम् ;

ईषद्भवम्, दुर्भवम्, सुभवम् ; — —

भूयमानः, भाव्यमानः, बुभूष्यमाणः, बिभावयिष्यमाणः, बोभूय्यमानः ;

---

1. 'अस्तेर्भूः' (2-4-52) इति आर्धधातुकविषये 'भू' आदेशः ।

1. A 'सनि ग्रहगुहोश्च' (7-2-12) इति इण्णिषेधः। 'इको झल्' (1-2-9) इति सनः कित्त्वम् ।

2. 'ओः पुयण्ज्यपरे' (7-4-80) इति अभ्यासोकारस्येत्त्वम् ।

2. A आर्धधातुकविवक्षायां भूभावः। अतश्च हलादित्वात् यङ्प्रत्यय उत्पद्यते—यथा **अज**धातौ । 'गुणो यङ्लुकोः' (7-4-82) इत्यभ्यासे गुणः ।

3. 'श्नसोरल्लोपः' (6-4-111) इति धात्वकारस्य लोपः। शतुः सार्वधातुकत्वात् भूभावो न ।

3.A 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानच्' । 'श्नसोरल्लोपः' (6-4-111) इति धात्वकारलोपः। 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' (8-3-87) इति षत्वम् ।

4. 'श्र्युकः किति' (7-2-11) इतीण्णिषेधः ।

5. 'न भाभू–' (8-4-34) इति णत्वं न।

6. 'ण्यन्तभादीनां–' (वा 8-4-34) इति णत्वं न ।

6. A 'अचो यत्' (3-1-97) इति यत्।

7. 'ओरावश्यके' (3-1-125) इति ण्यत्।

[1]भवः भावः } [2]भावः, बुभूषः ; बिभावयिषः, बोभूयः ;

भवितुम्, भावयितुम्, बुभूषितुम्, बिभावयिषितुम्, बोभूयितुम् ;

भूतिः, भावना, बुभूषा, बिभावयिषा, बोभूया ;

भवनम्, भावनम्, बुभूषणम्, बिभावयिषणम्, बोभूयनम् ;

भूत्वा, भावयित्वा, बुभूषित्वा, बिभावयिषित्वा, बोभूयित्वा ;

अनुभूय, अनुभाव्य, अनुबुभूष्य, अनुभावयिष्य, अनुबोभूय्य ;

भावम् २, भूत्वा २, } भावम् २, भावयित्वा २, } बुभूषम् २, बुभूषित्वा २, } बिभावयिषम् २ ; बिभावयिषित्वा २; }

बोभूयम् २; बोभूयित्वा २. }

(53) " **असु क्षेपणे** " (IV-दिवादिः-1209. सक. से. पर.)

'असतेऽसति गत्यादौ, भुव्यस्ति, क्षेपणेऽस्यति ।' (184) इति **देवः** ।

आसकः-सिका, आसकः-सिका, असिसिषकः-षिका ;

असिता-त्री, आसयिता-त्री, असिसिषिता-त्री ;

[3]अस्यन्-न्ती, निरस्यन्, } आसयन्-न्ती, असिसिषन्-न्ती;

असिष्यन्-न्ती-ती, आसयिष्यन्-न्ती-ती, असिसिषिष्यन्-न्ती-ती ;

[4]निरस्यमानः, निरस्यन्, आसयमानः, आसयिष्यमाणः ;

अः-असौ-असः ; — —

[5]निरस्तम्-[A]स्तवान्, [B]असितमनेन, } आसितः, असिसिषितः-तवान् ;

असः, सन्न्यासी[C], आसः, असिसिषुः, आसिसयिषुः ;

---

1. 'ऋदोरप्' (3-3-57) इत्यप् भावे।

2. 'एरच्' (3-3-56) इत्यच् ।

3. 'दिवादिभ्यः श्यन्' (3-1-69) इति श्यन् ।

4. 'उपसर्गादस्यत्यूह्योर्वावचनम्' (वा. 1-3-29) इति शानजपि ।

5. धातोरुदित्त्वात् 'यस्य विभाषा' (7-2-15) इतीण्ण ।

A. 'राक्षसान् बटुयज्ञेषु पिण्डीशूरान् **निरस्तवान्** ।' भ.का. (5-85.)

B.' **सौनागा** अस्यतेर्भावे निष्ठायां विकल्पेन इटमिच्छन्ति' इति **काशिका** (7-2-17.)। तेन इदमपि रूपं साधु ।

C. 'उवाच मारुतिर्वृद्धे **सन्न्यासिन्यत्र** वानरान्' भ. का. (7-76.)

असितव्यम्,	आसयितव्यम्,	असिसिषितव्यम्;
असनीयम्,	आसनीयम्,	असिसिषणीयम्;
आस्यम्, समस्या[1],	आस्यम्,	असिसिष्यम्;
ईषदसः, दुरसः, स्वसः;	—	—
[A]अस्यमानः,	आस्यमानः,	असिसिष्यमाणः;
निरासः, व्यासः,[B] प्रासः[2] इष्वासः[2A],		आसः, असिसिषः;
असितुम्,	आसयितुम्,	असिसिषितुम्;
अस्तिः, उपास्तिः,	आसना,	असिसिषा, आसिसयिषा;
निरसनम्,	निरासनम्,	असिसिषणम्;
[3]असित्वा, अस्त्वा,	आसयित्वा,	असिसिषित्वा;
पर्यस्य-न्यस्य[C]-निरस्य,	निरास्य,	निरसिसिष्य;

आसम् २, असित्वा २, अस्त्वा २; } [4]द्रुघहात्यासं गाःपाययति, } आसम् २, आसयित्वा २, } असिसिषम् २; असिसिषित्वा २; }

[5]असुरः, असिः[6]:.

(54) "अंस[D] सङ्घाते" (X-चुरादिः-1918. सक. से. उभय.)

अदन्तः।

अंसकः-सिका,	अंसिसयिषकः-षिका;
अंसयिता-त्री,	अंसिसयिषिता-त्री;

1. बाहुलकात् संज्ञायां क्यपि **समस्या** इति रूपं साधु।
2. प्रास्यते इति प्रासः। 'अकर्तरि च कारके संज्ञायाम्' (3-3-19) इति भावे घञ्।

2A. इषवोऽस्यन्ते अनेन इति **इष्वासः**। 'हलश्च' (3-3-121.) इति करणे घञ्। '**इष्वासो** धन्वधन्विनोः' इति **हैमः**।' इति **अमरसुधा**।

3. 'उदितो वा' (7-2-56) इतीड् वा।
4. 'अस्यतितृषोः क्रियान्तरे कालेषु (3-4-57) इति णमुल्।
5. 'असेरुरन्' (द. उ. 8-24.) इति उरन्।
6. अस्यतीति=**असिः**। इः प्रत्ययः। (द. उ. 1. 68.)

A. 'दीव्यमानं शितान् बाणान् **अस्यमानं** महागदाः।' भ. का. (5-81.)

B. 'नाडायनो बादरिकश्च तस्मै **व्यासश्च** कानीनमुनिर्गरीयान्।' **वा. वि.** 1-64.

C. 'भ्रातरि **न्यस्य** यातो मां मृगावित् मृगयामसौ' भ. का. (5. 82.)

D. "अंश समाघाते'। समाघातो=विभाजनम्। अंशयति। **चन्द्रो** दन्त्यान्तमाह-अंसयति। मयूरव्यंसकः।" इति **क्षीरतरङ्गिणी**।

अंसयन्-न्ती,	अंसिसयिषन्-न्ती;
अंसयिष्यन्-न्ती-ती,	अंसिसयिषिष्यन्-न्ती-ती;
अंसयमानः,	अंसिसयिषमाणः;
अंसयिष्यमाणः,	अंसिसयिषिष्यमाणः;
अन्[1]-अंसौ-अंसः;	—
अंसितम्-तः,	अंसिसयिषितम्-तः-तवान्;
अंसः,	अंसिसयिषुः;
अंसयितव्यम्,	अंसिसयिषितव्यम्;
अंसनीयम्,	असिसयिषणीयम्;
अंस्यम्,	अंसिसयिष्यम्;
ईषदंसः, दुरंसः, स्वंसः;	—
अंस्यमानः,	अंसिसयिष्यमाणः;
अंसः,	अंसिसयिषः;
अंसयितुम्,	अंसिसयिषितुम्;
अंसना,	अंसिसयिषा;
अंसनम्,	अंसिसयिषणम्;
अंसयित्वा,	अंसिसयिषित्वा;
समंस्य[2], उदंस्य,[A],	समंसिसयिष्य;

अंसम् २, अंसयित्वा २, } अंसिसयिषम् २; अंसिसयिषित्वा २. }

(55) "अह व्याप्तौ" (V-स्वादिः-1272-सक.सेट्.पर.)

आहकः-हिका,	आहकः-हिका,	अजिहिष[3]कः-षिका;
अहिता-त्री,	आहयिता-त्री,	अजिहिषिता-त्री;

1. 'संयोगान्तस्य लोपः' (8-2-23) इति सलोपः।
2. अल्लोपणिलोपयोः स्थानिवद्भावात् 'अनिदितां—' (6-4-24) इति नलोपो न।

A. 'लोके वष्कयतीह चित्रितमहामञ्चे स्वयं चित्रयन् दोष्णा खड्गमुदंस्य तस्य वटयन् हस्तादगृह्लादमुम्॥' धा. का. 3-61.

3. 'कुहोश्चुः' (7-4-62) इति अभ्यासस्य चुत्वम्।

अहुव[1]न्-ती,	आहयन्-न्ती,	अजिहिषन्-न्ती ;
अहिष्यन्-न्ती-ती,	आहयिष्यन् न्ती-ती,	अजिहिषिष्यन्-न्ती-ती,
—	आहयमानः,	आहयिष्यमाणः,
अ[2]ट्-अड्-अहौ-अहः,	—	—
अहितम्-तः,	आहितः,	अजिहिषितः-तवान् ;
अहः,	आहः, अजिहिषुः,	आजिहयिषुः ;
अहितव्यम्,	आहयितव्यम्,	अजिहिषितव्यम् ;
अहनीयम्,	आहनीयम्,	अजिहिषणीयम् ;
आह्यम्,	आह्यम्,	अजिहिष्यम् ;
ईषदहः, दुरहः, स्वहः,	—	—
अह्यमानः,	आह्यमानः,	अजिहिष्यमाणः ;
आहः,	आहः,	अजिहिषः ;
अहितुम्,	आहयितुम्,	अजिहिषितुम् ;
[3]आढिः,	आहना,	अजिहिषा, आजिहयिषा ;
अहनम्,	आहनम्,	अजिहिषणम् ;
अहित्वा,	आहयित्वा,	अजिहिषित्वा ;
समह्य,	समाह्य,	समजिहिष्य ;
आहम् २, अहित्वा २,	आहम् २, आहयित्वा २,	अजिहिषम् २; अजिहिषित्वा २.

(56) '**अहि गतौ**' (I-भ्वादिः-635-सक-सेट्. आत्मनेपदी)

'अहि ह्लिह वक्रगतौ' इति **काशकृत्स्नधातुपाठे** पठ्यते–इति **क्षीरस्वामी।**

[4]अंहकः-हिका,	अंहकः-हिका,	अञ्जि[5]हिषकः-षिका ;
अंहिता-त्री,	अंहयिता-त्री,	अञ्जिहिषिता-त्री ;

1. 'स्वादिभ्यः श्नुः' (3-1-73) इति श्नुः। 'अचि श्नु–' (6-4-77) इत्युवङ्।
2. 'हो ढः' (8-2-31) इति ढत्वम्।
3. ढत्व-धत्व-ष्टुत्व-ढलोप-दीर्घाः।
4. 'इदितो नुम् धातोः' (7-1-58) इति नुम्।
5. 'न न्द्राः संयोगादयः' (6-1-3) इति द्वित्वनिषेधो नकारस्य। 'कुहोश्चुः' (7-4-62) इति चुत्वे, 'अनुस्वारस्य ययि' (8-4-58) इति परसवर्णः ।

अंहयन्-न्ती,	अंहयिष्यन्-न्ती-ती ;	—
अंहमानः,	अंहयमानः,	अञ्जिहिषमाणः ;
अंहिष्यमाणः.	अंहयिष्यमाणः,	अञ्जिहिषिष्यमाणः ;
अन्-अंहौ-अंहः ;	—	—
अंहितः-तं,	अंहितः,	अञ्जिहिषितः–तवान् ;
अंहः, अंहः,	अञ्जिहिषुः,	अञ्जिहयिषुः ;
अंहितव्यम्,	अंहयितव्यम्,	अञ्जिहिषितव्यम् ;
अंहनीयम्,	अंहनीयम्,	अञ्जिहिषणीयम् ;
अंह्यम्,	अंह्यम्,	अञ्जिहिष्यम् ;
ईषदंहः, दुरंहः, स्वंहः ;	—	—
अंह्यमानः,	अंह्यमानः,	अञ्जिहिष्यमाणः ;
अंहः,	अंहः,	अञ्जिहिषः ;
अंहितुम्,	अंहयितुम्,	अञ्जिहिषितुम् ;
अंहा[1], अंहना,	अञ्जिहिषा[A],	अञ्जिहयिषा ;
अंहनम्,	अंहनम्,	अञ्जिहिषणम् ;
अंहित्वा,	अंहयित्वा,	अञ्जिहिषित्वा ;
समंह्य,	समंह्य,	समञ्जिहिष्य ;
अंहम् २, अंहित्वा २,	अंहम् २, अंहयित्वा २,	अञ्जिहिषम् २, अञ्जिहिषित्वा २;

[2]अंहः-अंहसी.

(57) "**अहि भाषार्थः**" (X-चुरादिः-1798. अक. से. उभ.)

"**अहि भासार्थः**" **इति क्षीरस्वामी।**

इदित्करणसामर्थ्यात् णिचो वैकल्पिकत्वम्। णिच्पक्षे, णिजभावपक्षे च, पूर्वोक्तभौवादिकांहति (56) वद्रूपाणि ज्ञेयानि। परं तु, अस्य धातोः

1. 'गुरोश्च हलः' (3-3-103) इति अप्रत्ययः।
2. औणादिकः असुन्प्रत्ययः। पापमर्थः। 'कलुषं वृजिनैनोघमंहोदुरितदुष्कृतम्।' इत्यमरः।

A. 'आंहिष्ट जाताञ्जिहिषस्तदाऽसौ उत्कण्ठमानो भरतो गुरूणाम्॥' भ. का. (3-25) जाता अञ्जिहिषा यस्य स इति बहुव्रीहिः।

णिजभावपक्षे 'शेषात् कर्तरि परस्मैपदम्' (1-3-78) इति परस्मैपदित्वमेव। तदानीं शतरि-अंहन्-न्ती, अंहिष्यन्-न्ती-ती; [A]दुरंहः, इति रूपाणि। ण्यन्तात् सनि तु—

अञ्जि[1]हयिषकः-षिका ;	अञ्जिहयिष्यम् ;
	ईषदञ्जिहयिषः-इत्यादि ;
अञ्जिहयिषिता-त्री ;	अञ्जिहयिष्यमाणः ;
अञ्जिहयिषन्-न्ती ;	अञ्जिहयिषः ;
अञ्जिहयिषिष्यन्-न्ती-ती ;	अञ्जिहयिषा ;
अञ्जिहयिषमाणः ;	अञ्जिहयिषितुम् ;
अञ्जिहयिषिष्यमाणः ;	अञ्जिहयिषणम् ;
अञ्जिहयिषितः-तवान् ;	अञ्जिहयिषित्वा ;
अञ्जिहयिषुः ;	समञ्जिहयिष्य ;
अञ्जिहयिषितव्यम् ;	अञ्जिहयिषम् २ ; अञ्जिहयिषित्वा २ ;
अञ्जिहयिषणीयम् ;	इत्यादिरूपाणीति विशेषः।

आकारादिधातवः।

(58) "आछि आयामे" (I-भ्वादिः-209-अक. से. पर-)

[2]आञ्छकः-ञ्छिका,	आञ्छकः-ञ्छिका,	आञ्चिच्छिषकः[3]-षिका ;
आञ्छिता, त्री,	आञ्छयिता-त्री,	आञ्चिच्छिषिता-त्री ;
आञ्छन्-न्ती,	आञ्छयन्-न्ती,	आञ्चिच्छिषन्-न्ती ;
आञ्छिष्यन्-ती-न्ती,	आञ्छयिष्यन्-ती-न्ती,	आञ्चिच्छिषिष्यन्-न्ती-ती ;
—	आञ्छयमानः,	आञ्छयिष्यमाणः ;

1. 'न न्द्राः संयोगादयः' (6-1-3) इति नकारस्य द्वित्वनिषेधः। 'कुहोश्चुः' (7-4-62) इति चुत्वम्। अनुस्वारः। परसवर्णश्च।
2. 'इदितो नुम् धातोः' (7-1-58) इति नुम्।
3. 'न न्द्राः—' (6-1-3) इति नकारस्य द्वित्वनिषेधः। 'छे च' (6-1-73) इति अभ्यासस्य तुक्। चुत्वम्।

A. "वीर्यं दुरंहमभिरंहय मंहयाभां मौग्ध्यं प्रलण्डय च तोडय निर्भयत्वम्। संनाडयन्त्य इति पूरितरोजशङ्का नार्यो हरेः समरकेलिमसिष्वदन्त॥" धा. का. 3-47.

[1]आन्-आञ्छौ-आञ्छः ;	—	—
आञ्छितम्-[A]तः,	आञ्छितः,	आञ्चिच्छिषितम्-तः-तवान् ;
आञ्छः, आञ्छः,	आञ्चिच्छिषुः,	आञ्चिच्छयिषुः ;
आञ्छितव्यम्,	आञ्छयितव्यम्,	आञ्चिच्छिषितव्यम् ;
आञ्छनीयम्,	आञ्छनीयम्,	आञ्चिच्छिषणीयम् ;
आञ्छ्यम्,	आञ्छ्यम्,	आञ्चिच्छिष्यम् ;
ईषदाञ्छः, दुराञ्छः,	स्वाञ्छः ;	—
[2]आञ्छ्यमानः,	आञ्छ्यमानः,	आञ्चिच्छिष्यमाणः ;
आञ्छः,	आञ्छः,	आञ्चिच्छिषः ;
आञ्छितुम्,	आञ्छयितुम् ;	आञ्चिच्छिषितुम् ;
आञ्छा, आञ्छना,	आञ्चिच्छिषा,	आञ्चिच्छयिषा ;
आञ्छनम्,	आञ्छनम्,	आञ्चिच्छिषणम् ;
आञ्छित्वा,	आञ्छयित्वा,	आञ्चिच्छिषित्वा ;
समाञ्छ्य,	समाञ्छ्य,	समाञ्चिच्छिष्य ;
आञ्छम् २, आञ्छित्वा २,	आञ्छम् २, आञ्छयित्वा २,	आञ्चिच्छिषम् २ ; आञ्छिच्छिषित्वा २ ;

(59) "आप्लृ व्याप्तौ" (V-स्वादिः-1260. सक. अनिट्-पर.)

"आपयत्यापतीत्यापेर्यौ वा णौ लम्भने पदे। व्याप्त्यर्थस्यास्य तु स्वादेराप्नोतीति पदं भवेत्॥" (137) इति देवः।

आपकः-प्रापकः-पिका,	आपकः-पिका,	ईप्सकः[3]प्सिका ;
आप्ता-प्त्री,	प्रापयिता-त्री,	ईप्सिता-त्री ;
[4]आप्नुवन्-वती,	प्रापयन्-न्ती,	ईप्सन्-न्ती ;

1. छकारस्य 'संयोगान्तस्य—' (8-2-23) इति लोपः।
2. इदित्त्वात् 'अनिदितां—'(6-4-24) इति नलोपो न।
3. सनि 'आप्ज्ञपृधामीत्' (7-4-55) इतीत्वे, द्वित्वे, 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपः।
4. 'स्वादिभ्यः—' (3-1-73) इति श्नुप्रत्यये उवङ्।

A. 'सुरार्चिते म्लेच्छजनैर्दुरासदे श्रीलञ्छिताङ्गे स्मितपुष्पलाञ्छिते। यत्र स्थिते वाञ्छितदे हरिद्रुमे तदाञ्छितहीञ्छनमास्त नन्दनम्॥' धा. का. 1-28.
'दोर्दण्डाञ्छितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यतः—' इति श्लोकः **क्षीरस्वाम्युपात्तः**।

आप्स्यन्-न्ती-ती,	आपयिष्यन्-न्ती-ती,	ईप्सिष्यन्-न्ती-ती ;
—	प्रापयमाणः,	प्रापयिष्यमाणः ;
आपः[1] ;	—	—
आप्तः-[A]संप्राप्तः-प्तम्-प्तवान्,	प्रापितम्,	[B]ईप्सितः-तवान् ;
आपः, आपः, व्यापी-व्यापिनी,[C]	ईप्सुः, आपिपयिषुः ;	—
आप्तव्यम्,	आपयितव्यम्,	ईप्सितव्यम् ;
आपनीयम्,	प्रापणीयम्,	ईप्सनीयम् ;
[D]संप्राप्यः, } आप्यम्, }	— प्राप्यम्,	— ईप्स्यम् ;
ईषदापः-दुरापः-स्वापः ;	—	—
प्राप्यमानः,	प्राप्यमानः,	ईप्स्यमानः ;
आपः,	आपः,	ईप्सः ;
आप्तुम्,	आपयितुम्,	ईप्सितुम् ;
[2]आप्तिः,	प्रापणा,	ईप्सा, आपिपयिषा ;
प्रापणम्,	आपनम्,	ईप्सनम् ;
आप्त्वा,	आपयित्वा,	ईप्सित्वा ;
प्राप्य,	[E]प्रापय्य[3]=प्राप्य,	प्रेप्स्य ;

1. 'आप्नोतेर्ह्रस्वश्च' (द. उ. 7-1.) इति क्विप्सन्नियोगेन ह्रस्वत्वे, 'अप्तृन्—' (6-4-11) इति सर्वनामस्थाने दीर्घः । 'आपः स्त्री भूम्नि वार्वारि—' इति अमरकोशात् नित्यं बहुवचनम् ।
2. 'क्तिन् आबादिभ्यः निष्ठायामनिड्भ्यः' (वा. 3-3-94) इति क्तिन् । 'गुरोश्च हल' (3-3-103) इत्यस्यापवादः ।
3. 'विभाषाऽऽपः' (6-4-57) इति णेरयादेशो वा ।

A. 'तस्य मित्रीयतो दूतः **संप्राप्तो**ऽस्मि वशंवदः' भ. का. 6-100.
B. 'अन्वयादिविभिन्नानां यथासंख्य**मनीप्सितम्**' भ. का. 9. 132.
C. 'दिग्**व्यापिनी**र्लोचनलोभनीया मृजाऽन्वयाः स्नेहमिव स्रवन्तीः' भ. का. 2-13.
D. '**संप्राप्यो** निजशक्तिराद्धतपसः साधोः स देवोऽपि तामृज्वीकर्तुमुपानशे सुकृतिनीं प्रस्तिघ्नुवानः खलान् ॥' धा. का. 2-69.
E. '**प्रापय्य** शौरिमथ तां भगिनीं च वाक्यैरक्षीणसौहृदमपेतशुचाऽवतानीत्' वा. वि. 3-56.

आपम् २, }	आपम् २, }	ईप्सम् २ ; }
आप्त्वा २, }	आपयित्वा २, }	ईप्सित्वा २ ; }

(60) "आप्लृ लम्भने" (X-चुरादिः-1840-सक. सेट्. उभ.)

आधृषीयः । लम्भनम्=प्राप्तिः—इति क्षीरस्वामी ।

'आपयत्यापतीत्यापेर्यौ वा णौ लम्भने पदे । व्याप्त्यर्थस्यास्य तु स्वादेराप्नोतीति पदं भवेत् ॥' (137) इति **देवः** ।

आधृषीयत्वात् णिचो वैकल्पिकत्वम् । णिच्पक्षे रूपाणि पूर्वं लिखितस्याप्नोतेरिव (59) ज्ञेयानि । णिजभावपक्षे 'शेषात् कर्तरि परस्मैपदम्' (1-3-78) इति परस्मैपदित्वमेव । तत्र शतरि [A]**'आपन्-न्ती'** इत्येव रूपम् ; शप औत्सर्गिकत्वात् । ईप्सकः-इत्यादि च रूपम् । ण्यन्तात् सनि तु—

आपिपयिषकः-षिका,	आपिपयिष्यम् ;
आपिपयिषिता-त्री,	आपिपयिष्यमाणः ;
आपिपयिषन्-न्ती,	आपिपयिषितुम् ;
आपिपयिषिष्यन्-न्ती-ती,	आपिपयिषः ;
आपिपयिषमाणः,	आपिपयिषा ;
आपिपयिषिष्यमाणः,	आपिपयिषणम् ;
आपिपयिषितः-तं-तवान्,	आपिपयिषित्वा ;
आपिपयिषुः,	समापिपयिष्य ;
आपिपयिषितव्यम् ;	आपिपयिषम् २ ; } इति रूपाणि
आपिपयिषणीयम् ;	आपिपयिषित्वा २ ; } ज्ञेयानि ।

(61) "आस उपवेशने" (II-अदादिः-1021—अक. से. आ.)

आसकः-सिका, आसकः-सिका, आसिसिषकः-षिका, दुरासिका[1] ;
आसिता-त्री, आसयिता-त्री, आसिसिषिता-त्री ;

1. 'संज्ञायाम्' (3-3-109) इति ण्वुल् । 'दुरीश्वरद्वारबहिर्वितर्दिका**दुरासिका**यै रचितोऽयमञ्जलिः ।' इति **वैराग्यपञ्चके** (3) ।

A. "**आपन्** खेदमरिं तनञ्जनहितं चिक्रीड गोपैर्हरिः तूर्योत्थो वितनन् ध्वनिर्दिवमगात् द्रुतो यथा वादितः" धा. का. 3-51.

[A]अध्यासयन्, [1]आसयन्-न्ती, आसयिष्यन्-न्ती-ती ;

[2]आसीनः, [B]आसिसिषमाणः, आसिसिषिष्यमाणः ;

आः-आसौ-आसः ; — —

आसितम्-तः-तवान्, आसितः, आसिसिषितः-तवान् ;

आसः, आसः, आसिसिषुः, आसिसयिषुः;

आसितव्यम्, आसयितव्यम्, आसिसिषितव्यम् ;

आसनीयम्, आसनीयम्, आसिसिषणीयम् ;

आस्यम्, आस्यम्, आसिसिष्यम् ;

ईषदासः-दुरासः-स्वासः ; —

[C]उपास्यमानः, आस्यमानः, आसिसिष्यमाणः ;

आसः, आसः, [3]कैलासः, आसिसिषः ;

आसितुम्, आसयितुम्, आसिसिषितुम् ;

[4]आसना, [D]उपासना, [5]उपास्तिः[E], आस्या,[6] आसिसिषा ;

आसनम्, [A]आसनम्, आसिसिषणम् ;

---

1. 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इति ण्यन्तात् शतैव ।
2. 'ईदासः' (7-2-83) इति आनस्यादेरीकारः ।
3. "केलिः प्रयोजनमस्य = कैलः 'चूडादिभ्य उपसंख्यानम्' (वा. 5-1-110) इत्यण् । आस्यतेऽस्मिन् इत्यासः । 'हलश्च' (3-3-121) इत्यधिकरणे घञ् । कैलश्चासावासश्चेति 'विशेषणं विशेष्येण—' (2-1-57) इति संज्ञात्वात् लोहित-शाल्यादिवत् समासो नित्यम् ॥" इति **मा. धा. वृत्तिः** ।
4. 'ण्यासश्रन्थो युच्' (3-3-107) इति शुद्धादेव धातोः युच् ।
5. बाहुलकात् क्तिन्—इति **मा. धा. वृत्तिः** ।
6. 'वाऽसरूप—' (3-1-94) इति न्यायेन ण्यदपि भावे इति **मा. धा. वृत्तिः** ।

A. 'त्रिवर्गपारीणमसौ भवन्तम् **अध्यासयन् आसन**मेकमिन्द्रः । बिवेकदृश्वत्वमगात् सुराणां तं मैथिलो वाक्यमिदं बभाषे ॥' भ. का. 2-46.

B. '**अध्यासिसिषमाणे**ऽथ वियन्मध्यं निशाकरे ।' भ. का. 8-38.

C. 'आकाशचारिवनिताभि**रुपास्यमाना** साऽऽह स्म तन्मनसिकृत्य महान्त-मर्थम् ॥' वा. वि. 3-51.

D. 'प्रायो**पासनया** शान्तिं मन्वानो वालिसम्भवः । युक्त्वा योगं स्थितः शैले विवृण्वंश्चित्तवेदनाम् ॥' भ. का. 7-73.

E. "ईड्योऽयमीशः **समुपास्ति**शीलैराशासितः पीतपटीं वसानः । स्वीयैश्चकंसे करुणीप्रकाशी रमोऽर्निशो नाचितनिज्ञो ॥" धा. का. 2-45.

आसित्वा, आसयित्वा, आसिसिषित्वा ;

उपास्य, समास्य, उपासिसिष्य ;

आसम् २, आसित्वा २, } आसम् २, आसयित्वा २, } आसिसिषम् २ ; आसिसिषित्वा ; }

(61-A) "इ गतौ" (I-स्वादिः-320-सक-अनिट्-पर-)

'अयत्येतीयते गत्यां अधीतेऽध्येति चेङ्कोः ।' (श्लो 14) इति **देवः** ।

'इट किट कटी गतौ' इति धातुपाठे निर्दिश्यते । 'कटी' इत्यत्र 'कटि + इ-' इति ह्रस्वेकारात्मकं धात्वन्तरं प्रश्लिष्टमिति केचित् । तस्य च अयति-इयाय-एता-इत्यादीनि रूपाणि । अत एव '**उदयति** विततोर्ध्वरश्मि-रज्जौ अहिमरुचौ हिमधाम्नि याति चास्तम्' (**शिशुपालवधे** 4-20), '**उदयति** दिननाथो याति शीतांशुरस्तम्' इत्यादिप्रयोगाणामुपपत्तिः ।

आयकः-यिका, आयकः-यिका, [1]ईषिषकः-षिका ;

[2]एता-त्री, आययिता-त्री, ईषिषिता-त्री ;

[A]उदयन् / अयन् } न्ती, आययन्-न्ती, ईषिषन्-न्ती ;

एष्यन्-न्ती-ती, आययिष्यन्-न्ती-ती, ईषिषिष्यन्-न्ती-ती ;

— आययमानः, आययिष्यमाणः ; —

[3]इत्-इतौ-इतः ; — —

इतं-तः-तवान्, आयितः, ईषिषितः, तवान् ;

अयः, आयः, ईषिषुः, आयिययिषुः ;

एतव्यम्, आययितव्यम्, ईषिषितव्यम् ;

अयनीयम्, आयनीयम्, ईषिषणीयम् ;

एयम्, उपेयम्, आय्यम्,[4] ईषिष्यम् ;

---

1. 'इको झल्' (1-2-9) इति सनः कित्वाद् गुणाभावः । 'अज्झनगमां–' (6-4-16) इति दीर्घः । 'सन्यतः' (7-4-79) इत्यभ्यासस्येत्वम् । 'श्र्युकः क्किती' (7-2-11) ति इण्णिषेधः ।
2. 'सार्वधातुकार्धधातुकयो–' (7-3-84) रिति गुणः ।
3. 'ह्रस्वस्य पिति कृति तुक्' (6-1-71) इति तुक् ।
4. 'एङि पररूपम्' (6-1-94) इति पररूपम् ।

A. 'प्रकण्डिताशो**दयदं**शुमण्डितैरकुण्डरत्नैर्मुण्डिताकैदीधितीन् ।' धा. का. 1-42

ईषदय:-दुरय:-स्वय: ; —

[1]ईयमान:, आय्यमान:, ईषिष्यमाण: ;

[2]अय:, [3]आय:, आय:, ईषिष: ;

एतुम्, आययितुम्, ईषिषितुम् ;

इति:, आयना, ईषिषा, आयियिषा ;

अयनम्, आयनम्, ईषिषणम् ;

इत्वा, आययित्वा, ईषिषित्वा ;

समित्य, [4]उपेत्य, समाय्य, समीषिष्य ;

आयम् २ } आयम् २ } ईषिषम् २ }
इत्वा २ }, आययित्वा २ }, ईषिषित्वा २ } ;

(62) " इक् स्मरणे " (II-अदादि:-1047-सक. अनिट्-पर.)

' अयत्येतीयते गत्यां, अधीतेऽध्येति चेङिकोः । ' (14) इति **देवः** ।

नित्यमधिपूर्वक: ।

अध्यायक:-यिका, [5]अधिगमक:-मिका, [6]अधिजिगमिषक:-षिका ;

अध्येता-त्री, अधिगमयिता-त्री, अधिजिगमिषिता-त्री ;

[A]अधीयन्-न्ती, अधियन्, अधिगमयन्-न्ती, अधिजिगमिषन्-न्ती ;

अध्येष्यन्-न्ती-ती, अधिगमयिष्यन्-न्ती-ती, अधिजिगमिषिष्यन्-न्ती-ती;

— अधिगमयमान:, अधिगमयिष्यमाण ;

---

1. ' अक्रुत्सार्वधातुकयो –' (7-4-25) रिति दीर्घ: ।
2. ' एरच् ' (3-3-56) इति भावेऽच् ।
3. ' अकर्तरि च कारके–' (3-3-19) इति घञ् ।
4. ' षत्वतुकोरसिद्ध: ' (6-1-86) इत्येकादेशशास्त्रस्यासिद्धत्वात् तुक् ।
5. ' णौ गमिरबोधने ' (2-4-46) ' इण्वदिक:' (वा. 2-4-45) इत्यतिदेशात् गमादेश: । अमन्तत्वेन मित्त्वात् ' मितां ह्रस्व: ' (6-4-92) इति उपधाह्रस्व: । अन्यत्र–बोधने **प्रत्याययक:-यिका-प्रत्यायितम्**–इत्यादि ।
6. ' सनि च ' (2-4-47) इति गमादेश: । ' गमेरिट् परस्मैपदेषु ' (7-2-58) इतीडागम: । बोधने तु **प्रतीषिषक:** इत्यादि ।

A. ' सूतोऽपि गङ्गासलिलै: पवित्वा सहाश्वमात्मानमनल्पमन्यु: । ससीतयो राघवयोर**धीयन्** श्वसन् कदुष्णं पुरमाविवेश ॥ ' भ. का. 3-18 ' इण्वदिक: ' (वा. 2-4-45) इति अतिदेशेन ' इणो यण् ' (6-4-81) इत्यत्र यणा भाव्यम् । तदानीं ' अधियन् ' इति रूपमिति केचित् ।

अधीत्[1]-अधीतौ-अधीत: ; — —

अधीत:-तम्, अधिगमित:, अधिजिगमिषित:-तवान् ;

अध्यय:, [2]मन्त्राध्याय:, अधिजिगमिषु:, अधिजिगमयिषु: ;

अध्येतव्यम्, अधिगमयितव्यम्, अधिजिगमिषितव्यम् ;

अध्ययनीयम्, अधिगमनीयम्, प्रत्यायनीयम्, अधिजिगमिषणीयम् ;

अध्येयम्, }
[A]अधीत्य:, } प्रत्याय्यम्, अधिगम्यम्, अधिजिगमिष्यम् ;

ईषदध्यय:, दुरध्यय:, स्वध्यय: ; — —

अधीयमान:, अधिगम्यमान:, प्रत्याय्यमान:, अधिजिगांस्यमान:[3] ;

अध्याय:, अधिगम:, प्रत्याय:, अधिजिगमिष: ;

अध्येतुम्, अधिगमयितुम्, अधिजिगमिषितुम् ;

अधीति:, अधिगमना, अधिजिगमिषा, अधिजिगमयिषा ;

अध्ययनम्, अधिगमनम्, अधिजिगमिषणम् ;

[4]अधीत्य, [5]अधिगमय्य, अधिजिगमिष्य ;

अध्यायम् २, [6]अधिगमम् २, }
अधिगामम् २, } अधिजिगमिषम् २ ;

(63) " इख गतौ " (I-भ्वादि:-140-सक. से-पर.)

एखक:-खिका, एखक:-खिका, [7]एचिखिषक:-षिका ;

---

1. ' षत्वतुकोरसिद्ध: ' (6-1-86) इत्येकादेशस्यासिद्धत्वात् तुक् ।
2. ' कर्मण्यण् ' (3-2-1) इत्यण् ।
3. ' अज्झनगमां सनि ' (6-4-16) इति दीर्घ: ।
4. ' षत्वतुकोरसिद्ध: ' (6-1-86) इत्येकादेशशास्त्रासिद्धया तुक् ।
5. ' ल्यपि लघुपूर्वात् ' (6-4-56) इति णेरयादेश: ।
6. ' चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ' (6-4-93) इति दीर्घविकल्प: ।
7. ओणे: ऋदित्करणात् लिङ्गात् उपधाकार्यं प्रबलम् । लघूपधगुण: ।

A. ' इण्वदिक: (वा. 2-4-45) ' इत्यतिदेशात्–' **एतिस्तु** ' (3-1-109) इति क्यपि ' अधीत्य ' इति रूपम् । ' इत्य: स्वधीतोपनिषद्भिरेषाम**धीत्य**रूप: स वियन् क्रमेण । ' धा. का. 2-48. इति प्रयोग: । ' ....' एतिस्तु— ' (3-1-109) इति क्यब्विधौ नित्यमधिपूर्वत्वादस्यैतिग्रहणेन न ग्रह: । तथा च **भाष्ये—' अध्येयं** व्याकरणं ' इति यदन्तो निर्दिश्यते ' इति **माधवधातुवृत्तौ** ।

एखिता-त्री, एखयिता-त्री, एचिखिषिता-त्री ;
[A]एखन्-न्ती, एखयन्-न्ती, एचिखिषन्-न्ती ;
एखिष्यन्-न्ती-ती, एखयिष्यन्-न्ती-ती, एचिखिषिष्यन्-न्ती-ती ;
एखयमानः, एखयिष्यमाणः ; —
इक्-इखौ-इखः ; — —
इखितः-तम्, एखितः, एचिखिषितः-तवान् ;
[1]इखः, एखः, एचिखिषुः, एचिखयिषुः ;
एखितव्यम्, एखयितव्यम्, एचिखिषितव्यम् ;
एखनीयम्, एखनीयम्, एचिखिषणीयम् ;
एख्यम्, एख्यम्, एचिखिष्यम् ;
ईषदेखः-दुरेखः-स्वेखः ; —
[2]इख्यमानः, एख्यमानः, एचिखिष्यमाणः ;
एखः, एखः, एचिखिषः ;
एखितुम्, एखयितुम्, एचिखिषितुम् ;
[3]इक्तिः, एखना, एचिखिषा, एचिखयिषा ;
एखनम्, एखनम्, एचिखिषणम् ;
[4]एखित्वा, एँखयित्वा, एचिखिषित्वा ;
प्रेख्य, समिख्य, समेख्य, समेचिखिष्य ;
एखम् २, एखित्वा २, } एखम् २, एखयित्वा २, } एचिखिषम् ; एचिखिषित्वा २, }

(64) "इखि गतौ" (I-भ्वादिः-141-सक. सेट्. पर.)

[5]इङ्खकः-खिका, इङ्खकः-खिका, [6]इञ्चिखिषकः-षिका ;

1. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कः, गुणाभावः।
2. 'क्ङिति च' (1-1-5) इति गुणनिषेधः।
3. 'खरि च' (8-4-55) इति चर्त्वम्।
4. 'न क्त्वा सेट् (1-2-18) इति कित्त्वनिषेधे लघूपधगुणः।
5. 'इदितो नुम्—' (7-1-58) इति नुम्।
6. 'अजादेर्द्वितीयस्य—' (6-1-2) इति द्वित्वम्। 'न न्द्राः संयोगादयः' (6-1-3) इति नकारस्य द्वित्वनिषेधः।

A. "एखच्चकोरोत्करमिङ्खितं शुकैः प्रेङ्खलतावल्गनरङ्गमण्डपम्। विलङ्घदेणं शबराङ्गनाजनप्रवङ्गितं मङ्गलधेनुतङ्गितम्॥" धा. का. (1-20)

इङ्खिता-त्री, इङ्खयिता-त्री, इञ्चिखिषिता-त्री ;
इङ्खन्-न्ती, इङ्खयन्-न्ती, इञ्चिखिषन्-न्ती ;
इङ्खिष्यन्-न्ती-ती इङ्खयिष्यन्-न्ती-ती, इञ्चिखिषिष्यन्-न्ती-ती ;
— इङ्खयमानः, इङ्खयिष्यमाणः ;
इन्-इङ्खौ-इङ्खः ; — —
[A]इङ्खितः-तम्, इङ्खितः, इञ्चिखिषितः-तवान् ;
इङ्खः, [B]प्रेङ्खणः,इङ्खः, इञ्चिखिषुः, इञ्चिखयिषुः ;
इङ्खितव्यम्, इङ्खयितव्यम्, इञ्चिखिषितव्यम् ;
[1]प्रेङ्खणीयम्, इङ्खनीयम्, इञ्चिखिषणीयम् ;
इङ्ख्यम्, इङ्ख्यम्, इञ्चिखिष्यम् ;
ईषदिङ्खः, दुरिङ्खः, स्विङ्खः ; — —
इङ्ख्यमानः, इङ्ख्यमानः, इञ्चिखिष्यमाणः ;
इङ्खः, इङ्खः, इञ्चिखिषः ;
इङ्खितुम्, इङ्खयितुम्, इञ्चिखिषितुम् ;
[2]इङ्खा, [3]इङ्खना, [4]इञ्चिखिषा, इञ्चिखयिषा ;
प्रेङ्खणम्, प्रेङ्खणम्, इञ्चिखिषणम् ;
इङ्खित्वा, इङ्खयित्वा, इञ्चिखिषित्वा ;
प्रेङ्ख्य, समिङ्ख्य, प्रेञ्चिखिष्य ;
[5]इङ्खम् २, इङ्खित्वा २, } इङ्खम् २, इङ्खयित्वा २, } इञ्चिखिषम् २ ; इञ्चिखिषित्वा २ ; }

1. 'कृत्यचः' (8-4-29) इति णत्वम्।
2. 'गुरोश्च हलः' (3-3-103) इति अप्रत्ययः।
3. 'ण्यासश्रन्थो युच्' (3-3-107) इति युच्।
4. 'अ प्रत्ययात्' (3-3-102) इत्यः प्रत्ययः।
5. 'नित्यवीप्सयोः' (8-1-4) इति द्वित्वम्।

A. "एखच्चकोरोत्करमिङ्खितं शुकैः प्रेङ्खलतावल्गनरङ्गमण्डपम्। विलङ्घदेणं शबराङ्गनाजनप्रवङ्गितं मङ्गलधेनुतङ्गितम्॥" धा. का. 1-20.

B. "वनान्तप्रेङ्खणः पापः फलानां परिणिंसकः। प्रणिक्षिष्यति नो भूयः प्रणिन्यास्मान्मधून्ययम्॥" भ. का. 9-106. 'प्रेङ्खतीति—प्रेङ्खणः। बाहुलकात् कर्तरि ल्युट्। इति भट्टिकाव्यव्याख्याने।

(65) "**इगि गत्यर्थः**" (I-भ्वादिः-153. सक. से. पर.)

इङ्गकः-ङ्गिका-[A]इङ्गितम्-तः-तवान्, इत्यादीनि सर्वाण्यपि पूर्वोक्तेखि-(64) धातुवद्रूपाणि ज्ञेयानि ।

(66) "**इङ् अध्ययने**" (II-अदादिः-1046. सक-अनिट्-आत्म.)

नित्यमधिपूर्वः । 'अयत्येतीयते गत्यां, अधीतेऽध्येति चेङिकोः ।' इति (श्लो 14) **देवः** ।

'धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते । विशिनष्टि तमेवार्थमुपसर्गगतिस्त्रिधा ॥'

इति **क्षीरतरङ्गिण्यामुद्धृतः** श्लोकः ।

अध्यायकः-यिका,	[1]अध्यापकः-पिका,	[2]अधिजिगमिषकः-षिका ;
अध्येता-त्री,	अध्यापयिता-त्री,	अधिजिगमिषिता-त्री ;
[3]अधीयन् पारायणम्, [4]अधीयती,	[A]अध्यापयन्-[5]न्ती,	अध्यापयिष्यन्-न्ती-ती ;
[6]अधीयानः,[B]	—	अधिजिगांसमानः[7];
अध्येष्यमाणः,	—	[8]अधिजिगांसिष्यमाणः ;

1. 'क्रीङ्जीनां णौ' (6-1-48) इति आत्वे 'अर्तिह्री–' (7-3-36) इति पुक् ।
2. 'इङश्च' (2-4-48) इति सनि गमिः । 'गमेरिट् परस्मैपदेषु' (7-2-58) इति इट् । 'परस्मैपदेषु' इत्यस्य 'तङानयोरभावे' इत्यर्थः ।
3. 'इङ्धार्योः शत्रकृच्छ्रिणि' (3-2-130) इति शता ।
4. उगितश्च' (6-3-45) इति स्त्रियां ङीप् । अधीयन् पारायणं अकृच्छ्रेणाधीयान इत्यर्थः ।
5. 'बुधयुधनशजनेङ्–' (1-3-86) इति ण्यन्तात् परस्मैपदमेव ।
6. इयङ् पूर्वम् । पश्चात् दीर्घः ।
7. 'इङश्च' (2-4-48) इति गमादेशः । 'अज्झनगमां सनि' (6-4-16) दीर्घः।
8. 'आर्धधातुकस्येट्–' (7-2-35) इतीट् ।

A. 'वाचंयमान् स्थण्डिलशायिनश्च युयुक्षमाणान् अनिशं मुमुक्षून् । **अध्यापयन्तं** विनयात् प्रणेमुः पद्गाः भरद्वाजमुनिं सशिष्यम् ॥' भ. का. 3-41.

B. 'ऋग्यजुषम**धीयानान्** सामन्यांश्च समर्चयन् । बुभुजे देवसात्कृत्वा शूल्यमुख्यं च होमवान् ॥' भ. का. 4-9.

अधीतः[A]-तम्,	अध्यापितः,	अधिजिगमिषितः-तवान् ;
अध्ययः, [1]मन्त्राध्यायः,	अध्यापः, अधिजिगमिषुः,	[2]अधिजिगापयिषुः ; अध्यापिपयिषुः ;
अध्येतव्यम्,	अध्यापयितव्यम्,	अधिजिगमिषितव्यम् ;
अध्ययनीयम्,	अध्यापनीयम्,	अधिजिगमिषणीयम् ;
अध्येयम्,	अध्याप्यम्,	अधिजिगमिष्यम् ;
ईषदध्ययः, दुरध्ययः, स्वध्ययः ;		—
[3]अधीयमानः,	अध्याप्यमानः,	अधिजिगांस्यमानः ;
[4]अध्यायः, [5]अध्यायः, [B]उपाध्यायः, उपाध्याया, [6]उपाध्यायी, [C]उपाध्यायानी,		
	अध्यापः,	अधिजिगमिषः ;
अध्येतुम्,	अध्यापयितुम्,	अधिजिगमिषितुम् ;
अधीतिः, अध्यापना, अधिजिगमिषा, अधिजिगापयिषा, अध्यापिपयिषा ;		
अध्ययनम्,	अध्यापनम्,	अधिजिगमिषणम् ;
अधीत्य,	अध्याप्य,	अधिजिगमिष्य ;
अध्यायम् २,	अध्यापम् २,	अधिजिगमिषम् २ ;

(67) "**इट गतौ**" (I-भ्वादिः-318-सक. सेट्. पर.)

एटकः-टिका, एटकः-टिका, एटिटिषकः-षिका, एटन्[D]-न्ती, इत्यादीनि रूपाणि '**इख**' (63) धातुवत् बोध्यानि ।

1. 'कर्मण्यण्' (3-2-1) इत्यण् ।
2. 'णौ च संश्चङोः ।' (2-4-51) इति गादेशः वा, पक्षे आत्वे पुकि **अध्यापिपयिषुः** इति रूपम् ।
3. कर्मणि यक् ।
4. '**अध्याय**न्याय–'(3-3-122) इति संज्ञायां अधिकरणे घञ् । घापवादः ।
5. 'इङश्च' (3-3-21) इति भावादौ घञ् असंज्ञायाम् । अध्ययन**मध्यायः** ।
6. 'अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष्' (वा. 3-3-21) इति ङीष् वा ।

A. 'इत्यः **स्वधीतो**पनिषद्भिरेषामधीत्यरूपः स वियन् क्रमेण । इयञ्जनं राजपथं समायात् वाताकुलोद्भ्रातपताकमीशः ॥' धा. का. 2-48.

B. 'ततः कपिसमाहारं एकनिश्चायमागतम् । **उपाध्याय** इवायामं सुग्रीवोऽध्यापिपद् दिशाम् ॥' भ. का. 7-34.

C. 'मातुलोपाध्याययोरानुग् वा' (वा. 4-1-49.) इति स्त्रियामानुग् वा ।

D. "चेटैर्बिटैश्चानुगतान् अवेट**कैरेट**त्पशूत्केटिरजः कटन् मलान् ॥" धा. का. 1-42.

(68) "**इण् गतौ**" (II-अदादिः-1045-अनिट्. सक-पर-)

'**अयत्येतीयते गत्याम्, अधीतेऽध्येति चेङिकोः**' (14 श्लो.) इति **देवः** ।

[1]आयकः-यिका, [2]गमकः-मिका, [3]प्रत्यायकः-यिका, [4]जिगमिषकः-षिका, [[5]प्रतीषिषकः-षिका ;

एता-त्री, आययिता-त्री, गमयिता-त्री, जिगमिषिता-त्री, प्रतीषिषिता-त्री ;

[6]यन्, [A]निर्यन् } यती, प्रत्याययन्-न्ती, गमयन्-न्ती, जिगमिषन्-न्ती, प्रतीषिषन्-न्ती;

एष्यन्-[7]न्ती-ती, प्रत्याययिष्यन्-न्ती-ती, गमयिष्यन्-न्ती-ती, जिगमिषिष्यन्-न्ती-ती, प्रतीषिषिष्यन्-ती-न्ती ;

— प्रत्याययमानः, प्रत्याययिष्यमाणः ; —

[8]परीत्-परीतौ-परीतः ; — —

इतं-[B]इतः-इतवान्, [9]उपेतः, प्रत्यायितः, अवगमितः, जिगमिषितः, प्रतीषितः-तवान् ;

---

1. 'अचो ञ्णिति' (7-2-115) इति वृद्धौ आयादेशः ।
2. 'णौ गमिरबोधने' (2-4-46) इति गमादेशः । अमन्तत्वान्मित्त्वेन उपधाह्रस्वः ।
3. इणो बोधनार्थकत्वात् 'अबोधने' (2-4-46) इत्युक्त्या गमादेशाभावः ।
4. 'सनि च' (2-4-47) इति गमादेशः । 'गमेरिट् परस्मैपदेषु' (7-2-58) इत्यत्र 'परस्मैपदेषु' इत्यस्य तङानयोरभावे—इत्यर्थकतया अत्र सन इड् भवति ।
5. 'सनि च' (2-4-47) इत्यत्रापि 'अबोधने' इत्यनुवृत्त्या गमादेशाभावे, अजादित्वाद् 'अजादेर्द्वितीयस्य' (6-1-2) इति द्वितीयस्यैकाचो द्वित्वे, 'अज्झनगमां सनि' (6-4-16) इति दीर्घः ।
6. 'इणो यण्' (6-4-81) इति यणादेशः ।
7. 'आच्छीनद्योर्नुम्' (7-1-80) इति नुमागमस्य वैकल्पिकत्वात् रूपद्वयम् ।
8. 'षत्वतुकोरसिद्धः' (6-1-86) इत्यनेन एकादेशशास्त्रस्यासिद्धत्वात् तुक् ।
9. आ+इतः एतः, उप×एत=इति स्थिते 'एत्येधत्यूठ्सु' (6-1-89) इति वृद्धिं बाधित्वा, 'ओमाङोश्च' (6-1-95) इति पररूपम् ।

A. '**निर्यत्स्फु**लिङ्गाकुलधूमराशिं किं ब्रूहि भूमौ पिनषाम भानुम् । आदन्तनिष्पीडितपीतमिन्दुं ष्ठीवाम शुष्केक्षुलताऽस्थिकल्पम्' ॥ भ. का. 12-18.

B. 'अहृत धनेश्वरस्य युधि यः समेतमायो धनं तमह**मितो** विलोक्य बिबुधैः कृतोत्तमायोधनम् ।' भ. का. 10-36.

अयः, आयः, गमः, [1]इत्वरः, [A]उपेयिवान्[2], ईयिवान्[B], समीयिवान्- [3]उपेयुषी, [4]अत्ययी, [5]अत्यायः, जिगमिषुः, जिगमयिषुः, परीषिषुः;

एतव्यम्, [6]उपैतव्यम्, प्रत्याययितव्यम्, गमयितव्यम्, जिगमिषितव्यम्, [प्रतीषिषितव्यम् ;

अयनीयम्, प्रत्यायनीयम्, गमनीयम्, जिगमिषणीयम्, प्रतीषिषणीयम् ;

[C]इत्यम्[7], अनभ्याशमित्यः[8], प्रत्याय्यम्, अवगम्यम्, जिगमिष्यम्, प्रतीषिष्यम् ;

ईषदयः,-दुरयः-स्वयः, ईषदायः-ईषदवगमः-इत्यादि ; —

[9]ईयमानः, प्रत्याय्यमानः, अवगम्यमानः, [10]जिगांस्यमानः, प्रतीष्यमाणः ;

---

1. 'इण्नशिजिसर्तिभ्यः—' (3-2-163) इति तच्छीलादिषु क्वरप् । तुक् ।
2. '**उपेयिवान**नाश्वान्—' (3-2-109) इति क्वसुप्रत्ययान्तो निपातितः । 'उप' इत्यस्याविवक्षितत्वात्-**समीयिवान्** - **ईयिवान्** - इत्याद्यपि सिद्ध्यति । 'दीर्घ इणः किति' (7-4-69) इति दीर्घः ।
3. 'उगितश्च' (4-1-6) इति ङीप् । 'वसोः सम्प्रसारणम्' (6-4-131) इति सम्प्रसारणम् ।
4. 'जिदृक्षिविश्रीण्—' (3-2-157) इत्यनेन तच्छीलादिषु इनिः ।
5. 'श्याद्व्यधास्रुसंस्रतीण्—' (3-1-141) इति 'अति' इत्युपसृष्टादस्मात् कर्तरि णः प्रत्ययः ।
6. 'एत्येधत्यूठ्सु' (6-1-89) इति वृद्धिः ।
7. 'एतिस्तुशास्—' (3-1-109) इति क्यपि तुक् ।
8. 'इत्येऽनभ्याशस्य' (वा-6-3-70) इति पूर्वपदस्य मुम् ।
9. 'अकृत्सार्वधातुकयो—' (7-4-25) रिति दीर्घः ।
10. 'अज्झनगमां सनि' (6-4-16) इति दीर्घः । आत्मनेपदपरकत्वात् सनो नेट् ।

A. 'रावणः शुश्रुवान् शत्रून् राक्षसानभ्य**ुपेयुषः** । स्वयं युयुत्सयांचक्रे प्राकाराग्रे निषेदिवान् ॥' भ. का. 14-22.

B. 'निवृत्ते भरते धीमान् अत्रे रामस्तपोवनम् । प्रपेदे पूजितस्तस्मिन् दण्डकारण्य**मीयिवान्** ॥' भ. का. 4-1.

C. 'आदृत्यस्तेन वृत्येन स्तुत्यो जुष्येण सङ्गतः । **इत्यः** शिष्येण गुरुवत् गृध्यमर्थमवाप्स्यसि' भ. का. 6-55.

आय;, [A]न्याय:[1], [2]पर्याय:,[B] [3]अध्याय:, समय:,[4] अन्वय:, उदय:,
न्यय:, व्यय:, [C]अभ्युदय:, न्याय:[5] अवगम:, प्रत्याय: ;

एतुम्, प्रत्याययितुम्, गमयितुम्, जिगमिषितुम्, प्रतीषिषितुम् ;

[6]इत्या, अपीति:, [7]समिति:, इति:, समित्[8], प्रत्यायना, अवगमना, जिगमिषा, जिगमयिषा, प्रतीषिषा, प्रत्याययिषा ;

अयनम्, [9]अन्तरयणम् (वर्तते), अन्तरयनो (देश:), } प्रत्यायनम्, अवगमनम्, जिगमिषणम्, प्रतीषिषणम् ;

इत्वा, आययित्वा, गमयित्वा, जिगमिषित्वा, ईषिषित्वा ;

उपेत्य-परीत्य, प्रत्याय्य, [10]अवगमय्य, अवजिगमिष्य, प्रतीषिष्य ;

---

1. संज्ञायाम् 'अध्यायन्याय—' (3-3-122) इत्यादिना घापवादो घञ् निपातित: । **न्याय** इति शास्त्रस्य संज्ञा । न्येति—निश्चिनोति इति शास्त्रयुक्त्यादिरत्र न्याय: । न अभ्रेष: ।
2. 'परावनुपात्यय इण:' (3-3-38) इति अजपवादो घञ् । क्रमस्यानतिक्रमोऽनुपात्यय: ।
3. '**अध्याय**न्याय—' (3-3-122) इत्यादिना घापवादो घञ् निपातित: । संज्ञायाम्
4. 'एरच्' (3-3-56) इति भावेऽच् । एवं 'अभ्युदय' इति यावदच् प्रत्यय: ।
5. 'परिन्योर्नीणोर्द्यूताभ्रेषयो:' (3-3-37) इति घञ् । अभ्रेषोऽस्खलनम् । **न्याये** स्थित: ।
6. 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिण:' (3-3-99) इति स्त्रियां भावे क्यप् ।
7. बाहुलकात् क्तिन्नपि—**इत्याद्येय:** । **समिति:**=सभा ।
8. 'संपदादित्वात्—'(3-3-94) स्त्रियां भावादौ क्विप् । **समित्**=युद्ध: ।
9. 'अयनं च' (8-4-25) इत्यदेशे णत्वम् । देशविशेषे तु न—**अन्तरयनो** देश: । 'अन्तश्शब्दस्याङ्किविधिणत्वेषु उपसर्गत्वं वक्तव्यम्' (वा. 1-4-58) इति वचनात् उपसर्गत्वम् । 'कृत्यच' (8-4-29) इत्यनेनैव सिद्धे, देशे णत्वाभावाय 'अयनं च' (8-4-25) इति सूत्रारम्भ: ।
10. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेश: ।

A. 'नरकस्यावतारोऽयं प्रत्यक्षोऽस्माकमागत: । अचेष्टा यदिहा**न्यायात्** अनेनात्स्यामहे वयम् ॥' भ. का. 7-82.

B. 'न्याय्यं यद्यत तत् कार्यं **पर्याये**णाविरोधिभि: । निशोपशाय: कर्तव्य: फलोच्चायश्च संहतै: ॥' भ. का. 7-41.

C. 'निराकरिष्णुर्द्विजकुञ्जराणां तृणीकृताशेषगुणोऽतिमोहात् । पापाशयान् **अभ्युदया**र्थमाच्छीत् प्राग्ब्रह्मरक्ष:प्रवरान् दशास्य: ॥' भ. का. 11-44.

आयम् २, इत्वा २, } प्रत्यायम् २, आययित्वा २, } [1]अवगमम् २ अवगामम् २ गमयित्वा २, }

— — जिगमिषम् २, जिगमिषित्वा २, } प्रतीषिषम् २ ; ईषिषित्वा २ ;

(69) "इदि परमैश्वर्ये" (I-भ्वादि:-63-अक. से. पर.)

परमैश्वर्यम्=परमेश्वरक्रिया-इति **क्षीरस्वामी** ।

इन्दक:-दिका,	इन्दक:-दिका,	[2]इन्दिदिषक:-षिका ;
इन्दिता-त्री,	इन्दयिता-त्री,	इन्दिदिषिता-त्री ;
इन्दन्-न्ती,	इन्दयन्-न्ती,	इन्दिदिषन्-न्ती ;
इन्दिष्यन्-न्ती-ती,	इन्दयिष्यन्-न्ती-ती,	इन्दिदिषिष्यन्-न्ती-ती ;
—	इन्दयमान:,	इन्दयिष्यमाण: ; —
इन्-इन्दौ-इन्द: ;	—	—
इन्दितम्-त:-तवान्,	इन्दित:,	इन्दिदिषित:-तवान् ;
इन्द:, [A3]इन्द्र:-इन्द्राणी,	इन्द:, [4]इन्दिरा ;	इन्दिदिषु:, इन्दिदयिषु: ; —
इन्दितव्यम्,	इन्दयितव्यम्,	इन्दिदिषितव्यम् ;
इन्दनीयम्,	इन्दनीयम्,	इन्दिदिषणीयम् ;
इन्द्यम्,	इन्द्यम्,	इन्दिदिष्यम् ;
ईषदिन्द:, दुरिन्द:, स्विन्द: ;		—
इन्द्यमान:,	इन्द्यमान:,	इन्दिदिष्यमाण: ;
इन्द:,	इन्द:,	इन्दिदिष: ;
इन्दितुम्,	इन्दयितुम्,	इन्दिदिषितुम् ;

---

1. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति णमुलि दीर्घविकल्प: ।
2. 'न न्द्रा: संयोगादय:' (6-1-3) इति नकारस्य द्वित्वनिषेध: ।
3. औणादिके (द. उ. 8-46) रन् प्रत्यये रूपम् । स्त्रियां पुंयोगे 'इन्द्रवरुण-' (4-1-49) इत्यादिना ङीष्, तत्संनियोगेनानुगागमश्च भवति ।
4. औणादिके किरच् प्रत्यये रूपम् ।

A. 'अतर्दकास्त्वद्य विकर्दमाशया: प्रखर्दवृत्तैरसमन्वितान्तिका: । श्रुतान्दुकै: चितगजेन्द्ररोधिन: तुष्यन्तु सन्तो गुणबिन्दुलोलुपा: ॥' धा. का. 1-9.

इन्दा, इन्दना, इन्दिदिषा ;

इन्दनम्, इन्दनम्, इन्दिदिषणम् ;

इन्दित्वा, इन्दयित्वा, इन्दिदिषित्वा ;

समिन्द्य, समिन्द्य, इमिन्दिदिष्य ;

इन्दम् २, इन्दम् २, इन्दिदिषम् २ ;

इन्दित्वा २, इन्दयित्वा २, इन्दिदिषित्वा २,

(70) “ञि इन्धी दीप्तौ” (VII-रुधादिः-1548-अक. से. आ.)

दीपनायामपि प्रयुज्यते ।

इन्धकः-न्धिका, इन्धकः-न्धिका, इन्दिधिषकः-षिका ;

इन्धिता-त्री, इन्धयिता-त्री, इन्दिधिषिता-त्री ;

— इन्धयन्-न्ती, इन्धयिष्यन्-न्ती-ती ;

[1]इन्धानः, [A]समिन्धानः, इन्धयमानः, इन्दिधिषमाणः ;

इन्धिष्यमाणः, इन्धयिष्यमाणः, इन्दिधिषिष्यमाणः ;

[2]समिध्-समिधौ-समिधः ; — —

अग्नीध्[3], आष्ट्रमिन्धः[4], अग्निमिन्धः, इन्धः, इन्धनम्[B] इन्दिधिषुः, इन्दिधयिषुः;

समिद्धम्, इद्ध[5]ः, [C]इद्धवान्, इन्धितम्-तः-तवान्, इन्दिधिषितः-तवान् ;

इन्धितव्यम्, इन्धयितव्यम्, इन्दिधिषितव्यम् ;

इन्धनीयम्, इन्धनीयम्, इन्दिधिषणीयम् ;

इन्ध्यम्, इन्ध्यम्, इन्दिधिष्यम् ;

ईषदिन्धः, दुरिन्धः, स्विन्धः ; —

1. ‘रुधादिभ्यः श्नम्’ (3-1-78) इति श्नमि ‘श्नान्नलोपः’ (6-4-23) इति नलोपे ‘श्नसोरल्लोपः’ (6-4-111) इति अकारलोपः ।
2. ‘अनिदितां-’(6-4-24) इति नलोपः ।
3. ‘क्विप् च’ (3-2-76) इति कर्मणि उपपदे क्विप् ।
4. ‘कर्मण्यण्’ (3-2-1) इत्यण्, ‘आ-ष्ट्राग्न्योः—’(वा. 6-3-70) इति मुम् ।
5. ‘ञीतः क्तः’ (3-2-187) इति वर्तमाने क्तः । ‘श्वीदितो निष्ठायां’ (7-2-14) इतीडभावः ।

A. ‘यमं युनजिम का॰न **समिन्धानो**ऽस्त्रकौशलम् ।’ भ. का. 6-37.

B. ‘अपां पतिर्नित्यम**बिन्धनेन** ज्वालावता नूनमशोषितोऽभूत् ।’ **यादवाभ्युदये** 18-45.

C. “**समिद्ध**शरणा दीप्ता देहे लङ्का मतेश्वरा । **समिद्ध**शरणाऽऽदीप्ता देहेऽलंकामतेश्वरा ॥” भ. का. 10-7.

इद्धयमानः, इन्ध्यमानः, इन्दिधिष्यमाणः ;

एधः[1], इन्धः, इन्दिधिषः ;

इन्धितुम्, इन्धयितुम्, इन्दिधिषितुम् ;

इन्धा, समित्[2], इन्धना, इन्दिधिषा, इन्दिधयिषा ;

इन्धनम्, इन्धनम्, इन्दिधिषणम् ;

इन्धित्वा, इन्धयित्वा, इन्दिधिषित्वा ;

समिध्य, समिन्ध्य, समिन्दिधिष्य ;

इन्धम् २, इन्धम् २, इन्दिधिषम् २ ;

इन्धित्वा २, इन्धयित्वा २, इन्दिधिषित्वा २.

(71) “इल स्वप्नक्षेपणयोः” (VI-तुदादिः-1357-सक. सेट्. पर.)

‘— स्वप्नप्रेरणयोः’ इति धातुकाव्ये पाठः ।

एलकः-लिका, एलकः-लिका, [3]एलिलिषकः-षिका ;

एलिता-त्री, एलयिता-त्री, एलिलिषिता-त्री ;

[4]इलन्[A5]-न्ती-ती, एलयन्-न्ती, एलिलिषन्-न्ती ;

एलिष्यन्-न्ती-ती, एलयिष्यन्-न्ती-ती, एलिलिषिष्यन्-न्ती-ती ;

— एलयमानः, एलयिष्यमाणः ; —

इल्-इलौ-इलः ; — —

इलितम्-तः-तवान्, एलितम्-तः, एलिलिषितम्-तः-तवान् ;

[6]इलः, इला, एलः, एलिलिषुः, एलिलयिषुः ;

एलितव्यम्, एलयितव्यम्, एलिलिषितव्यम् ;

1. ‘अवोदैधौद्म—’ (6-4-29) इति घञन्तो निपातितः । **इध्म** इत्यर्थः ।
2. ‘संपदादिभ्यः—’ (वा. 3-3-94) इति क्विप् स्त्रियां भावादौ । युद्ध इत्यर्थः ।
3. उपधाकार्यस्य द्वित्वात् प्रबलत्वात् पूर्वं गुणे द्वितीयस्यैकाचः द्वित्वम् ।
4. ‘तुदादिभ्यः शः’ (3-1-77) इति शः । ‘सार्वधातुकमपित्’ (1-2-4) इति शस्य ङिद्वद्भावाल्लघूपधगुणो न ।
5. ‘आच्छीनद्योर्नुम्’ (7-1-80) इति नुम् विकल्पेन ।
6. ‘इगुपधज्ञाप्रीकिरः कः’ (3-1-135) इति कर्तरि कः । टाप् स्त्रियाम् । **इला** = भूमिः ।

A. ‘चिलितपीतपटेन चलन् **इलन्** अविलितोरुकृपां परितो दशम् ॥’ धा. का. 2-78.

एलनीयम् ,	एलनीयम् ,	एलिलिषणीयम् ;
एल्यम् ,	एल्यम् ,	एलिलिष्यम् ;
ईषदेलः, दुरेलः, स्वेलः;	—	—
इल्यमानः,	एल्यमानः,	एलिलिष्यमाणः ;
एलः,	एलः,	एलिलिषः ;
एलितुम् ,	एलयितुम् ,	एलिलिषितुम् ;
इलितः-[1]इलितिः,	एलना,	एलिलिषा, एलिलयिषा ;
एलनम् ,	एलनम् ,	एलिलिषणम् ;
[2]एलित्वा,	एलयित्वा,	एलिलिषित्वा ;
समिल्य,	समेल्य,	समेलिलिष्य ;
एलम् २, एलित्वा २,	एलम् २, एलयित्वा २,	एलिलिषम् २ ; एलिलिषित्वा २.

(72) "इल प्रेरणे" (X-चुरादिः-1661-सक. सेट्. उभ.)

पूर्वोक्ततौदादिकेलतिवत् (71) णिजन्तात् रूपाणि सर्वाणि ज्ञेयानि। ण्यन्तात् पचाद्यचि टापि एला-बहुलगन्धा, जलसंस्कारकफलविशेषः। द्राविड्यां ['ஏலக்காய்'] 'एलक्काय्' इति प्रसिद्धः।

एलिलयिषकः-षिका ;	एलिलयिष्यमाणः ;
एलिलयिषिता-त्री ;	एलिलयिषुः ;
एलिलयिषन्-न्ती ;	एलिलयिषः ;
एलिलयिषिष्यन्-न्ती-ती ;	एलिलयिषितुम् ;
एलिलयिषमाणः ;	एलिलयिषा ;
एलिलयिषिष्यमाणः ;	एलिलयिषणम् ;
एलिलयिषितः-तवान् ;	एलिलयिषित्वा ;
एलिलयिषितव्यम् ;	समेलिलयिष्य ;
एलिलयिषणीयम् ;	एलिलयिषम् २ ;
एलिलयिष्यम् ;	एलिलयिषित्वा २ ; } इत्यादिरूपाणि-इति विशेषः।

1. इलितिरित्यत्र 'तितुत्रेष्वग्रहादीनां—' (वा. 7-2-9) इति पर्युदासादिड् भवति।
2. 'न क्त्वा सेट्' (1-2-18) इति कित्त्वं न, तेन गुणः।

(73) "इवि व्याप्तौ" (I-भ्वादिः-587. अक. सेट्-पर.)

इन्वकः-न्विका,	इन्वकः-न्विका,	[1]इन्विविषकः-षिका ;
इन्विता-त्री,	इन्वयिता-त्री,	इन्विविषिता-त्री ;
प्रेन्वन्-न्ती,	इन्वयन्-न्ती ,	इन्विविषन्-न्ती ;
इन्विष्यन्-न्ती-ती,	इन्वयिष्यन्-न्ती-ती,	इन्विविषिष्यन्-न्ती-ती ;
—	इन्वयमानः,	इन्वयिष्यमाणः ;
इन्-इन्वौ-इन्वः ;	—	—
[A]इन्वितम्-तः-तवान्,	इन्वितः-तम्,	इन्विविषितम्-तः-तवान् ;
इन्वः, इन्वका,[2]	इन्विविषुः ,	इन्विवयिषुः ;
इन्वितव्यम् ,	इन्वयितव्यम् ,	इन्विविषितव्यम् ;
इन्वनीयम् ,	इन्वनीयम् ,	इन्विविषणीयम् ;
इन्व्यम् ,	इन्व्यम् ,	इन्विविष्यम् ;
ईषदिन्वः, दुरिन्वः, स्विन्वः ;		—
इन्व्यमानः,	इन्व्यमानः,	इन्विविष्यमाणः ;
इन्वः,	इन्वः ,	इन्विविषः ;
इन्वितुम् ,	इन्वयितुम् ,	इन्विविषितुम् ;
इन्वा,	इन्वना,	इन्विविषा ;
इन्वनम् , [3]प्रेन्वनम् ,	इन्वनम् ,	इन्विविषणम् ;
इन्वित्वा,	इन्वयित्वा,	इन्विविषित्वा ;
समिन्व्य,	समिन्व्य,	समिन्विविष्य ;
इन्वम् २, इन्वित्वा २,	इन्वम् २, इन्वयित्वा २,	इन्विविषम् २ ; इन्विविषित्वा २.

1. 'न न्द्राः संयोगादयः' (6-1-3) इति नकारस्य द्वित्वनिषेधः।
2. 'क्वुन् शिल्पिसंज्ञयोः' इत्यौणादिकः क्वुन् प्रत्ययः। 'क्षिपकादीनां च' (वा. 7-3-45) इति 'प्रत्ययस्थात्' (7-3-44) इति प्राप्तस्येत्त्वस्य निषेधः। **इन्वकाः** तारकाविशेषाः।
3. 'कृत्यचः' (8-4-29) इति णत्वं न, णत्वप्रकरणे नुम्ग्रहणस्यानुस्वारोपलक्षणत्वात्।

A. 'विश्वेन्वितं स्वङ्मधुपिन्विताङ्गकं मिन्वन्तमुच्चैः कृपयैव निन्वकान्।' धा. का. 1-75.

(74) "इष गतौ" (IV-दिवादि:-1127-सक. सेट्. पर.)

'इष्णात्याभीक्ष्ण्ये, इच्छायामिच्छेद्, गत्यर्थे इष्यति।' (श्लो 168) इति **देवः**।

एषकः-षिका,	एषकः-षिका,	[1]एषिषिषकः-षिका ;
[2]एषिता-त्री,	एषयिता-त्री,	एषिषिषिता-त्री ;
[3]इष्यन्-न्ती,	एषयन्-न्ती,	एषिषिषन्-न्ती ;
एषिष्यन्-न्ती-ती,	एषयिष्यन्-न्ती-ती ;	एषिषिषिष्यन्-न्ती-ती ;
—	एषयमाणः,	एषयिष्यमाणः ;
इट्-इषौ-इषः ;	—	—
इषितम्-[A]तः-तवान्,	एषितम्-तः,	एषिषिषितः-तवान् ;
[4]इषः, एषः, प्रैषः[5],	एषिषिषुः,	एषिषयिषुः ;
एषितव्यम्,	एषयितव्यम्,	एषिषिषितव्यम् ;
एषणीयम्,	एषणीयम्,	एषिषिषणीयम् ;
एष्यम्, [B]प्रैष्यः,	एष्यम्,	एषिषिष्यम् ;
ईषदेषः, दुरेषः, स्वेषः ;	—	—
इष्यमाणः,	एष्यमाणः,	एषिषिष्यमाणः ;
एषः,	एषः,	एषिषिषः ;
[A]एषितुम्,	एषयितुम्,	एषिषिषितुम् ;
[6]एषणा, [7]परीष्टिः-पर्येषणा, अन्वेषणा,		एषिषिषा, एषिषयिषा ;

1. ओणेर्ऋदित्करणात् उपधाकार्यं प्रबलम्। पूर्वं लघूपधगुणे द्वितीयस्यैकाचः 'षिस्' इत्यस्य द्वित्वम्।
2. 'तीषसह—' (7-2-48) इतीड्विकल्पस्तु नात्र प्रवर्तते, 'इषेस्तकारे श्यन्प्रत्ययात् प्रतिषेधो वक्तव्यः' (वा. 7-2-48) इति वार्तिकात्।
3. 'दिवादिभ्यः श्यन्' (3-1-69) इति श्यन्। श्यनः ङिद्वद्भावात् गुणो न।
4. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कः।
5. 'प्रादूहोढोढ्यैषैष्येषु' (वा. 6-1-89) इति वृद्धिः।
6. 'इषेरनिच्छार्थस्य' (वा. 3-3-107) इति युच्।
7. 'परेर्वा' (वा. 3-3-107) इति युच् वा।

A. '**एषितुं प्रेषितो** यातो मया तस्यानुजो वनम्॥' भ. का. 5-82.
B. 'देहि प्रभोः **प्रैष्य** सुलोहनाय मे जीर्णांशुकायस्त्वमजीर्णमंशुकम्॥' धा. का. 2-57.

एषणम्,	एषणम्,	एषिषिषणम् ;
[1]एषित्वा,	एषयित्वा,	एषिषिषित्वा ;
प्रेष्य,	प्रेष्य,	समेषिषिष्य ;
एषम् २, एषित्वा २,	एषम् २, एषयित्वा २,	एषिषिषम् २ ; एषिषिषित्वा २.

(75) "इष इच्छायाम्" (VI-तुदादि:-1351-सक. सेट्. पर.) (अ)

'इष्णात्याभीक्ष्ण्ये, इच्छायां इच्छेद्, गत्यर्थे इष्यति।' (168 श्लो) इति **देवः**।

एषकः-षिका, [2]एषिषिषकः-षिका ;	एष्टव्यम्, एषितव्यम् ;
[3]एष्टा-ष्ट्री, [A]एषिता-त्री ;	
[4]इच्छन्-[B]न्ती-ती ;	एषणीयम् ;
एषिष्यन्-न्ती-ती ;	एष्यम् ;
[5]इट्-इड्-इषौ-इषः ;	ईषदेषः-दुरेषः-स्वेषः ;
[6]इष्टः-ष्टम्-ष्टवान् ;	इष्यमाणः ;
इषः, एषः, एषिषिषुः, [7]इच्छुः[C] ; [8]शरणैषी[D]	एषः ;
	एष्टुम्—एषितुम् ;

1. 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधाद्गुणः।

(अ) केचिदमुं धातुमुदितं पठन्ति। तत्फलं तु क्त्वायामिड्विकल्प इति वक्तव्यम्। 'इषेस्तकारे श्यन्प्रत्ययात् प्रतिषेधो वक्तव्य' इति **भाष्यात्** तकारादावार्धधातुके इड्विकल्पः सिद्ध एवेत्यत उदित्त्वस्य फलं न।

2. सनि, णौ च पूर्वोक्तेषि (74) धातुवद्रूपाणि ज्ञेयानि।
3. 'तीषसह—' (7-2-48) इति तादेरार्धधातुकस्य इड्विकल्पः।
4. 'इषुगमियमां छः' (7-3-77) इति शे परे छकार आदेशः।
5. 'झलां जशोऽन्ते' (8-2-39) इति जश्त्वम्। चर्त्वविकल्पः।
6. 'यस्य विभाषा' (7-2-15) इतीण्णिषेधः।
7. 'विन्दुरिच्छुः' (3-2-169) इति तच्छीलादिषु उप्रत्ययः छकारश्च निपातितः।
8. 'सुप्यजातौ—' (3-2-78) इति णिनिः।

A. '**एष्टारमेषिता** संख्ये सोढारं सहिता भृशम्।' भ. का. 9-31.
B. "मुरादिबन्धुः क्षुरघोरचेताः पुरन् खलानां जनजीवबर्ही। कंसः स्थितो यत्र ततर्ह लोकं स्तृढामरस्तृंहकरान**भीच्छन्**॥" धा. का. 2-77.
C. '**इच्छुः** प्रसादं प्रणमन् सुग्रीवः प्रावदन् नृपम्॥' भ. का. 7-24.
D. 'अध्यासितं श्रिया ब्राह्मया शरण्यं **शरणैषिणाम्**॥' भ. का. 4-4.

इष्टि[1]:, [A]इच्छा[2] ; प्रेष्य ;

एषणम्, एषणी[3] ; एषम् २, [ए]षित्वा २, इष्ट्वा २,

एषित्वा ; } इष्टका[4].
इष्ट्वा ; }

(76) **“ इष आभीक्ष्ण्ये ”** (IX - क्र्यादिः-1525. सक. सेट्. पर.)

‘ इष्णात्याभीक्ष्ण्ये, इच्छायां इच्छेद्, गत्यर्थ इष्यति । ’ (श्लो. 168) इति **देवः** ।

‘ इषेस्तकारे श्यन्प्रत्ययात् प्रतिषेधो वक्तव्य ’ (वा. 7-2-48) इति वचनान् अस्यापि धातोः तादेरार्द्धधातुकस्य इड्विकल्पः । तदानीं शुद्धाद्धातोः (75) **इच्छार्थ**कधातुवत्, ण्यन्तात् सन्नन्ताच्च (74) **इष**धातुवच्च रूपाणि ज्ञेयानि । शतरि परं—इष्णन्-ती (‘क्र्यादिभ्यः श्ना ’ (3-1-81) इति श्नाप्रत्ययः । ‘ श्नाभ्यस्तयोरातः ’ (6-4-112) इति आकारलोपे रूपम्) इति विशेषः । आभीक्ष्ण्यं=पौनःपुन्यम्, भृशार्थो वा । तद्विषयायां क्रियायामित्यर्थः ।

(77) **“ ई (वी) गतिव्याप्तिप्रजनकान्त्यसनखादनेषु ”**

(II-अदादिः-1048 - स. अनि. पर.)

‘ अयत्येतीयते गत्यां, अधीतेऽध्येति चेङिकोः । ’ (श्लो 14) इति **देवः** । **प्रजनम्**=गर्भग्रहणम् । ‘ वी गति—’ (II-1048. सक. अनि. पर.) इति धातौ प्रश्लिष्टोऽयं धातुः ।

आयकः-यिका,	आयकः-यिका,	[5]ईषिषकः-षिका ;
एता-त्री,	आययिता-त्री,	ईषिषिता-त्री ;
[6]इयन्[B]-ती,	आययन्-न्ती,	ईषिषन्-न्ती ;

1. ‘ श्रुयजीषिस्तुभ्यः करणे ’ (वा. 3-3-94) इति क्तिन् । बाहुलकाद्भावेऽपीष्टिरिति ।
2. ‘ इच्छा ’ (3-3-101) इति भावे शे यगभावो निपात्यते ।
3. करणे ल्युटि स्त्रियां ङीप् । तुलना ।
4. ‘ इष्यशिभ्यां तकन् ’ (द. उ. 3. 30) इति तकन् प्रत्ययः । इष्यते श्रेयोऽर्थिभिरिति विग्रहः ।
5. ‘ इको झल् ’ (1-2-9) इति सनः कित्त्वम् । ‘ पर्जन्यवल्लक्षणं प्रवर्तते ’ (**भाष्यम्**) इति न्यायात् ‘ अज्झनगमां सनि ’ (6-4-16) इति दीर्घः ।
6. ‘ अचि श्नुधातु—’ (6-4-77) इतीयङ् ।

A. ‘ निरचिक्रमदिच्छातः वानराँश्चङ्क्रमावतः ॥ ’ भ. का. 7-70.

B. ‘ **इयञ्जनं** राजपथं समायात् वाताकुलोद्धातपताकमीशः ॥ ’ धा. का. 2-48.

एष्यन्-न्ती-ती,	आययिष्यन्-न्ती-ती,	ईषिषिष्यन्-न्ती-ती ;
—	आययमानः,	आययिष्यमाणः ;
ईः—इयौ-इयः ;	—	—
[A]ईतः-तम्-तवान्,	आयितम्-तः,	ईषिषितः-तवान् ;
अयः, आयः,	ईषिषिषुः,	आयिययिषुः ;
एतव्यम्,	आययितव्यम्,	ईषिषितव्यम् ;
अयनीयम्,	आयनीयम्,	ईषिषणीयम् ;
एयम्, उपेयम्[B],	आय्यम्,	ईषिष्यम् ;
ईषदयः, दुरयः, स्वयः ;	—	—
ईयमानः,	आय्यमानः,	ईषिष्यमाणः ;
अयः,	आयः,	ईषिषः ;
एतुम्,	आययितुम्,	ईषिषितुम् ;
ईतिः,	आयना,	ईषिषिषा ; } आयिययिषा ; }
अयनम्,	आयनम्,	ईषिषणम् ;
ईत्वा,	आययित्वा,	ईषिषित्वा ;
समीय-प्रतीय,[C]	समाय्य,	समीषिष्य ;
आयम् २, } ईत्वा २, }	आयम् २, } आययित्वा २, }	ईषिषम् २ ; } ईषिषित्वा २. }

(78) **“ ईक्ष दर्शने ”** (I-भ्वादिः-610. सक. सेट्. आत्म.)

ईक्षकः-क्षिका,	ईक्षकः-क्षिका,	[1]ईचिक्षिषकः-षिका ;
ईक्षिता-त्री,	ईक्षयिता-त्री,	ईचिक्षिषिता-त्री ;
—	ईक्षयन्-न्ती,	ईक्षयिष्यन्-न्ती-ती ;

1. ‘ कुहोश्चुः ’ (7-4-62) इत्यभ्यासस्य चुत्वम् ।

A. ‘ इदं वचोऽनुच्चरमाण **ईते** तस्मिन् स्वमादाय शिशुं निकाय्यम् ।’ **वासुदेवविजये** — 2-20. **ईते** इति क्तान्तात् सप्तमी ।

B. ‘ ई गताविति धातोर्यत्, तस्मादेयमिति स्थिते । ‘एङी ’ति पररूपे स्यादुपेयमिति न त्विणः ॥ ’ इति **प्रक्रियासर्वस्वे** (पु. 80).

C. ‘ **प्रतीय** सा पूर्ददृशे जनेन द्यौर्भानुशीतांशुविनाकृतेव । राजन्यनक्षत्रसमन्वितापि शोकान्धकारक्षतसर्वचेष्टा ॥ ’ भ. का. 3-19.

[1]कृष्णाय ईक्षमाणः,[A] ईक्षयमाणः, ईचिक्षिषमाणः ;
ईक्षिष्यमाणः, ईक्षयिष्यमाणः, ईचिक्षिषिष्यमाणः ;
[2]ईट्-ईक्षौ-ईक्षः ; — —
ईक्षितः-तं-तवान्, ईक्षितः, ईचिक्षिषितः-तवान् ;
ईक्षः,प्रतीक्षः,प्रेक्षी[3], [4]भरतप्रतीक्षः-[B]क्षा, [C]अवसरप्रतीक्षः,ईचिक्षिषुः,ईचिक्षयिषुः;
ईक्षितव्यम्, ईक्षयितव्यम्, ईचिक्षिषितव्यम् ;
ईक्षणीयम्, ईक्षणीयम्, ईचिक्षिषणीयम् ;
ईक्ष्यम्, ईक्ष्यम्, ईचिक्षिष्यम् ;
ईषदीक्षः-दुरीक्षः-स्वीक्षः; — —
ईक्ष्यमाणः, ईक्ष्यमाणः, ईचिक्षिष्यमाणः ;
ईक्षः, व्यतीक्षा[5], ईक्षः ईचिक्षिषः ;
ईक्षितुम्, ईक्षयितुम्, ईचिक्षिषितुम् ;
ईक्षा, परीक्षा, ईक्षणा, ईचिक्षिषा, ईचिक्षयिषा ;
ईक्षणम्, ईक्षणम्, ईचिक्षिषणम् ;
ईक्षित्वा, ईक्षयित्वा, ईचिक्षिषित्वा ;
[D]प्रेक्ष्य-परीक्ष्य, समीक्ष्य, समीचिक्षिष्य ;
ईक्षम् २, ईक्षित्वा २, } ईक्षम् २, ईक्षयित्वा २, } ईचिक्षिषम् २ ; ईचिक्षिषित्वा २. }

1. 'राधीक्ष्योर्यस्य विप्रश्नः' (1-4-39) इति कृष्णस्य सम्प्रदानसंज्ञा ।
2. 'स्कोः' (8-2-29) इति कलोपः ।
3. 'सुप्यजातौ णिनिः-' (3-2-78) इति ताच्छील्ये णिनिः ।
4. 'ईक्षिक्षमिभ्यां च' (वा. 3-2-1) इति कर्मण्युपपदे णः । टाप् ।
5. कर्मव्यतीहारे विवक्षितेऽपि अभिधानस्वाभाव्यात् अत्र णच् नेष्ट इति स्पष्टं भाष्ये (3-3-43) ।

A. '**वीक्षमाणो** मृगं रामः चित्रवृत्तिं विसिष्मिये ॥' (भ. का. 5-51) । 'स्तुतिशीला हरिकामा फलभक्षा कानने व्रताचारा। **तदुपग्रहप्रतीक्षा** वसति द्वन्द्वक्षमा मुनिश्रेणी ॥' इति **प्रक्रियासर्वस्वे** ।
B. 'ताः सान्त्वयन्ती **भरतप्रतीक्षा** तं बन्धुता न्यक्षिपदाशु तैले ।' (भ. का. 3-23) ।
C. 'आसीत राजा**वसरप्रतीक्षः** तदा प्रयासं वितथं न कुर्यात् ॥' (भ. का. 12-29) ।
D. 'सङ्क्लेशितस्वकथदक्षणदीक्षितं तं **प्रेक्ष्यैष** जन्मफलमीषितवान् महात्मा ॥' (धा. का. 1-77) ।

(79) "ईखि गतौ" (I-भ्वादिः-142-सक. से.-पर.)

ईङ्खकः-खिका, ईङ्खकः-ङ्खिका, ईञ्चिखिषकः-षिका, ईंखिता, ईङ्खयिता, ईञ्चिखिषिता-त्री-ईङ्खन्[A]-न्ती ; इत्यादिकं सर्वं 'इखि गतौ' (64) इति धातुवत् ज्ञेयम् ।

(80) "ईङ् गतौ" (IV-दिवादिः-1143-सक. अनि-आत्म-)

'अयत्येतीयते गत्यां, अधीतेऽध्येति चेङिकोः ।' (श्लो-14) देवः ।

ईयमानः, एष्यमाणः, आययमानः, आययिष्यमाणः, ईषिषमाणः, ईषिषिष्यमाणः ; इति-शानचि रूपाणि । [B]निरीतः, अन्यानि सर्वाण्यपि 'ई' धातुवत् (77) रूपाणि ज्ञेयानि ।

(81) "ईज गतिकुत्सनयोः" (I-भ्वादिः-182-सक-सेट्-आत्म.)

ईजकः-जिका, ईजकः-जिका, ईजिजिषकः-षिका ;
ईजिता-त्री, ईजयिता-त्री, ईजिजिषिता-त्री ;
— ईजयन्-न्ती, ईजयिष्यन्-न्ती-ती ;
ईजमानः, ईजयमानः, ईजिजिषमाणः ;
ईजिष्यमाणः, ईजयिष्यमाणः, ईजिजिषिष्यमाणः ;
ईक्-ईजौ-ईजः ; — —
[C]ईजितम्-तः-तवान्, [1]ईजितः, ईजिजिषितः-तवान् ;
ईजः, ईजः, ईजिजिषुः, ईजिजयिषुः ;
ईजितव्यम्, ईजयितव्यम्, ईजिजिषितव्यम् ;
ईजनीयम्, [2]ईजनीयम्, ईजिजिषणीयम् ;
[3]ईज्यम्, ईज्यम्, ईजिजिष्यम् ;

1. 'निष्ठायां सेटि' (6-4-52) इति णेर्लोपः ।
2. 'णेरनिटि' (6-4-51) इति णेर्लोपः ।
3. निष्ठायां सेट्त्वात् 'चजोः—' (7-3-52) इति कुत्वं न ।

A. 'एखच्चकोरोत्करमिङ्खितं शुकैः **प्रेङ्ख**लतावलगनरङ्गमण्डपम् ।' (धा. का. 1-20) ।
B. 'आपीय तद्गिरममान**निरीत**रोषः प्रीतिं श्यतोऽस्य स करेण शिरोधिमच्छात् ।' (धा. का. 2-59) ।
C. 'अभ्रेजि विभ्रारिभ**रनीजितै**श्च यत् कदाप्यशोचद्भिरशेषजन्तुभिः ।' धा. का. 1-25.

ईषदीजः, दुरीजः, स्वीजः ;	—	—
ईज्यमानः,	ईज्यमानः,	ईजिजिष्यमाणः ;
ईजः,	ईजः,	ईजिजिषः ;
ईजितुम् ,	ईजयितुम् ,	ईजिजिषितुम् ;
ईजा,	ईजना,	ईजिजिषा, ईजिजयिषा ;
ईजनम् ,	ईजनम् ,	ईजिजिषणम् ;
ईजित्वा,	ईजयित्वा,	ईजिजिषित्वा ;
समीज्य,	समीज्य,	समीजिजिष्य ;
ईजम् २, }	ईजम् २, }	ईजिजिषम् २ ; }
ईजित्वा २, }	ईजयित्वा २, }	ईजिजिषित्वा २. }

(82) **" ईड स्तुतौ "** (II-अदादिः-1019. सक. से. आत्म.)

'—स्तुत्यामीट्टे तत्रेडयेण्णिचि ।' (श्लो-84) इति **देवः** ।

ईडकः-डिका,	ईडकः-डिका,	ईडिडिषकः-षिका ;
ईडिता-त्री,	ईडयिता-त्री,	ईडिडिषिता-त्री ;
—	ईडयन्-न्ती,	ईडयिष्यन्-न्ती-ती ;
ईडानः,	ईडयमानः,	ईडिडिषमाणः ;
ईडिष्यमाणः,	ईडयिष्यमाणः,	ईडिडिषिष्यमाणः ;
ईट्-ईडौ-ईडः ;	—	—
ईडितः-तं-तवान् ,	ईडितः-तं,	ईडिडिषितः-तवान् ;
ईडः,	ईडः,	ईडिडिषुः, ईडिडयिषुः;
ईडितव्यम् ,	ईडयितव्यम् ,	ईडिडिषितव्यम् ;
ईडनीयम् ,	ईडनीयम् ,	ईडिडिषणीयम् ;
[A]ईड्यम् ,	ईड्यम् ,	ईडिडिष्यम् ;
ईषदीडः, दुरीडः, स्वीडः ;		—
ईड्यमानः,	ईड्यमानः,	ईडिडिष्यमाणः ;
ईडः,	ईडः,	ईडिडिषः ;
ईडितुम् ,	ईडयितुम् ,	ईडिडिषितुम् ;

A. '**ईड्यो**ऽयमीशः समुपास्तिशीलैराशासितः पीतपटीं वसानः । स्वीयैश्चकंसे कशनीयकासी रमोछर्निसी नतचित्तनिज्ञी ॥' धा. का. 2-45.

ईडा[1],	ईडना,	ईडिडिषा, ईडिडयिषा ;
ईडनम् ,	ईडनम् ,	ईडिडिषणम् ;
ईडित्वा,	ईडयित्वा,	ईडिडिषित्वा ;
समीड्य,	समीड्य,	समीडिडिष्य ;
ईडम् २, }	ईडम् २, }	ईडिडिषम् २ ; }
ईडित्वा २, }	ईडयित्वा २, }	ईडिडिषित्वा २. }

(82-A) **" ईड स्तुतौ "** (X-चुरादिः-1668. सक. सेट्. उभय.)

'—स्तुत्यामीट्टे तत्रेडयेण्णिचि ।' (श्लो-84) इति **देवः** ।

ईडकः-डिका,	ईडिडयिषकः-षिका ;
ईडयिता-त्री,	ईडिडयिषिता-त्री ;
ईडयन्-न्ती,	ईडिडयिषन्-न्ती ;
ईडयिष्यन्-न्ती-ती,	ईडिडयिषिष्यन्-न्ती-ती ;
ईडयमानः,	ईडिडयिषमाणः ;
ईडयिष्यमाणः,	ईडिडयिषिष्यमाणः ;
ईट्-ईडौ-ईडः ;	—
ईडितम्-तः,	ईडिडयिषितः-तवान् ;
ईडः,	ईडिडयिषुः;
ईडयितव्यम् ,	ईडिडयिषितव्यम् ;
ईडनीयम् ,	ईडिडयिषणीयम् ;
[A]ईड्यम् ,	ईडिडयिष्यम् ;
ईषदीडः-दुरीडः-स्वीडः ;	—
ईड्यमानः,	ईडिडयिष्यमाणः ;
ईडः,	ईडिडयिषः ;
ईडयितुम् ,	ईडिडयिषितुम् ;
ईडना,	ईडिडयिषा ;

1. 'गुरोश्च हलः' (3-3-103) इत्यः प्रत्ययः ।

A. 'खेदस्त्वियान् पटहगर्दनगर्जिताशे रङ्गे सगर्धनसुगर्दितवीरलोके ।
मञ्चाग्रपूर्वितनृपे शिशुना रणं वः स्यादेव मानपरिजंसक**मीड्य**धाम्नाम् ॥'
धा. का. 3-31.

ईडनम् ,	ईडिडयिषणम् ;
ईडयित्वा,	ईडिडयिषित्वा ;
समीड्य,	समीडिडयिष्य ;
ईडम् २, ईडयित्वा २, }	ईडिडयिषम् २ ; ईडिडयिषित्वा २. }

(83) **"ईर गतौ कम्पने च"** (II-अदादिः-1018-अक. सक. सेट्. आत्म.)

'—ईरयतीरति। ईरेः क्षेपे विभाषा णौ लुकीर्ते गतिकम्पयोः ॥' (श्लो-153) इति **देवः**।

ईरकः-रिका,	ईरकः-रिका,	ईरिरिषकः-षिका ;
ईरिता-त्री,	ईरयिता-त्री,	ईरिरिषिता-त्री ;
—	[1]ईरयन्-न्ती,	ईरयिष्यन्-न्ती-ती ;
ईराणः,	[2]ईरयमाणः,	ईरिरिषमाणः ;
ईरिष्यमाणः,	[2]ईरयिष्यमाणः,	ईरिरिषिष्यमाणः ;
ईः-ईरौ-ईरः ;	—	—
ईरितः-तम्-तवान् ,	ईरितः-तं,	ईरिरिषितः-तवान् ;
[3]ईरः, समीरः, [4]नीरः,	ईरः, ईरिरिषुः, ईरिरयिषुः, [5]स्वैरी, [6]समीरणः ;	
ईरितव्यम् ,	ईरयितव्यम् ,	ईरिरिषितव्यम् ;
ईरणीयम् ,	ईरणीयम् ,	ईरिरिषणीयम् ;
ईर्यम् ,	ईर्यम् ,	ईरिरिष्यम् ,
ईषदीरः-दुरीरः-स्वीरः ;	—	—
[A]ईर्यमाणः, प्रेर्यमाणः,	ईर्यमाणः,	ईरिरिष्यमाणः ;

1. 'निगरणचलनार्थेभ्यश्च' (1-3-87) इति ण्यन्तात् परस्मैपदमेव।
2. गत्यर्थकत्वे तु ण्यन्तात् आत्मनेपदमपि भवति।
3. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कः। वायुः।
4. 'निम्नम् ईर्ते=गच्छतीति **नीरम्**=जलम्। वृत्तिविषये **निर्**शब्दः निम्नार्थकः, इति **माधवीयधातुवृत्तौ**। 'कर्मण्यण्' (3-2-1) इत्यण्।
5. स्वेन ईरितुं शीलमस्येति ताच्छील्ये 'सुप्यजातौ—' (3-2-78) इति णिनिः।
6. 'चलनशब्दार्थादकर्मकाद्युच्' (3-2-148) इति युच् तच्छीलादिषु। वायुः। अथवा, ण्यन्तात् नन्द्यादित्वात् कर्तरि ल्युः।

A. 'चिकीर्षिते पूर्वतरं स तस्मिन् क्षेमंकरेऽर्थे मुहु**रीर्यमाणः**। मात्राऽतिमात्रं शुभयैव बुद्ध्या चिरं [illegible]।' भ. क. 12-6.

ईरः, [1]स्वैरम् ,	ईरः,	ईरिरिषः ;
ईरितुम् ,	ईरयितुम् ,	ईरिरिषितुम् ;
ईरा,	ईरणा,	ईरिरिषा; ईरिरयिषा;
ईरणम्,	ईरणम् ,	ईरिरिषणम् ;
ईरित्वा,	ईरयित्वा,	ईरिरिषित्वा ;
प्रेर्य,	समीर्य,	समीरिरिष्य ;
ईरम् २, ईरित्वा २, }	ईरम् २, ईरयित्वा २, }	ईरिरिषम् २ ; ईरिरिषित्वा २. }

(84) **"ईर क्षेपे"** (X-चुरादिः-1811-सक. सेट्. उभ. **आधृषीयः**)

'ईरयतीरति। ईरेः क्षेपे विभाषा णौ लुकीर्ते गतिकम्पयोः।' (श्लो. 153) इति **देवः**।

'आधृषाद्वा' (ग. सू. चुरादौ) इति णिचो **वैकल्पिकत्वम्**। ण्यन्तात् शुद्धाच्च धातोः पूर्वोक्तेरतिवत् (83) रूपाणि सर्वाणि ज्ञेयानि। णिजभावपक्षे 'शेषात् कर्तरि परस्मैपदम्' (1-3-78) इति शास्त्रात् शतरि ईरन्-न्ती ईरिष्यन्-न्ती-ती इति रूपाणि—इति विशेषः। ण्यन्तात् सनि तु—

ईरिरयिषकः-षिका,	ईरिरयिष्यम् ;
ईरिरयिषिता-त्री,	ईषदीरिरयिषः ;
ईरिरयिषन्-न्ती,	ईररियिष्यमाणः ;
ईरिरयिषिष्यन्-न्ती-ती,	ईरिरयिषितुम् ;
ईरिरयिषमाणः,	ईरिरयिषा ;
ईरिरयिषिष्यमाणः,	ईरिरयिषणम् ;
ईरिरयिषितः-तवान् ,	ईरिरयिषित्वा ;
ईरिरयिषुः,	समीरिरयिष्य ;
ईरिरयिषितव्यम् ,	ईरिरयिषम् २ ; ईरिरयिषित्वा २. }
ईरिरयिषणीयम् ;	
—	इत्यादि रूपाणि।

1. ईरणम्=ईरः। स्वेनाभिप्रायेणेरोऽस्मिन्—इति **स्वैरम्**। घञ्। स्वभावान्नपुंसकलिङ्गत्वम्।

(85) "ईक्ष्य ईर्ष्यायाम्" (I-भ्वादिः-510-सक-सेट्.पर.)

ईर्ष्या=असहनम् ।

ईक्ष्यकः-क्ष्यिका, ईक्ष्यकः-क्ष्यिका, [1]ईचिक्षियषकः-षिका ;
ईक्षियता-त्री, ईक्ष्ययिता-त्री, ईचिक्षियषिता-त्री ;
ईक्ष्यन्-न्ती, ईक्ष्ययन्-न्ती, ईचिक्षियषन्-न्ती ;
ईक्षियष्यन्-न्ती-ती, ईक्ष्ययिष्यन्-न्ती-ती, ईचिक्षियषिष्यन्-न्ती-ती;
—, ईक्ष्ययमाणः, ईक्ष्ययिष्यमाणः ;
[2]ईट्-ईक्ष्यौ-ईक्ष्यः ; —, —
ईक्षियतम्-तः-तवान्, ईक्षियतः, ईचिक्षियषितः-तवान् ;
ईक्ष्यः, ईक्ष्यः, ईचिक्षियषुः ;
ईक्षियतव्यम्, ईक्ष्ययितव्यम्, ईचिक्षियषितव्यम् ;
ईक्ष्यणीयम्, ईक्ष्यणीयम्, ईचिक्षियषणीयम् ;
ईक्ष्यम्, ईक्ष्यम्, ईचिक्षियष्यम् ;
ईषदीक्ष्यः, दुरीक्ष्यः, स्वीक्ष्यः ; —
ईक्ष्यमाणः, ईक्ष्यमाणः, ईचिक्षियष्यमाणः ;
ईक्ष्यः, ईक्ष्यः, ईचिक्षियषः ;
ईक्षियतुम्, ईक्ष्ययितुम्, ईचिक्षियषितुम् ;
[A]ईक्ष्या, ईक्ष्यणा, ईचिक्षियषा ;
ईक्ष्यणम्, ईक्ष्यणम्, ईचिक्षियषणम् ;
ईक्षियत्वा, ईक्ष्ययित्वा, ईचिक्षियषित्वा ;
समीक्ष्य, समीक्ष्य, समीचिक्षियष्य ;
ईक्ष्यम् २, ईक्षियत्वा २, } ईक्ष्यम् २, ईक्ष्ययित्वा २, } ईचिक्षियषम् २, ईचिक्षियषित्वा २. }

1. अभ्यासे चकारेकारयोः, उत्तरखण्डे ककारषकारयकाराणां च श्रवणं बोध्यम् ।
2. 'स्कोः संयोगाद्योः—' (8-2-29) इति ककारस्य लोपः । षकारस्य जश्त्वम् । यकारस्य संयोगान्तलोपः ।

A. 'राधाकृते**क्ष्या**कलहावलोकनात् ईर्ष्यां हयन्त्या रमया प्रमोदितम् ।' धा.का. 1-66.

(86) "ईर्ष्य ईर्ष्यायाम्" (I-भ्वादिः-511-सक. सेट्. पर.)

ईर्ष्या=कामजम् असहनम्-इति **क्षीरस्वामी** ।

ईर्ष्यकः-र्ष्यिका, ईर्ष्यकः-र्ष्यिका, [1]ईर्ष्य्यियिषकः-ईर्ष्यिषिषकः-[2]षिका ;
ईर्ष्यिता-त्री, ईर्ष्ययिता-त्री, ईर्ष्य्यियिषिता, ईर्ष्यिषिषिता-त्री ;
ईर्ष्यन्-न्ती, ईर्ष्ययन्-न्ती, ईर्ष्य्यियिषन्-न्ती, ईर्ष्यिषिषन्-न्ती ;
ईर्ष्यिष्यन्-न्ती-ती, ईर्ष्ययिष्यन्-न्ती-ती, ईर्ष्य्यियिषिष्यन्-न्ती-ती,
ईर्ष्यिषिषिष्यन्-न्ती-ती ;
—, ईर्ष्ययमाणः, ईर्ष्ययिष्यमाणः ; —
[3]ईर्ट्-ईर्ष्यौ-ईर्ष्यः ; —, —, —
ईर्ष्यितम्-तः-तवान्, ईर्ष्यितः, ईर्ष्य्यियिषितम्, ईर्ष्यिषिषितम्-तः-तवान् ;
ईर्ष्यः, ईर्ष्यः, ईर्ष्य्यियिषुः, ईर्ष्यिषिषुः ;
ईर्ष्यितव्यम्, ईर्ष्ययितव्यम्, ईर्ष्य्यियिषितव्यम्, ईर्ष्यिषिषितव्यम् ;
ईर्ष्यणीयम्, ईर्ष्यणीयम्, ईर्ष्य्यियिषणीयम्, ईर्ष्यिषिषणीयम् ;
ईर्ष्य्यम्, ईर्ष्यम्, ईर्ष्य्यियिष्यम्, ईर्ष्यिषिष्यम् ;
ईषदीर्ष्यः, दुरीर्ष्यः, स्वीर्ष्यः ; —
ईर्ष्यमाणः, ईर्ष्यमाणः, ईर्ष्य्यियिष्यमाणः, ईर्ष्यिषिष्यमाणः ;
ईर्ष्यः, ईर्ष्यः, ईर्ष्य्यियिषः, ईर्ष्यिषिषः ;
ईर्ष्यितुम्, ईर्ष्ययितुम्, ईर्ष्य्यियिषितुम्, ईर्ष्यिषिषितुम् ;
[A]ईर्ष्या, ईर्ष्यणा, ईर्ष्य्यियिषा, ईर्ष्यिषिषा ;
ईर्ष्यणम्, ईर्ष्यणम्, ईर्ष्य्यियिषणम्, ईर्ष्य्यिषिषणम् ;
ईर्ष्यित्वा, ईर्ष्ययित्वा, ईर्ष्य्यियिषित्वा, ईर्ष्यिषिषित्वा ;
समीर्ष्य, समीर्ष्य, समीयिष्य, समीर्ष्यिषिष्य ;
ईर्ष्यम् २, ईर्ष्यित्वा २, } ईर्ष्यम् २, ईर्ष्ययित्वा २, } ईर्ष्य्यियिषम् २, ईर्ष्य्यियिषित्वा २, } ईर्ष्यिषिषम् २ ; ईर्ष्यिषिषित्वा २. }

1. 'ईर्ष्यतेस्तृतीयस्य' (वा. 6-1-3) इति वार्तिके तृतीयस्य व्यञ्जनस्य, तृतीयस्य एकाच इति वा पक्षद्वयमभिप्रेतम् । आद्यपक्षे एवं रूपम् । यकारस्य द्वित्वम् ।
2. द्वितीयपक्षे सनो द्वित्वम् ।
3. 'लोपो व्योर्वलि' (6-1-66) इति वलि लोपे, 'झलां जशोऽन्ते' (8-2-39) इति जश्त्वम् । 'रात् सस्य' (8-2-24) इति नियमात् संयोगान्तलोपो न ।

A. 'राधाकृते**क्ष्या**कलहावलोकनात् **ईर्ष्यां** हयन्त्या रमया प्रमोदितम् ।' धा.का. 1-66.

(87) **"ईश ऐश्वर्ये"** (II-अदादिः-1020. अक. सेट्. आत्म.)

ईशकः-शिका, ईशकः-शिका, ईशिशिषकः-षिका ;
[A]ईशिता-त्री, ईशयिता-त्री, ईशिशिषिता-त्री ;
— ईशयन्-न्ती, ईशयिष्यन्-न्ती-ती ;
[B]ईशानः, ईशयमानः, ईशिशिषमाणः ;
ईशिष्यमाणः, ईशयिष्यमाणः, ईशिशिषिष्यमाणः ;
[1]ईट्-ईशौ-ईशः, [C]भुजगेट् ; —
ईशितः-तम्-तवान्, ईशितः, ईशिशिषितः-तवान् ;
[D]ईशः, [2]ईश्वर[E]:-रा, ईशिशिषुः, ईशानः, [F]ईश्वरी[4], ईशिशयिषुः ;
ईशितव्यम्, ईशयितव्यम्, ईशिशिषितव्यम् ;
ईशनीयम्, ईशनीयम्, ईशिशिषणीयम् ;
ईश्यम्, ईश्यम्, ईशिशिष्यम् ;
ईषदीशः, दुरीशः, स्वीशः; —
ईश्यमानः, ईश्यमानः, ईशिशिष्यमाणः ;
ईशः, ईशः, ईशिशिषः ;
ईशितुम्, ईशयितुम्, ईशिशिषितुम् ;

---

1. शान्तत्वात् 'व्रश्चभ्रस्ज—' (8-2-36) इति षत्वे, जश्त्वम् ।
2. 'स्थेशभासपिसकसो वरच्' (3-2-175) इति वरच् ताच्छीलिकः । 'नेड् वशि कृति—' (7-2-8) इतीण्णिषेधः । स्त्रियां टाप् ।
3. 'ताच्छील्यवयोवचनशक्तिषु चानश्' (3-2-129) इति चानश् ।
4. 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति वनिपि, स्त्रियां 'वनो र च' (4-1-7) इति ङीप् रेफादेशश्च । **आत्रेया**दयस्तु व्याप्त्यर्थकादश्नुतेरौणादिके (5-17) वरटि धातोरीकारे, टित्वात् ङीपि समर्थयन्ति । बहुलग्रहणादीशधातोरेव वा वरटि रूपमित्यपि च केचित् ।

A. '**तमीशितारं** तिसृणां गतीनां सुखाय नृणामुररीकृताङ्गम् ।' वा. वि. 3-24.
B. 'अमितंपच**मीशानं** सर्वभोगीणमुत्तमम् ।' भ. का. 6-97.
C. '**भुजगेशि** निशाकराभिरामे द्विषतां शोककरे तदाऽवतीर्णे' । वा. वि. 2-67.
D. 'ईड्योऽय**मीशः** समुपास्ति शैलैराशासितः पीतपटीं वसानः ।' धा. का. 2-45.
E. 'अभीरुरवसं स्त्रीभिः भासुराभिरि**हेश्वरः** ॥' भ. का. 7-25.
F. 'समग्रशक्तिस्समयोपयातः प्राणे**श्वरीं** प्राप्तुमियेष शौरिः' या. अ. 13-1. गौरादित्वात् ङीप् ।

ईशा, ईशना, ईशिशिषा, ईशिशयिषा ;
ईशनम्, ईशनम्, ईशिशिषणम् ;
ईशित्वा, ईशयित्वा, ईशिशिषित्वा ;
समीश्य, समीश्य, समीशिशिष्य ;
ईशम् २, ईशित्वा २, } ईशम् २, ईशयित्वा २, } ईशिशिषम् २ ; ईशिशिषित्वा २. }

(88) **"ईष गतिहिंसादर्शनेषु"** (I-भ्वादिः-611-सक. सेट्. आत्म.)

'ईषतीतीष उञ्छेऽर्थे, गत्यादावीषते भवेत् ।' (श्लो-169) इति **देवः** ।

ईजधातुवत् (81) रूपाणि ज्ञेयानि । मनीषा—'गुरोश्च हलः' (3-3-103) इति अप्रत्ययः । 'शकन्ध्वादिषु टेः पररूपं वाच्यम्' (6-1-94) इति पररूपम् । मनस ईषा=मनीषा । ईषितवान्[A] ।

(89) **"ईष उञ्छे"** (I-भ्वादिः-684-सक. सेट्-पर.)

'ईषतीतीष उञ्छेऽर्थे, गत्यादावीषते भवेत् ।' (श्लो-169) इति **देवः** ।

ईषन्-न्ती, ईषिष्यन्-न्ती-ती, ईषयन्-न्ती, ईषयिष्यन्-न्ती-ती, ईषिषिषन्-न्ती, ईषिषिषिष्यन्-न्ती-ती, इति शतरि परं विशेषः । घञि ईषः[B] । अन्यानि रूपाणि सर्वाण्यपि ईजधातुवत् (81) ज्ञेयानि ।

(90) **"ईह चेष्टायाम्"** (I-भ्वादिः-632. अक.सेट्. आत्म.)

ईज गतिकुत्सनयोः—(81) इति धातुवत् सर्वाणि रूपाणि ज्ञेयानि ।

अभिधानस्वाभाव्यात् स्त्रियां कर्मव्यतीहारेऽपि णच् नेष्ट इति, तेन व्यतीहा-इत्येव रूपमिति च भाष्ये ।

(91) **"उक्ष सेचने"** (I-भ्वादिः-657. सक. सेट्-पर.)

उक्षकः-क्षिका, उक्षकः-क्षिका, उचिक्षिषकः-षिका ;
उक्षिता-त्री, उक्षयिता-त्री, उचिक्षिषिता-त्री ;

A. 'संक्लेशितस्वकथदक्षणदीक्षितं तं प्रेक्ष्यैष जन्मफल**मीषितवान्** महात्मा ॥' धा. का. 1-77.
B. 'शूषन् दृशोरमृतयूषमजूषकस्त्वं भूषस्यनूषमति**रीष**भुजां प्रियः क्ष्माम् ॥' धा. का. 1-86.

[A]उक्षन्-न्ती,	उक्षयन्-न्ती,	उचिक्षिषन्-न्ती ;
[1]व्यत्युक्षमाणः,	उक्षयमाणः,	उक्षयिष्यमाणः ;
उक्षिष्यन्-न्ती-ती,	उक्षयिष्यन्-न्ती-ती,	उचिक्षिषिष्यन्-न्ती-ती ;
[2]उट्-ड्-उक्षौ-उक्षः ;	—	—
उक्षितम्-तः,	उक्षितः-तं,	उचिक्षिषितः-तवान् ;
उक्षः, उक्षः,	उचिक्षिषुः,	उचिक्षयिषुः ;
उक्षितव्यम्,	उक्षयितव्यम्,	उचिक्षिषितव्यम् ;
उक्षणीयम्,	उक्षणीयम्,	उचिक्षिषणीयम् ;
उक्ष्यम्,	उक्ष्यम्,	उचिक्षिष्यम् ;
ईषदुक्षः, दुरुक्षः, सूक्षः ;	—	—
उक्ष्यमाणः,	उक्ष्यमाणः,	उचिक्षिष्यमाणः ;
उक्षः,	उक्षः,	उचिक्षिषः ;
उक्षितुम्,	उक्षयितुम्,	उचिक्षिषितुम् ;
उक्षा-उक्षणा, [B3]व्यात्युक्षी,	उचिक्षिषा,	उचिक्षयिषा ;
प्रोक्षणम्,	उक्षणम्,	उचिक्षिषणम् ;
उक्षित्वा,	उक्षयित्वा,	उचिक्षिषित्वा ;
प्रोक्ष्य,	अभ्युक्ष्य,	प्रोचिक्षिष्य ;
उक्षम् २, उक्षित्वा २,	उक्षम् २, उक्षयित्वा २,	उचिक्षिषम् २ ; उचिक्षिषित्वा २.
[4]उक्षा.	—	—

1. 'कर्तरि कर्मव्यतिहारे (1-3-14) इति आत्मनेपदम् ।
2. 'स्कोः—' (8-2-29) इति कलोपः ।
3. 'कर्मव्यतिहारे णच् स्त्रियाम्' (3-3-43) इति णचि 'णचस्त्रियामञ्' (5-4-14) इत्यञ् । 'टिड्ढा—' (4-1-15) इति ङीप् ।
4. 'श्वन् उक्षन्—' (द. उ-6-55.) इत्यादिना कनिन्प्रत्ययः । उक्षा=वृषभः ।

A. '**उक्षन्नेनं** मन्दहासेन रक्षन् विश्वन् निक्षन् वल्लवीस्त्रिक्षिताघाः ॥' धा. का. 1-83.

B. 'ताः कान्तैस्सह करपुष्करेरिताम्बु**व्यात्युक्षी**मभिसरणग्लहामदीव्यन् ॥' **शिशुपालवधे** (8-32) ।

(92) "उख गत्यर्थः" (I-भ्वादिः-128-सक. सेट्. पर.)

ओखकः-खिका,	ओखकः-खिका,	[1]ओचिखिषकः-षिका ;
ओखिता-त्री,	ओखयिता-त्री,	ओचिखिषिता-त्री ;
ओखन्-न्ती,	ओखयन्-न्ती,	ओचिखिषन्-न्ती ;
ओखिष्यन्-न्ती-ती,	ओखयिष्यन्-न्ती-ती,	ओचिखिषिष्यन्-न्ती-ती ;
—	ओखयमानः,	ओखयिष्यमाणः ;
उक्-उखौ-उखः ;	—	—
[2]ओखितम्[A], उखितम्, तः-तवान्,	ओखितः-तं,	ओचिखिषितम्-तः-तवान् ;
[3]उखः,	ओखः,	ओचिखिषुः, ओचिखयिषुः ;
ओखितव्यम्,	ओखयितव्यम्,	ओचिखिषितव्यम् ;
ओखनीयम्,	ओखनीयम्,	ओचिखिषणीयम् ;
ओख्यम्,	ओख्यम्,	ओचिखिष्यम् ;
ईषदोखः, दुरोखः, स्वोखः ;	—	—
उख्यमानः,	ओख्यमानः,	ओचिखिष्यमाणः ;
ओखः,	ओखः,	ओचिखिषः ;
ओखितुम्,	ओखयितुम्,	ओचिखिषितुम् ;
[4]उक्तिः,	ओखना,	ओचिखिषा, ओचिखयिषा ;
ओखनम्, [5]प्रोखणम्,	ओखनम्,	ओचिखिषणम् ;
[6]ओखित्वा,	ओखयित्वा,	ओचिखिषित्वा ;

1. ओणेः ऋदित्करणात् द्वित्वात् उपधाकार्यं प्रबलम् । तेन पूर्वं लघूपधगुणः । पश्चात् द्वित्वम् । ततः 'कुहोश्चुः' (7-4-62) इति अभ्यासे चुत्वम् ।
2. 'उदुपधात् भावादिकर्मणोरन्यतरस्याम' (1-2-21) इत्यत्र 'शब्विकरणेभ्य एवेष्यते' (वा. 1-2-21) इति वार्तिकात् कित्त्वविकल्पः ।
3. 'इगुपध—' (3-1-135) इति कर्तरि कः । **उखो** मुनिः ।
4. 'तितुत्र—' (7-2-9) इति नेट् । 'खरि च' (8-4-55) इति चर्त्वम् ।
5. 'एङि पररूपम्' (6-1-94) इति पररूपम् । 'कृत्यचः' (8-4-29) इति णत्वम् ।
6. 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधाद्गुणः ।

A. 'अराखितत्वगिभरलाखितच्छदैः प्रद्राखिताध्राखिफलैश्च शाखिभिः । (धा. का. 1-18) प्रश्लाखितं **प्रोखित**सत्त्वमुङ्कितं खगैर्वखन् मारुतवङ्खिसौरभम् ॥'

समुख्य,	समोख्य,	समोचिखिष्य ;
ओखम् २, ओखित्वा २,	ओखम् २, ओखयित्वा २,	ओचिखिषम् २ ; ओचिखिषित्वा २.

(93) "उखि गतौ" (I-भ्वादिः-129-सक.सेट्-पर.)

गत्यर्थकेङ्खतिवत् (64) सर्वाणि रूपाणि ज्ञेयानि ।

(94) "उङ् शब्दे" (I-भ्वादिः-953-अक. अनि. आत्म-)

आवकः-विका,	आवकः-विका,	[1]ऊषिषकः-षिका ;
ओता-त्री,	आवयिता-त्री,	ऊषिषिता-त्री ;
—	आवयन्-न्ती,	आवयिष्यन्-न्ती-ती ;
[A]अवमानः,	आवयमानः,	ऊषिषमाणः ;
ओष्यमाणः,	आवयिष्यमाणः,	ऊषिषिष्यमाणः ;
[2]समुत्-समुतौ-समुतः ;	—	—
उतम्-तः-तवान् ;	आवितम्-तः-तवान् ,	ऊषिषितम्-तः-तवान् ;
[3]अवः,	आवः,	ऊषिषुः, आविवयिषुः;
ओतव्यम् ,	आवयितव्यम् ,	ऊषिषितव्यम् ;
अवनीयम् ,	आवनीयम् ,	ऊषिषणीयम् ;
[4]अव्यम् , [5]अवश्याव्यम् ,	आव्यम् ,	ऊषिष्यम् ;
ईषदवः-दुरवः-स्ववः ;	—	—
[6]ऊयमानः,	आव्यमानः,	ऊषिष्यमाणः ;
[7]अवः,	आवः,	ऊषिषः ;

1. 'इको झल्' (1-2-9) इति सनः कित्त्वे, 'अज्झनगमां सनि' (6-4-16) इति दीर्घः । द्वित्वम् ।
2. 'ह्रस्वस्य पिति—' (6-1-71) इति तुक् ।
3. पचाद्यच् ।
4. 'अचो यत्' (3-1-97) इति यत् ।
5. 'ओरावश्यके' (3-1-125) इति ण्यत् ।
6. 'अकृत्सार्वधातुकयोर्दीर्घः' (7-4-25) इति दीर्घः ।
7. 'ऋदोरप्' (3-3-57) इत्यप् भावे ।

A. 'स्तोत्रा**वमानैः** द्रुतवेणुवीणैः च्युताशुभैर्व्योमचरैर्ज्युतं ते । प्रवे भवाब्धिप्लवमारुतानां धूतामयं भक्तिनिमेयमङ्घ्रिम् ॥' धा. का. 2-36.

ओतुम् ,	आवयितुम् ,	ऊषिषितुम् ;
उतिः,	आवना,	ऊषिषा, आविवयिषा ;
अवनम् ,	आवनम् ,	ऊषिषणम् ;
उत्वा,	आवयित्वा ;	ऊषिषित्वा ;
समुत्य,	समाव्य,	समूषिष्य ;
आवम् २, उत्वा २,	आवम् २, आवयित्वा २,	ऊषिषम् २ ; ऊषिषित्वा २.

(95) "उच समवाये" (IV-दिवादिः-1223. सक. सेट्. पर.)

समवायः=ऐक्यम्–इति क्षीरस्वामी ।

ओचकः-चिका,	ओचकः-चिका,	ओचिचिषकः-षिका ;
ओचिता-त्री,	ओचयिता-त्री,	ओचिचिषिता-त्री ;
[1]उच्यन्-न्ती,	ओचयन्-न्ती,	ओचिचिषन्-न्ती ;
ओचिष्यन्-न्ती-ती,	ओचयिष्यन्-न्ती-ती,	ओचिचिषिष्यन्-न्ती-ती;
—	ओचयमानः,	ओचयिष्यमाणः ;
उक्-उचौ-उचः ;	—	—
उचितम्-तः-तवान् ,	ओचितः-तं,	ओचिचिषितः-तवान् ;
ओक[2]:-न्योकः[3], ओकः,	ओचिचिषुः,	ओचिचयिषुः ;
ओचितव्यम् ,	ओचयितव्यम् ,	ओचिचिषितव्यम् ;
ओचनीयम् ,	ओचनीयम् ,	ओचिचिषणीयम् ;
ओच्यम् ,	ओच्यम् ,	ओचिचिष्यम् ;
ईषदोचः, दुरोचः, स्वोचः,	—	—
उच्यमानः,	ओच्यमानः,	ओचिचिष्यमाणः ;
ओकः-न्योकः,[4]	ओकः,	ओचिचिषः ;

1. 'दिवादिभ्यः श्यन्' (3-1-69) इति श्यन् । श्यनः शित्त्वात् 'सार्वधातुकमपित्' (1-2-4) इति ङिद्वद्भावात् उकारस्य गुणो न ।
2. 'ओक उचः के' (7-3-64) इति कप्रत्यये गुणः कुत्वञ्च निपातनात् ।
3. नियमेन उच्यति=समवैतीति **न्योकः**=शकुन्तो वृषलो वा । कर्तरि कः ।
4. नियमेनोच्यन्ति=समवयन्त्यत्रेत्यधिकरणकारके 'घञर्थे कविधानम्—' (वा. 3-3-58) इति कः । निपातनादेव कुत्वम् । वृक्षोऽर्थः । **ओकः**=गृहम् ।

ओचितुम्,	ओचयितुम्,	ओचिचिषितुम्;
उक्तिः,	ओचना, ओचिचिषा,	ओचिचयिषा;
ओचनम्,	ओचनम्,	ओचिचिषणम्;
[1]ओचित्वा,	ओचयित्वा,	ओचिचिषित्वा;
समुच्य,	समोच्य,	समोचिचिष्य;
[2]ओचम् २, ओचित्वा २,	ओचम् २, ओचयित्वा २;	ओचिचिषम् २; ओचिचिषित्वा २.
ओकः[3]-ओकसी.	—	—

(96) " उछि उञ्छे " (I-भ्वादिः-215-सक. सेट्. पर.)

'शशपोरुञ्छतीत्युञ्छे स्वरभेदाद् द्विरुच्यते।' (श्लो-55) इति **देवः**।

उञ्छकः-ञ्छिका,	उञ्छकः-ञ्छिका,	[4]उञ्चिच्छिषकः-षिका;
उञ्छिता-त्री,	उञ्छयिता-त्री,	उञ्चिच्छिषिता-त्री;
उञ्छन्-न्ती,	उञ्छयन्-न्ती,	उञ्चिच्छिषन्-न्ती;
उञ्छिष्यन्-न्ती-ती,	उञ्छयिष्यन्-न्ती-ती,	उञ्चिच्छिषिष्यन्-न्ती-ती;
—	उञ्छयमानः,	उञ्छयिष्यमाणः;
उन्-उञ्छौ-उञ्छः;	—	—
उञ्छितः-तं-तवान्,	उञ्छितः-तम्,	उञ्चिच्छिषितः-तवान्;
उञ्छः,	उञ्छः,	उञ्चिच्छिषुः, उञ्चिच्छयिषुः;
उञ्छितव्यम्,	उञ्छयितव्यम्	उञ्चिच्छिषितव्यम्;
उञ्छनीयम्,	उञ्छनीयम्,	उञ्चिच्छिषणीयम्;
उञ्छ्यम्,	उञ्छ्यम्,	उञ्चिच्छिष्यम्;

1. 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् गुणः।
2. 'आभीक्ष्ण्ये णमुल् च' (3-4-22) इत्यत्र चकारात् क्त्वाऽपि। 'नित्यवीप्सयोः' (8-1-4) इति द्वित्वम्।
3. औणादिके असुन्प्रत्यये बाहुलकात् कुत्वम्। 'मुस्तामोष्यमसः किटिस्त्वमसमो लुभ्यन् खला**नोकसो** भृश्यद्भ्रंशनवर्शकाकृशदयस्तृष्णाहरो हृष्य मे॥' धा. का. 2-66.
4. 'न न्द्राः संयोगादयः' (6-1-3) इति नकारस्य द्वित्वनिषेधः। 'छे च' (6-1-37) इति तुक्। अस्याभ्यासावयवत्वाभावात् हलादिश्शेषो न।

ईषदुञ्छः, दुरुञ्छः, सूञ्छः; —		—
उञ्छ्यमानः,	उञ्छ्यमानः,	उञ्चिच्छिष्यमाणः;
[A]उञ्छः,	उञ्छः,	उञ्चिच्छिषः;
उञ्छितुम्,	उञ्छयितुम्,	उञ्चिच्छिषितुम्;
उञ्छा,	उञ्छना,	उञ्चिच्छिषा, उञ्चिच्छयिषा;
[B]उञ्छनम्,	उञ्छनम्,	उञ्चिच्छिषणम्;
उञ्छित्वा,	उञ्छयित्वा,	उञ्चिच्छिषित्वा;
समुञ्छ्य,	समुञ्छ्य,	समुञ्चिच्छिष्य;
उञ्छम् २, उञ्छित्वा २,	उञ्छम् २, उञ्छयित्वा २,	उञ्चिच्छिषम् २; उञ्चिच्छिषित्वा २.

(97) " उछि उञ्छे " (VI-तुदादिः-1254-सक. सेट्. पर.)

'शशपोरुञ्छतीत्युञ्छे स्वरभेदाद् द्विरुच्यते।' (श्लो-55) इति **देवः**।

शतरि परं [C]उञ्छती-उञ्छन्ती इति रूपम्। '**आच्छीनद्योर्नुम्**' (7-1-80) इति नुमो वैकल्पिकत्वम्। अन्यत् सर्वमपि भौवादिकोञ्छतिवत् (96) ज्ञेयम्।

(98) " उछी विवासे " (I-भ्वादिः-216. सक. सेट्. पर.)

विवासः=समाप्तिः। प्रायेणायं विपूर्वकः प्रयुज्यते इति **पुरुषकारः**। 'शशपोरुञ्छतीत्युञ्छे स्वरभेदाद् द्विरुच्यते। उच्छतीति विवासे स्यात् इदितोऽनिदितस्तयोः।' (श्लो-56) इति **देवः**।

व्युच्छकः-च्छिका,	उच्छकः-च्छिका,	उचिच्छिषकः-षिका;
व्युच्छिता-त्री,	उच्छयिता-त्री,	उचिच्छिषिता-त्री;
व्युच्छन्-न्ती,	व्युच्छयन्-न्ती,	उचिच्छिषन्-न्ती;

A. '**उञ्छो** धान्यश आदानं, कणिशाद्यर्जनं सिलम्।' इति **यादवप्रकाशः**।
B. 'अहूर्णञ्चिताः परिमूर्छितव्रताः स्फूर्णमया अप्रयुशः कृतो**ञ्छनाः**। भजन्ति यां व्युष्टिमतोऽपि भूयसीं ध्रजन्ति यत् ध्रज्जनमात्रतो जनाः॥' धा. का. 1-29.
C. 'वृक्णव्याचरसो**ञ्छती** फलगणानव्युञ्छितायां निशि स्नान्ती नर्च्छति मिच्छिता सुजनता यस्मिन् हितं जर्जती।' धा. का. 2-73.

व्युच्छिष्यन्-न्ती-ती, उच्छयिष्यन्-न्ती-ती, उचिच्छिषिष्यन्-न्ती-ती ;
— व्युच्छयमानः, व्युच्छयिष्यमाणः ;
[1]व्युट्-व्युशौ-व्युशः ; —— ——
[2]व्युष्टः-ष्टम्-ष्टवान्-[A]व्युष्टा, व्युच्छितम्-तः-तवान्, उचिच्छिषितः-तवान् ;
उच्छः, उच्छः, उचिच्छिषुः, उचिच्छयिषुः;
व्युच्छितव्यम्, व्युच्छयितव्यम्, उचिच्छिषितव्यम् ;
व्युच्छनीयम्, उच्छनीयम्, उचिच्छिषणीयम् ;
व्युच्छ्यम्, उच्छ्यम्, उचिच्छिष्यम् ;
ईषदुच्छः-दुरुच्छः-सूच्छः ; —— —
व्युच्छ्यमानः, उच्छ्यमानः, उचिच्छिष्यमाणः ;
उच्छः, उच्छः, उचिच्छिषः ;
उच्छितुम्, व्युच्छयितुम्, उचिच्छिषितुम् ;
[B3]उष्टिः-उच्छा[4], व्युच्छना, उचिच्छिषा, उचिच्छयिषा;
उच्छनम्, उच्छनम्, उचिच्छिषणम् ;
उच्छित्वा, उच्छयित्वा, उचिच्छिषित्वा ;
व्युच्छ्य, व्युच्छ्य, व्युचिच्छिष्य ;
उच्छम् २, } उच्छम् २, } उचिच्छिषम् २ ; }
उच्छित्वा २, } उच्छयित्वा २, } उचिच्छिषित्वा २. }

(99) "उछी विवासे" (VI-तुदादिः-1295-सक. सेट्-पर.)

'शशपोरुञ्छतीत्युञ्छे स्वरभेदाद् द्विरुच्यते। उच्छतीति विवासे स्यात् इदितोऽनिदितस्तयोः ॥' (श्लो-55) इति **देवः** ।

1. 'च्छ्वोः शूड्—' (6-3-19) इति शः। पदान्ते 'व्रश्च—' (8-2-36) इत्यादिना षत्वे जश्त्वे च रूपम्।
2. 'श्वीदितो निष्ठायाम्' (7-2-14) इति इट् न। 'व्रश्चभ्रस्ज–' (8-2-36) इति षत्वम्।
3. बाहुलकात् क्तिन्। षत्वम्। '**व्युष्टिः** फले समृद्धौ च' इत्य**मरः**।
4. 'गुरोश्च हलः' (3-3-103) इति अप्रत्ययः।

A. 'रजन्यां **व्युष्टा**यामुषसि जनयामास तनयम्।' इति **क्षीरतरङ्गिण्या**मुपात्तः श्लोकः।
B. "अहूर्णचित्ताः परिमूर्च्छितव्रताः स्फूर्णमया अप्रयुशः कृतोञ्छनाः। भजन्ति यां **व्युष्टि**मतोऽपि भूयसीं भ्रजन्ति यत् भ्रज्जनमात्रतो जनाः ॥" धा. का. 1-29.

'अतिक्रमणबन्धनवर्जनेषु च **द्रुमे**–' इति **धातुकाव्ये**। शतरि उच्छन्-न्ती-ती-इति रूपाणि, 'आच्छीनद्योर्नुम्–' (7-1-80) इति नुमो वैकल्पिकत्वात्। अन्यानि सर्वाण्यपि रूपाणि भौवादिको**च्छ**तिवत् (98) ज्ञेयानि। [A]उच्छितम्।

(100) "उज्झ उत्सर्गे" (VI-तुदादिः-1304-सक. सेट्. पर.)

उज्झकः-ज्झिका, उज्झकः-ज्झिका, [1]उजिज्झिषकः-षिका;
उज्झिता-त्री, उज्झयिता-त्री, उजिज्झिषिता-त्री ;
उज्झन्-न्ती, उज्झयन्-न्ती, उजिज्झिषन्-न्ती ;
उज्झिष्यन्-न्ती-ती, उज्झयिष्यन्-न्ती-ती, उजिज्झिषिष्यन्-न्ती-ती ;
—— उज्झयमानः, उज्झयिष्यमाणः ;
उत्-उज्झौ-उज्झः ; —— ——
[B]उज्झितम्-तः, उज्झितः-तं, उजिज्झिषितः-तवान् ;
उज्झः, उज्झः, उजिज्झिषुः, उजिज्झयिषुः ;
उज्झितव्यम्, उज्झयितव्यम्, उजिज्झिषितव्यम् ;
उज्झनीयम्, उज्झनीयम्, उजिज्झिषणीयम् ;
[2]उद्ध्यः[C] नदः, उज्झ्यम्, उज्झ्यम्, उजिज्झिष्यम् ;
ईषदुज्झः, दुरुज्झः, सूज्झः; —— ——
उज्झ्यमानः, उज्झ्यमानः, उजिज्झिष्यमाणः ;
उज्झः, उज्झः, उजिज्झिषः ;
उज्झितुम्, उज्झयितुम्, उजिज्झिषितुम् ;
उज्झा, उज्झना, उजिज्झिषा, उजिज्झयिषा ;

1. दोपधोऽयं धातुः। 'न न्द्राः—' (6-1-3) इति दकारस्य द्वित्वनिषेधः।
2. 'भिद्योद्ध्यौ नदे' (3-1-115) इति क्यपि धकारः निपातितो नदे। उज्झति—उदकमित्यर्थे कर्तरि क्यप्।

A. 'वृक्णव्याचरसोञ्छती फलगणान् **अव्युच्छितायां** निशि स्नान्ती नच्छति मिच्छिता सुजनता यस्मिन् हितं जर्जती।' धा. का. 2-73.
B. 'नित्यं भूपतिमुब्जनो**ज्झित**मना यत्रास्त खल्या सुखम् ॥' धा. का. 2-73.
C. 'समुत्तरन्तावव्यथ्यौ नदान् भिद्ध्योद्ध्यसन्निभान्।' भ. का. 6-59. 'तोयदागम इवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितम् ॥' **रघुवंशे**—11-8.

उज्झनम्,	उज्झनम्,	उज्जिझिषणम्;
उज्झित्वा,	उज्झयित्वा,	उज्जिझिषित्वा;
समुज्झ्य,	समुज्झ्य,	समुज्जिझिष्य;
उज्झम् २, उज्झित्वा २,	उज्झम् २, उज्झयित्वा २,	उज्जिझिषम् २; उज्जिझिषित्वा २.

(100-A) " उठ उपघाते " (I-भ्वादिः-338-सक. सेट्. पर.)

[A]ओठकः-ठिका, ओठकः-ठिका, ओटिठिषकः-षिका—इत्यादीनि सर्वाण्यपि रूपाणि उख (92) धातुवज्ज्ञेयानि ।

(101) " उभ्रस उञ्छे " (X-चुरादिः-1743. सक. सेट्. उभ.)

'भ्रस्नाति भ्रासयत्युञ्छे पदे तु श्नि णिचि भ्रसेः ।' (श्लो-190) इति **देवः** ।

[1]उद्भ्रासकः-सिका,	उदिभ्रासयिषकः-षिका;
उभ्रासयिता-त्री,	उदिभ्रासयिषिता-त्री;
उभ्रासयन्[B]-न्ती,	उदिभ्रासयिषन्-न्ती;
उभ्रासयिष्यन्-न्ती-ती,	उदिभ्रासयिषिष्यन्-न्ती-ती;
उभ्रासयमानः,	उदिभ्रासयिषमाणः;
उभ्रासयिष्यमाणः,	उदिभ्रासयिषिष्यमाणः;
उभ्राः-उद्भ्रासौ-उभ्रासः;	—
उभ्रासितम्-तः-तवान्,	उदिभ्रासयिषितः-तवान्;
उभ्रासः,	उदिभ्रासयिषुः;
उभ्रासयितव्यम्;	उदिभ्रासयिषितव्यम्;
उभ्रासनीयम्,	उदिभ्रासयिषणीयम्;

1. 'उभ्रस' इत्यत्र उकारः धात्ववयव इति **काश्यपक्षीरस्वाम्या**दीनां पक्षमवलम्ब्य रूपाणि विलिख्यन्ते । कथादावप्ययं धातुः पठ्यते । उभयत्र उकार इत्—इत्यन्ये । **देवो**ऽप्येवमेवाह ।

A. 'वनाश्रयत्वेऽपि सकाठपर्यठद्रठन् मृगालीहठकर्मवर्जितान् ।
रोठन् नृशंसाल्लुठितैरनोठकैर्वृतान् धनाढ्यैर्मणिपीठसंश्रयैः ॥' धा. का. 1-44.

B. 'शौर्याञ्चितेन धृतलिङ्गितचेलकेन संमोदितो हलधरोऽपि च मुष्टिकेन ।
मुष्ट्या तुदन् मुहुरतित्रसदाशु दोर्भ्या**मुभ्रासयन्न**नुतस्तममोचयच्च ॥'
धा. का. 3-42.

उभ्रास्यम्,	उदिभ्रासयिष्यम्;
ईषदुभ्रासः-दुरुभ्रासः-सूभ्रासः;	—
उभ्रास्यमानः,	उदिभ्रासयिष्यमाणः;
उभ्रासः,	उदिभ्रासयिषः;
उभ्रासयितुम्,	उदिभ्रासयिषितुम्;
उभ्रासना,	उदिभ्रासयिषा;
उभ्रासनम्,	उदिभ्रासयिषणम्;
उभ्रासयित्वा,	उदिभ्रासयिषित्वा;
समुभ्रास्य,	समुदिभ्रासयिष्य;
उभ्रासम् २, उभ्रासयित्वा २,	उदिभ्रासयिषम् २; उदिभ्रासयिषित्वा २.

(102) " उन्दी क्लेदने " (VII-रुधादिः-1457-अक. सेट्. पर.)

उन्दकः-न्दिका,	उन्दकः-न्दिका,	[1]उन्दिदिषकः-षिका;
उन्दिता-त्री,	उन्दयिता-त्री,	उन्दिदिषिता-त्री;
[2]उन्दन्-ती,	उन्दयन्-न्ती,	उन्दिदिषन्-न्ती;
उन्दिष्यन्-न्ती-ती,	उन्दयिष्यन्-न्ती-ती,	उन्दिदिषिष्यन्-न्ती-ती;
—	उन्दयमानः,	उन्दयिष्यमाणः;
[3]उत्-उन्दौ-उन्दः;	—	—
[4]उन्नः-न्नम्-न्नवान्, [A]समुत्तः-त्तम्-त्तवान्,	उन्दितम्-तः,	उन्दिदिषितः-तवान्;
उन्दः, उन्दः,	उन्दिदिषुः,	उन्दिदयिषुः;
उन्दितव्यम्,	उन्दयितव्यम्,	उन्दिदिषितव्यम्;
उन्दनीयम्,	उन्दनीयम्,	उन्दिदिषणीयम्;

1. 'न न्द्राः—' (6-1-3) इति नकारस्य द्वित्वनिषेधः ।
2. 'श्नान्नलोपः' (6-4-23) इति नलोपे 'श्नसोरल्लोपः' (6-4-111) इति अकारलोपः ।
3. 'अनिदितां—' (6-4-24) इत्युपधानकारस्य लोपः ।
4. 'श्वीदितः—' (7-2-14) इतीण्णिषेधः । 'नुदविदोन्द—' (8-2-56) इति निष्ठानत्वं विकल्पेन भवति ।

A. 'को नस्तृणेढि हिनसाम **समुत्त**मार्हैः तं गोपसूनुमिति तैललवाक्तगात्राः ।'
धा. का. 3-3.

उन्द्यम्,	उन्द्यम्,	उन्दिदिष्यम्;
ईषदुन्दः, दुरुन्दः, सून्दः;		—
[1]उद्यमानः,	उन्द्यमानः,	उन्दिदिष्यमाणः;
[2]अवोदः, ओद्म, } उन्दः,	उन्दः,	उन्दिदिषः;
उन्दितुम्,	उन्दयितुम्,	उन्दिदिषितुम्;
उन्दा,	उन्दना,	उन्दिदिषा, उन्दिदयिषा;
उन्दनम्,	उन्दनम्,	उन्दिदिषणम्;
उन्दित्वा,	उन्दयित्वा,	उन्दिदिषित्वा;
समुद्य,	समुन्द्य,	समुन्दिदिष्य;
उन्दम् २, उन्दित्वा २,	उन्दम् २, उन्दयित्वा २,	उन्दिदिषम् २, उन्दिदिषित्वा २;
[3]इन्दुः,	[4]उदकम्-कः,	[5]ओदनम्.

(103) " उन्भ पूरणे " (VI-तुदादिः-1320-सक. सेट्. पर.)

उम्भकः-म्भिका,	उम्भकः-म्भिका,	उम्बिभिषकः-षिका;
उम्भिता-त्री,	उम्भयिता-त्री,	उम्बिभिषिता-त्री;
[6]उम्भन्-न्ती-ती,	उम्भयन्-न्ती,	उम्बिभिषन्-न्ती;
उम्भिष्यन्-न्ती-ती,	उम्भयिष्यन्-न्ती-ती,	उम्बिभिषिष्यन्-न्ती-ती;
—	उम्भयमानः,	उम्भयिष्यमाणः;
उप्-उब्-उम्भौ-उम्भः;	—	—
उम्भितः-तम्-तवान्,	उम्भितः, तम्,	उम्बिभिषितः-तवान्;
उम्भः, उम्भः,	उम्बिभिषुः,	उम्बिभयिषुः;

---

1. 'अनिदितां हल—' (6-4-24) इति नलोपः।
2. 'अवोदैधौद्मप्रश्रथहिमश्रथाः' (6-4-29) इत्यनेन अस्माद्धातोर्घञि नलोपः, मन्प्रत्यये नलोपः गुणश्च निपात्यते। **अवोदः**=ईषदार्द्रः। **ओद्म**=उन्दनम्।
3. 'उन्देरिच्चादेः' (द. उ. 1-197) इत्युः प्रत्ययः।
4. 'क्वुन् शिल्पिसंज्ञयोः' (द. उ. 3-5) इत्यौणादिकः क्वुन्।
5. 'उन्देर्नलोपश्च' (द. उ. 5-22) इत्यौणादिको युच्।
6. 'अनिदिताम्' (6-4-24) इति नलोपे 'शे तृम्फादीनां' (वा. 7-1-59) इति नुम्।

उम्भितव्यम्,	उम्भयितव्यम्,	उम्बिभिषितव्यम्;
उम्भनीयम्,	उम्भनीयम्,	उम्बिभिषणीयम्;
उम्भ्यम्,	उम्भ्यम्,	उम्बिभिष्यम्;
ईषदुम्भः, दुरुम्भः, सूम्भः;		—
उभ्यमानः,	उम्भ्यमानः,	उम्बिभिष्यमाणः;
उम्भः,[1] कुम्भः[A],	[2]अयस्कुम्भः,	[3]कुम्भी, उम्भः, उम्भिभिषः;
उम्भितुम्,	उम्भयितुम्,	उम्बिभिषितुम्;
उम्भा, उम्भना,	उम्बिभिषा,	उम्बिभयिषा;
उम्भनम्,	उम्भनम्,	उम्बिभिषणम्;
उम्भित्वा,	उम्भयित्वा,	उम्बिभिषित्वा;
समुभ्य,	समुम्भ्य,	समुम्बिभिष्य;
उम्भम् २, उम्भित्वा २,	उम्भम् २, उम्भयित्वा २,	उम्बिभिषम् २; उम्बिभिषित्वा.

(104) " उभ पूरणे " (IV-तुदादिः-1319-सक. सेट्. पर.)

ओभकः-भिका,	ओभकः-भिका,	[4]ओबिभिषकः-षिका;
ओभिता-त्री,	ओभयिता-त्री,	ओबिभिषिता-त्री;
[5]उभन्-न्ती-ती,	ओभयन्-न्ती,	ओबिभिषन्-न्ती;
ओभिष्यन्-न्ती-ती,	ओभयिष्यन्-न्ती-ती,	ओबिभिषिष्यन्-न्ती-ती;
—	ओभयमानः,	ओभयिष्यमाणः;
उप्-उब्-उभौ-उभः;	—	—

---

1. केन उभ्यते=पूर्यते इति कुम्भः। कर्मणि घञ्। पृषोदरादित्वात् पररूपम्। 'अतः कृकमिकंसकुम्भ—' (8-3-46) इत्यत्र निपातनाद्वा पररूपम्।
2. 'अतः कृकमिकंस' (8-3-46) इति विसर्गस्य सत्वम्।
3. 'जातेरस्त्रीविषयात्' (4-1-63) इति ङीष्।
4. उपधाकार्यं द्वित्वात् प्रबलम् इति पूर्वं लघूपधगुणः। अनन्तरं द्वितीयैकाचः 'सन्यङोः' (6-1-9) इति द्वित्वम्।
5. शप्रत्ययस्य 'सार्वधातुकमपित्' (1-2-4) इति ङित्वात् लघूपधगुणो न।

A. 'पीयूषोभितहेमकुम्भविशुभद्वक्षोजशुम्भत्तमा हब्धस्रग्धरचृत्तकैश्य विधितां शोभां जुडन्त्योऽजुनन्।'' धा. का. 2-75.

[A]उभितः, उभितम्-तवान्, ओभितः-तम्, ओबिभिषितः-तवान्;
[1]उभौ, ओभः, ओबिभिषुः, ओबिभयिषुः;
ओभितव्यम्, ओभयितव्यम्, ओबिभिषितव्यम्;
ओभनीयम्, ओभनीयम्, ओबिभिषणीयम्;
ओभ्यम्, ओभ्यम्, ओबिभिष्यम्;
ईषदोभः, दुरोभः, स्वोभः; —
उभ्यमानः, ओभ्यमानः, ओबिभिष्यमाणः;
ओभः, ओभः, ओबिभिषः;
ओभितुम्, ओभयितुम्, ओबिभिषितुम्;
उब्धिः, ओभना, ओबिभिषा, ओनिभयिषा;
ओभनम्, ओभनम्, ओबिभिषणम्;
[2]ओभित्वा, ओभयित्वा, ओबिभिषित्वा;
प्रोभ्य, प्रोभ्य, प्रोबिभिष्य;
ओभम् २, ओभित्वा २, } ओभम् २, ओभयित्वा २, } ओबिभिषम् २; ओबिभिषित्वा २. }

(105) "उब्ज आर्जवे" (VI-तुदादिः-1303-अक. सेट्. पर.)

उब्जकः-जिका, उब्जकः-जिका, [3]उब्जिजिषकः-जिषिका;
उब्जिता-त्री, उब्जयिता-त्री, उब्जिजिषिता-त्री;
उब्जन्-उब्जती-न्ती, उब्जयन्-न्ती, उब्जिजिषन्-न्ती;

---

1. 'इगुपधज्ञा' (3-1-135) इति कः। नित्यद्विवचनान्तः।
2. 'न क्त्वा सेट्' (1-2-18) इति कित्वाभावात् गुणः।
3. 'हयवरट्' (माहेश्वरसूत्रम्-5) सूत्रस्थ**वार्तिकात्** अस्योपध्मानीयोपधत्वं लभ्यते। तदा उपध्मानीयस्य शर्षु पाठात् झल्त्वेन 'झलां जश्' (8-4-53) इति जश्त्वेन बकारे यद्यपि—**उब्जिता-उब्जितव्यम्**-इत्यादिरूपाणि भवन्ति। तथापि **उब्जिजिषकः-षिका** इत्यादिरूपाणामसिद्ध्या दोपधपाठः **भाष्यकृता** आदृतः। "न न्द्राः" (6-1-3) इति दकारस्य द्वित्वनिषेधः। असिद्धे 'स्तोः श्चुना' (8-4-40) इत्यनन्तरं "भ उब्जेः" (वा. 8-4-40) इति दकारस्य भकारः।

A. 'पीयू**षोभित**हेमकुम्भविशुभद्वक्षोजशुम्भत्तमा—' धा. का. 2-75.

उब्जिष्यन्-न्ती-ती, उब्जयिष्यन्-न्ती-ती, उब्जिजिषिष्यन्-न्ती-ती;
— उब्जयमानः, उब्जयिष्यमाणः;
उद्-उत्-उब्जौ-उब्जः; — —
उब्जितम्-तः-तवान्, उब्जितः-तं, उब्जिजिषितः-तवान्;
उब्जः, उब्जः, उब्जिजिषुः, उब्जिजयिषुः;
उब्जितव्यम्, उब्जयितव्यम्, उब्जिजिषितव्यम्;
उब्जनीयम्, उब्जनीयम्, उब्जिजिषणीयम्;
उब्ज्यम्, उब्ज्यम्, उब्जिजिष्यम्;
ईषदुब्जः, दुरुब्जः, सूब्जः; — —
उब्ज्यमानः, उब्ज्यमानः, उब्जिजिष्यमाणः;
उब्जः, समुद्गः, [1]न्युब्जः, (रोगः) उब्जिजिषः;
उब्जितुम्, उब्जयितुम्, उब्जिजिषितुम्;
उब्जा, उब्जना, उब्जिजिषा;
[A]उब्जनम्, उब्जनम्, उब्जिजिषणम्;
उब्जित्वा, उब्जयित्वा, उब्जिजिषित्वा;
समुब्ज्य, समुब्ज्य, समुब्जिजिष्य;
उब्जम् २, उब्जित्वा २, } उब्जम् २, उब्जयित्वा २, } उब्जिजिषम् २, उब्जिजिषित्वा २. }

(106) "उर्द माने क्रीडायां च" (I-भ्वादिः-20-अक.सेट्. आत्म.)

चकारात् आस्वादने च—इति मा. धातुवृत्तिः।

[2]ऊर्दकः-र्दिका, ऊर्दकः-र्दिका, [3]ऊर्दिदिषकः-षिका;
ऊर्दिता-त्री, ऊर्दयिता-त्री, ऊर्दिदिषिता-त्री;
— ऊर्दयन्-न्ती, ऊर्दयिष्यन्-न्ती-ती;
ऊर्दमानः, ऊर्दयमानः, ऊर्दिदिषमाणः;

---

1. 'भुजन्युब्जौ पाण्युपतापयोः' (7-3-61) इति निपातनात् घञि कुत्वाभावः। अन्यत्र **समुद्गः**। 'चजोः—' (7-3-52) इति कुत्वं भवति।
2. 'उपधायां च' (8-2-78) इति दीर्घः।
3. 'न न्द्राः संयोगादयः' (6-1-3) इति रेफस्य द्वित्वनिषेधः।

A. 'नित्यं भूपतिमु**ब्जनो**ज्झितमनाः यत्रास्त खल्या सुखम्॥' धा. का. 2-73.

ऊर्दिष्यमाणः,	ऊर्दयिष्यमाणः,	ऊर्दिदिषिष्यमाणः ;
[1]ऊर्द्-ऊर्दौ-ऊर्दः ;	—	—
ऊर्दितः-तम्-तवान्, ऊर्दितः-तं,		ऊर्दिदिषितः-तवान् ;
ऊर्दः, [2]समूर्दी,	ऊर्दः, ऊर्दिदिषुः,	ऊर्दिदयिषुः ;
ऊर्दितव्यम्,	ऊर्दयितव्यम्,	ऊर्दिदिषितव्यम् ;
ऊर्दनीयम्,	ऊर्दनीयम्,	ऊर्दिदिषणीयम् ;
ऊर्द्यम्,	ऊर्द्यम्,	ऊर्दिदिष्यम् ;
ईषदूर्दः, दुरूर्दः, सूर्दः ;	—	—
ऊर्द्यमानः,	ऊर्द्यमानः,	ऊर्दिदिष्यमाणः ;
ऊर्दः,	ऊर्दः,	ऊर्दिदिषः ;
ऊर्दितुम्,	ऊर्दयितुम्,	ऊर्दिदिषितुम् ;
ऊर्दा,	ऊर्दना,	ऊर्दिदिषा, ऊर्दिदयिषा ;
[A]ऊर्दनम्,	ऊर्दनम्,	ऊर्दिदिषणम् ;
ऊर्दित्वा,	ऊर्दयित्वा,	ऊर्दिदिषित्वा ;
समूर्द्य,	समूर्द्य,	समूर्दिदिष्य ;
ऊर्दम् २, ऊर्दित्वा २,	ऊर्दम् २, ऊर्दयित्वा २,	ऊर्दिदिषम् २ ; ऊर्दिदिषित्वा २.

(107) "उर्वी हिंसार्थः" (I-भ्वादिः-569-सक. सेट्. पर.)

[3]ऊर्वकः-र्विका,	ऊर्वकः-र्विका,	[4]ऊर्विविषकः-षिका ;
ऊर्विता-त्री,	ऊर्वयिता-त्री,	ऊर्विविषिता-त्री ;
ऊर्वन्-न्ती,	ऊर्वयन्-न्ती,	ऊर्विविषन्-न्ती ;
ऊर्विष्यन्-न्ती-ती,	ऊर्वयिष्यन्-न्ती-ती,	ऊर्विविषिष्यन्-न्ती-ती ;

---

1. 'रात्सस्य' (8-2-24) इति नियमात् दकारस्य 'संयोगान्त' (8-2-23) लोपो न ।
2. 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिः ।
3. 'उपधायां च' (8-2-78) इति दीर्घः ।
4. 'न न्द्राः संयोगादयः' (6-1-3) इति रेफस्य द्वित्वनिषेधः ।

A. 'मुदा स चेतो ददर्दे चिरं हरौ स्वादात् सुरैः स्वर्दितमङ्गलोर्दने । अकूर्दतेवास्य पुरः स्वखूर्दकैर्वैनान्तगूर्दी रिपुगोदसूद्यसौ ॥' धा. का. 1-4.

—	ऊर्वयमाणः,	ऊर्वयिष्यमाणः ;
[1]ऊः-उरौ-उरः ;	—	—
[2]ऊर्णः-र्णम्[A]-र्णवान्,	ऊर्वितम्-तः,	ऊर्विविषितम्-तः-तवान् ;
ऊर्वः,	ऊर्वः, ऊर्विविषुः,	ऊर्विवयिषुः ;
ऊर्वितव्यम्,	ऊर्वयितव्यम्,	ऊर्विविषितव्यम् ;
ऊर्वणीयम्,	ऊर्वणीयम्,	ऊर्विविषणीयम् ;
ऊर्व्यम्,	ऊर्व्यम्,	ऊर्विविष्यम् ;
ईषदूर्वः, दुरूर्वः, सूर्वः ;	—	—
ऊर्व्यमाणः,	ऊर्व्यमाणः,	ऊर्विविष्यमाणः ;
ऊर्वः,	ऊर्वः,	ऊर्विविषः,
ऊर्वितुम्,	ऊर्वयितुम्,	ऊर्विविषितुम् ;
ऊर्वा,	ऊर्वणा,	ऊर्विविषा, ऊर्विवयिषा ;
ऊर्वणम्,	ऊर्वणम्,	ऊर्विविषणम् ;
ऊर्वित्वा,	ऊर्वयित्वा,	ऊर्विविषित्वा ;
समूर्व्य,	समूर्व्य,	समूर्विविष्य ;
ऊर्वम् २, ऊर्वित्वा २,	ऊर्वम् २, ऊर्वयित्वा २,	ऊर्विविषम् २ ; ऊर्विविषित्वा २.

(108) "उष दाहे" (I-भ्वादिः-696. सक. सेट्. पर.)

ओषकः-षिका,	ओषकः-षिका,	[3]ओषिषिषकः-षिका ;
ओषिता-त्री,	ओषयिता-त्री,	ओषिषिषिता-त्री ;
ओषन्-न्ती,	ओषयन्-न्ती,	ओषिषिषन्-न्ती ;
ओषिष्यन्-न्ती-ती,	ओषयिष्यन्-न्ती-ती,	ओषिषिषिष्यन्-न्ती-ती ;

---

1. 'राल्लोपः' (6-4-21) इति वकारस्य लोपः । 'र्वोरुपधाया दीर्घ इकः' (8-2-76) इति दीर्घः ।
2. 'श्वीदितः—' (7-2-14) इति इण्णिषेधः । 'राल्लोपः' (6-4-21) इति वलोपः । 'हलि च' (8-2-77) इति दीर्घः । 'रदाभ्यां—' (8-2-42) इति निष्ठानत्वम् । णत्वम् ।
3. ओणेः ऋदित्करणात् लिङ्गात् उपधाकार्यं द्वित्वात् प्रबलम् । तेन गुणः ।

A. 'प्रक्ष्यूतगोपीशुचमूर्णपूतनं तूर्णानसं थूर्णबकादिदानवम् । दुर्दूर्विषून् धूर्वितुमेव गूर्वणं मूर्वन्तमापूर्वितपर्वताध्वरम् ॥' धा. का. 1-73.

—	ओषयमाणः,	ओषयिष्यमाणः ;
उट्-उषौ-उषः ;	—	—
[1]प्रत्युष्टम्, उषितम्, ओषितम्, } तः,	ओषितः-तम्,	ओषिषिषितः-तवान् ;
[2]उषः,	ओषः,	ओषिषिषुः, ओषिषयिषुः ;
ओषितव्यम्,	ओषयितव्यम्,	ओषिषिषितव्यम् ;
ओषणीयम्,	ओषणीयम्,	ओषिषिषणीयम् ;
ओष्यम्,	ओष्यम्,	ओषिषिष्यम् ;
ईषदोषः, दुरोषः, स्वोषः ;	—	—
उष्यमाणः,	ओष्यमाणः,	ओषिषिष्यमाणः ;
ओषः,	ओषः,	ओषिषिषः ;
ओषितुम्,	ओषयितुम्,	ओषिषिषितुम् ;
उष्टिः, व्युष्टिः, }	ओषणा,	ओषिषिषा, ओषिषयिषा ;
ओषणम्,	ओषणम्,	ओषिषिषणम् ;
[3]ओषित्वा,	ओषयित्वा,	ओषिषिषित्वा ;
व्युष्य,	समोष्य,	समोषिषिष्य ;
ओषम् २, ओषित्वा २, }	ओषम् २, ओषयित्वा २, }	ओषिषिषम् २ ; ओषिषिषित्वा २ ; }
[4]ऊष्मा, [5]उष्णः.	—	—

---

1. 'उदुपधात्—' (1-2-21) इति कित्वविकल्पः। तेन रूपद्वयम्। '**प्रत्युष्टम्**' इत्यत्र, 'आदितश्च' (7-2-16) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् '**आश्वस्त**' मितिवत् इट्प्रतिषेधः' इति **भट्टभास्करः**।' इति **माधवधातुवृत्तौ**।
2. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कः।
3. 'न क्त्वा सेट्' (1-2-18) इति कित्वनिषेधाद्गुणः।
4. 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति मनिनि, बाहुलकाद्दीर्घः। 'नेड् वशि कृति' (7-2-8) इतीण्णिषेधः।
5. औणादिके (द. उ. 5-35) नक्प्रत्यये **उष्णः** इति रूपं भवति। '....रेषोऽन्यान् भषतो नमोऽस्तु कमला**को**ष्णस्तनं जोषते ॥' धा. का. 1-87.

(109) "उहिर् अर्दने" (I-भ्वादिः-739-सक. सेट्. पर.)

ओहकः-हिका,	ओहकः-हिका,	[1]ओजिहिषकः-षिका ;
ओहिता-त्री,	ओहयिता-त्री,	ओजिहिषिता-त्री ;
ओहन्-न्ती,	ओहयन्-न्ती,	ओजिहिषन्-न्ती ;
[A]ओहिष्यन्, प्रोहिष्यन्-न्ती-ती, }	ओहयिष्यन्-न्ती-ती,	ओजिहिषिष्यन्-न्ती-ती ;
—	ओहयमानः,	ओहयिष्यमाणः ;
[2]उहितम्, ओहितम् } तः,	ओहितम्-तः,	ओजिहिषितम्-तः-तवान् ;
[3]समुट्-उड्-उहौ-उहः ;	—	—
उहः,	ओहः, ओजिहिषुः,	ओजिहयिषुः ;
ओहितव्यम्,	ओहयितव्यम्,	ओजिहिषितव्यम् ;
ओहनीयम्,	ओहनीयम्,	ओजिहिषणीयम् ;
ओह्यम्,	ओह्यम्,	ओजिहिष्यम् ;
ईषदोहः, दुरोहः, स्वोहः ;	—	—
उह्यमानः,	ओह्यमानः,	ओजिहिष्यमाणः ;
ओहः,	ओहः,	ओजिहिषः ;
ओहितुम्,	ओहयितुम्,	ओजिहिषितुम् ;
[4]ऊढिः,	ओहना, ओजिहिषा,	ओजिहयिषा ;
ओहनम्,	ओहनम्,	ओजिहिषणम् ;
ओहित्वा,	ओहयित्वा,	ओजिहिषित्वा ;
समुह्य,	समोह्य,	समोजिहिष्य ;

---

1. 'कुहोश्चुः' (7-4-62) इति अभ्यासे चुत्वम्।
2. 'उदुपधात् भावादिकर्मणोरन्यतरस्याम्' (1-2-21) इति कित्वविकल्पः। अन्यत्र नित्यमेव कित्वम्—**उहित**मित्येव।
3. 'हो ढः' (8-2-31) इति ढत्वे चर्त्वविकल्पः।
4. ढत्वधत्वष्टुत्वढलोपदीर्घाः।
A. 'गोविन्दस्तुहिनांशुरम्यवदनः कंसं जगद्दोहिनम् **प्रोहिष्यन्** जगदर्हणीयमहिमा मोदेन निन्ये निशाम् ॥' धा. का. 1-92.

ओहम् २,	ओहम् २,	ओजिहिषम् २ ;
ओहित्वा २,	ओहयित्वा २,	ओजिहिषित्वा २.

(110) "ऊठ उपघाते" (I-भ्वादिः-338-सक. सेट्. पर.)

[1]ऊठकः-ठिका,	ऊठकः-ठिका,	ऊटिठिषकः-षिका ;
ऊठिता-त्री,	ऊठयिता-त्री,	ऊटिठिषिता-त्री ;
ऊठन्-न्ती,	ऊठयन्-न्ती,	ऊटिठिषन्-न्ती ;
ऊठिष्यन्-न्ती-ती,	ऊठयिष्यन्-न्ती-ती,	ऊटिठिषिष्यन्-न्ती-ती ;
—	ऊठयमानः,	ऊठयिष्यमाणः ;
ऊट्-ऊठौ-ऊठः ;	—	—
ऊठितः-तं,	उठितः-तं,	ऊटिठिषितः-तवान् ;
ऊठः,	ऊठः, ऊटिठिषुः,	ऊटिठयिषुः ;
ऊठितव्यम्,	ऊठयितव्यम्,	ऊटिठिषितव्यम् ;
ऊठनीयम्,	ऊठनीयम्,	ऊटिठिषणीयम् ;
ऊठ्यम्,	ऊठ्यम्,	ऊटिठिष्यम् ;
ईषदूठः, दुरूठः, सूठः ;	—	—
ऊठ्यमानः,	ऊठ्यमानः,	ऊटिठिष्यमाणः ;
ऊठः,	ऊठः,	ऊटिठिषः ;
ऊठितुम्,	ऊठयितुम्,	ऊटिठिषितुम् ;
[2]ऊठा, ऊठना,	ऊटिठिषा,	ऊटिठयिषा ;
ऊठनम्,	ऊठनम्,	ऊटिठिषणम् ;
ऊठित्वा,	ऊठयित्वा,	ऊटिठिषित्वा ;
समूठ्य,	समूठ्य,	समूटिठिष्य ;
ऊठम् २,	ऊठम् २,	ऊटिठिषम् २ ;
ऊठित्वा २,	ऊठयित्वा २,	ऊटिठिषित्वा २.

(111) "ऊन परिहाणे" (X-चुरादिः-1889. अक.सेट्.उभ. अदन्तः.)

ऊनकः-निका,	ऊनिनयिषकः-षिका ;
ऊनयिता-त्री,	ऊनिनयिषिता-त्री ;

1. 'उठ' इति ह्रस्वोपधपाठस्य पाठान्तरमिदम् ।
2. 'गुरोश्च हलः' (3-3-103) इति स्त्रियाम् अप्रत्ययः ।

ऊनयन्-न्ती,	ऊनिनयिषन्-न्ती ;
ऊनयिष्यन्-न्ती-ती,	ऊनिनयिषिष्यन्-न्ती-ती ;
ऊनयमानः,	ऊनिनयिषमाणः ;
ऊनयिष्यमाणः,	ऊनिनयिषिष्यमाणः ;
[1]ऊः-ऊनौ-ऊनः ;	—
[2]ऊनितम्-तः-तवान्,	ऊनिनयिषितः-तवान् ;
ऊनः, मासोनः,	ऊनिनयिषुः ;
ऊनयितव्यम्,	ऊनिनयिषितव्यम् ;
[3]ऊननीयम्,	ऊनिनयिषणीयम् ;
ऊन्यम्,	ऊनिनयिष्यम् ;
ईषदूनः, दुरूनः, सूनः ;	—
ऊन्यमानः,	ऊनिनयिष्यमाणः ;
ऊनः,	ऊनिनयिषः ;
ऊनयितुम्,	ऊनिनयिषितुम् ;
ऊनना,	ऊनिनयिषा ;
ऊननम्,	ऊनिनयिषणम् ;
उनयित्वा,	ऊनिनयिषित्वा ;
समून्य,	समूनिनयिष्य ;
ऊनम् २,	ऊनिनयिषम् २ ;
ऊनयित्वा २,	ऊनिनयिषित्वा २.

(112) "ऊयी तन्तुसन्ताने" (I-भ्वादिः-483. सक. सेट्. आत्म.)

ऊयकः-यिका,	ऊयकः-यिका,	ऊयियिषकः-षिका ;
ऊयिता-त्री,	ऊययिता-त्री,	ऊयियिषिता-त्री ;
—	ऊययन्-न्ती,	ऊययिष्यन्-न्ती-ती ;

1. ण्यन्तात् क्विपि णिलोपे 'पूर्वत्रासिद्धे न स्थानिवत्—' (वा. 1-1-58) इति स्थानिवद्भावनिषेधात् 'नलोपः प्रातिपदिकान्तस्य' (8-2-7) इति नलोपे प्रथमैकवचने एवं रूपम् ।
2. 'निष्ठायां सेटि' (6-4-52) इति णेर्लोपः ।
3. 'णेरनिटि' (6-4-51) इति णिलोपः ।

ऊयमानः,	ऊययमानः,	ऊयियिषमाणः ;
ऊयिष्यमाणः,	ऊययिष्यमाणः,	ऊयियिषिष्यमाणः ;
[1]ऊः-उवौ-उवः ;	—	—
[2]ऊतम्-तः[A],	ऊयितम्-तः-तवान्,	ऊयियिषितम्-तः-तवान् ;
ऊयः,	ऊयः, ऊयियिषुः,	ऊयियियिषुः ;
ऊयितव्यम्,	ऊययितव्यम्,	ऊयियिषितव्यम् ;
ऊयनीयम्,	ऊयनीयम्,	ऊयियिषणीयम् ;
ऊय्यम्,	ऊय्यम्,	ऊयियिष्यम् ;
ईषदूयः, दुरूयः, सूयः ;	—	—
ऊय्यमानः,	ऊय्यमानः,	ऊयियिष्यमाणः ;
ऊयः;	ऊयः,	ऊयियिषः ;
ऊयितुम्,	ऊययितुम्,	ऊयियिषितुम् ;
[3]ऊया, [4]ऊतिः,	ऊयना,	ऊयियिषा, ऊयियियिषा ;
ऊयनम्,	ऊयनम्,	ऊयियिषणम् ;
ऊयित्वा,	ऊययित्वा,	ऊयियिषित्वा ;
समूय्य,	समूय्य,	समूयियिष्य ;
ऊयम् २, ऊयित्वा २,	ऊयम् २, ऊययित्वा २,	ऊयियिषम् २ ; ऊयियिषित्वा २.

(113) " ऊर्ज बलप्राणनयोः " (X-चुरादिः-1549-सक. सेट्. उभ.)

प्राणनम्=जीवनम् ।

ऊर्जकः-र्जिका,	[5]ऊर्जिजयिषकः-षिका ;
ऊर्जयिता-त्री,	ऊर्जिजयिषिता-त्री ;

1. 'लोपो व्योर्वलि' (6-1-66) इति यकारलोपः ।
2. ईदित्त्वान्निष्ठायामिण्णिषेधः । 'लोपो व्योर्वलि' (6-1-66) इति यलोपः ।
3. 'गुरोश्च हलः' (3-3-103) इति अः प्रत्ययः ।
4. बाहुलकात् क्तिन् । यलोपः । '**ऊति**यूतिजूतिसातिहेतिकीर्तयश्च' (3-3-97) इति अन्तोदात्त ऊतिशब्दो यः निपातितः, सः अवतेर्धातोरिति बोध्यम् ।
5. 'न न्द्राः संयोगादयः' (6-1-3) इति रेफस्य द्विर्वचननिषेधात् जिशब्दस्य द्वित्वम् ।

A. 'प्रतप्य किंचिन्नयितो गृहान्तिकं ददर्श धन्यः स दयालुमीश्वरम् । गोदोहदेशे रयितं सहाग्रजं त**मूत**सत्कीर्तिमपूतिभिर्गुणैः ।' धा. का. 1-62.

[A]ऊर्जयन्-न्ती,	ऊर्जिजयिषन्-न्ती ;
ऊर्जयिष्यन्-न्ती-ती,	ऊर्जिजयिषिष्यन्-न्ती-ती ;
ऊर्जयमानः,	ऊर्जिजयिषमाणः ;
ऊर्जयिष्यमाणः,	ऊर्जिजयिषिष्यमाणः ;
[1]ऊर्क्[B]-ऊर्जौ-ऊर्जः, बहूर्क् ;	—
ऊर्जितम्-तः,	ऊर्जिजयिषितः-तवान् ;
ऊर्जः,	ऊर्जिजयिषुः ;
ऊर्जयितव्यम्,	ऊर्जिजयिषितव्यम् ;
ऊर्जनीयम्,	ऊर्जिजयिषणीयम् ;
ऊर्ज्यम्,	ऊर्जिजयिष्यम् ;
ईषदूर्जः, दुरूर्जः, सूर्जः ;	—
ऊर्ज्यमानः,	ऊर्जिजयिष्यमाणः ;
ऊर्जः,	ऊर्जिजयिषः ;
ऊर्जयितुम्,	ऊर्जिजयिषितुम् ;
ऊर्जना,	ऊर्जिजयिषा ;
ऊर्जनम्,	ऊर्जिजयिषणम् ;
ऊर्जयित्वा,	ऊर्जिजयिषित्वा ;
समूर्ज्य,	समूर्जिजयिष्य ;
ऊर्जम् २, ऊर्जयित्वा २,	ऊर्जिजयिषम् २ ; ऊर्जिजयिषित्वा २.

1. 'भ्राजभास—' (3-2-177) इत्यादिना क्विप् ताच्छीलिकः । 'चोः कुः' (8-2-30) इति कुत्वम् । सोपसृष्टादपि क्विप् । 'रात् सस्य' (8-2-24) इति नियमात् जकारस्य लोपो न ।

A. 'ओलण्डिताद्रिरपि जालितदिव्यधामा निष्पीडितारिरनुनाटितमर्त्यभावः । अश्राथबाधितमनाः स निरीक्षकाणाम् आनन्दमन्तरपरत् पर**मूर्जयन्तम्** ॥' धा. का. 3-14.

B. 'प्रीत्याऽपि दत्तेक्षणसन्निपातं भयं भुजङ्गाधिपवद् दधानम् । तमःसमूहाकृतिमप्यशेषान् **ऊर्जा** जयन्तं प्रथितप्रकाशान् ॥' भ. का. 12-10. ऊर्जा=बलेन इत्यर्थः । तृतीयान्तमेतत् ।

(114) " ऊर्णुञ् आच्छादने " (II-अदादिः-1039. सक. सेट्. उभ.)

[1]ऊर्णावकः-विका, ऊर्णावकः-विका, [2]ऊर्णुनविषकः-ऊर्णुनुविषकः-ऊर्णुनूषकः-षिका, [3]ऊर्णोनूयकः-यिका ;

[4]ऊर्णविता-ऊर्णुविता-त्री[A], ऊर्णावयिता-त्री, ऊर्णुनविषिता-ऊर्णुनुविषिता-ऊर्णुनूषिता-त्री, ऊर्णोनूयिता-त्री ;

[5]ऊर्णुवन्-ऊर्णुवती, ऊर्णावयन्-न्ती, ऊर्णुनविषन्-ऊर्णुनुविषन्-ऊर्णुनूषन्-न्ती ;

[B]ऊर्णुवानः, ऊर्णावयमानः, ऊर्णुनविषमाणः-ऊर्णुनुविषमाणः-ऊर्णुनूषमाणः, ऊर्णोनूयमानः ;

ऊर्णविष्यमाणः-ऊर्णुविष्यमाणः, ऊर्णावयिष्यमाणः, ऊर्णुनविषिष्यमाणः-ऊर्णुनुविषिष्यमाणः-ऊर्णुनूषिष्यमाणः, ऊर्णोनूयिष्यमाणः ;

[6]ऊर्णुत्-ऊर्णुतौ-ऊर्णुतः ;

---

1. 'अचो ञ्णिति' (7-2-115) इति वृद्धौ, आवादेशः। एवं णिच्यपि सर्वत्र बोध्यम्।
2. 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृ**यूर्णु**भरज्ञपिसनाम्' (7-2-49) इति सन इड्विकल्पः। इट्पक्षे 'वि**भाषोर्णोः**' (1-2-3) इति इडादेः प्रत्ययस्य ङित्वं वैकल्पिकम्। ङित्वाभावपक्षे गुणावादेशयोः '**ऊर्णुनविषकः**' इति रूपम्। ङित्वपक्षे उवङि '**ऊर्णुनुविषकः**' इति रूपम्। इडभावपक्षे 'अज्झनगमां सनि' (6-4-16) इति दीर्घे 'इको झल्' (1-2-9) इति सनः कित्वे च '**ऊर्णुनूषकः**' इति रूपम्। एवं सर्वत्र सन्नन्ते रूपत्रयस्योपपत्तिः।
3. 'सूचिसूत्रिमूत्र्यट्यर्त्य**शूर्णोति**भ्यः—' (वा. 3-1-22) इति यङ्। 'सन्यङोः' (6-1-9) इति द्वितीयस्यैकाचः द्वित्वे 'गुणो यङ्लुकोः' (7-4-82) इत्यभ्यासस्य गुणे 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घे च रूपम्। एवं यङन्ते सर्वत्र बोध्यम्।
4. 'विभा**षोर्णोः**' (1-2-3) इति इडादिप्रत्ययस्य वैकल्पिकङिद्वद्भावात् रूपद्वयम्। एवं तव्यदादिष्वपि ज्ञेयम्।
5. 'सार्वधातुकमपित्' (1-2-4) इति शतुर्ङिद्वद्भावात् गुणाभावे, उवङि रूपम्। एवं '**ऊर्णुवान**' इत्यत्रापि ज्ञेयम्।
6. क्विपि 'ह्रस्वस्य पिति कृति—' (6-1-71) इति तुक्। एवं ल्यप्यपि।

A. '**प्रोर्णुवित्रीं** दिवस्तत्र पुरीं द्रक्ष्यथ काञ्चनीम्॥' भ. का. 7-93.

B. '**दृष्ट्वोर्णुवानान्** ककुभो बलौघान् वितत्य शार्ङ्गं कवचं पिनह्य। तस्थौ सिसङ्ग्रामयिषुः शितेषुः सौमित्रिरक्षिभ्रुवमुज्जिहानः॥' भ. का. 3-47.

[1]ऊर्णुतम्-[A]तः, ऊर्णावितं-तः, ऊर्णुनविषितः-ऊर्णुनुविषितः-ऊर्णुनूषितः, ऊर्णोनूयितः-तवान् ;

ऊर्णवः, ऊर्णावः, [B]ऊर्णुनविषुः-ऊर्णुनुविषुः-ऊर्णुनूषुः, ऊर्णुनावयिषुः, [2]ऊर्णोनुवः ;

ऊर्णवितव्यम्-ऊर्णुवितव्यम्, ऊर्णावयितव्यम्, ऊर्णुनविषितव्यम्-ऊर्णुनुविषितव्यम्-ऊर्णुनूषितव्यम्, ऊर्णोनूयितव्यम् ;

ऊर्णवनीयम्, ऊर्णावनीयम्, ऊर्णुनविषणीयम्-ऊर्णुनुविषणीयम्-ऊर्णुनूषणीयम्, ऊर्णोनूयनीयम् ;

[3]ऊर्णव्यम्-[4]अवश्योर्णाव्यम्, ऊर्णाव्यम्, ऊर्णुनविष्यम्-ऊर्णुनुविष्यम्-ऊर्णुनूष्यम्, ऊर्णोनूय्यम् ;

ईषदूर्णवः-दुरूर्णवः-सूर्णवः ;

[5]ऊर्णूयमानः, ऊर्णाव्यमानः, ऊर्णुनविष्यमाणः-ऊर्णुनुविष्यमाणः-ऊर्णुनूष्यमाणः, ऊर्णोनूय्यमानः ;

[6]ऊर्णवः, ऊर्णावः, ऊर्णुनविषः-ऊर्णुनुविषः-ऊर्णुनूषः, ऊर्णोनूयः ;

ऊर्णवितुम्-[C]ऊर्णुवितुम्, ऊर्णावयितुम्, ऊर्णुनविषितुम्-ऊर्णुनुविषितुम्-ऊर्णुनूषितुम्, ऊर्णोनूयितुम् ;

---

1. '**ऊर्णोते**र्नुवद्भावो वाच्यः—' (वा. 7-2-11) इत्यतिदेशेन एकाच्त्वात् 'श्र्युकः क्किति' (7-2-11) इति इण्णिषेधः। एवं क्तिनि क्त्वायां च ज्ञेयम्।
2. यङन्तात् पचाद्यचि, 'यङोऽचि च' (2-4-74) इति यङो लुकि, 'न धातुलोप आर्धधातुके' (1-1-4) इति गुणनिषेधे उवङि च रूपम्।
3. 'अचो यत्' (3-1-97) इति यति गुणे 'वान्तो यि प्रत्यये' (6-1-79) इति वान्तादेशे च रूपम्।
4. 'ओरावश्यके' (3-1-125) इति ण्यति वृद्धौ आवादेशे च रूपम्।
5. 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः।
6. 'ऋदोरप्' (3-3-57) इति भावे अप्।

A. 'केऽप्यल्परावं नुनुवुः खलेषु क्षुरक्ष्णुतास्मानममुं स्नुतास्राः। सोऽ**नूर्णुतो**ऽयौज्जनसुत् कुवत्या काञ्च्येव कामं स्तुवतां ब्रुवाणः॥' धा. का. 2-47.

B. 'वानरं **प्रोर्णुनविषुः** शस्त्रैरक्षो विदिद्युते। तं **प्रोर्णनूषु**रुपलैः सवृक्षैराबभौ कपिः॥' भ. का. 9-36.

C. 'यत्नं **प्रोर्णुवितुं** तूर्णं दिशं कुरुत दक्षिणाम्।' भ. का. 7-93.

ऊर्णुतिः, ऊर्णाविना, ऊर्णुनविषा-ऊर्णुनुविषा-ऊर्णुनूषा, ऊर्णुनावयिषा, ऊर्णोनूया ;

ऊर्णवनम्, ऊर्णावनम्, ऊर्णुनविषणम्-ऊर्णुनुविषणम्-ऊर्णुनूषणम्, ऊर्णोनूयनम् ;

ऊर्णुत्वा, ऊर्णावयित्वा, ऊर्णुनविषित्वा-ऊर्णुनुविषित्वा-ऊर्णुनूषित्वा, ऊर्णोनूयित्वा ;

समूर्णुत्य, समूर्णाव्य, समूर्णुनविष्य - समूर्णुनुविष्य - समूर्णुनूष्य, समूर्णोनूय्य ;

ऊर्णावम् २, } ऊर्णावम् २, } ऊर्णुनविषम् २, } ऊर्णुनुविषम् २ ; }
ऊर्णुत्वा २, } ऊर्णावयित्वा २, } ऊर्णुनविषित्वा २, } ऊर्णुनुविषित्वा २; }

ऊर्णुनूषम् २- ऊर्णुनूषित्वा २, ऊर्णोनूयम् २- ऊर्णोनूयित्वा २ ;
[1]ऊर्णा, [2]ऊरुः.

(115) "ऊष रुजायाम्" (I-भ्वादिः-683. सक. सेट्. पर.)

'ऊठ उपघाते' (110) इति धातुवत् सर्वाणि रूपाणि ज्ञेयानि ।
[3]ऊष्मा, [4]ऊषणम् ऊषः[A]=पचाद्यच् ।

---

1. '**ऊर्णोतेर्डः**' (द. उ. 5-64) इति डः प्रत्ययः । '**ऊर्णा** मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवोः' **इत्यमरकोश**व्याख्यायां **सुधायां** तु 'अन्येष्वपि दृश्यते' (3-2-101) इति डः —इति साधितम् । 'अन्येष्वपि दृश्यते' (3-2-101) इत्यत्र '**अपि**शब्दः सर्वोपाधिव्यभिचारार्थः । तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित्–परितः खाता=**परिखा—**' इति **सिद्धान्तकौमुद्या**मुक्तम् ।
2. ऊर्णूयते=आच्छाद्यते—इति कर्मणि '**ऊर्णोते**र्नुलोपश्च' (द. उ. 1-115) इति कुः प्रत्ययः । **ऊरुः**=सक्थिः ।
3. 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति मनिन्प्रत्यये 'नेड् वशि कृति' (7-2-8) इतीण्णिषेधः । **ऊष्मा**=उष्णम् ।
4. **ऊषणम्**=मरिचम् । त्र्यूषणं=त्रिकटुकम्-इति **क्षीरतरङ्गिण्याम्** ।

A. 'शूषन् दृशोरमृतयूषमजूषकत्वं भूषस्यनूषमतिरीषभुजां प्रियः क्ष्माम् ॥' धा. का. 1-86.

(116) "ऊह वितर्के" (I-भ्वादिः-648. सक. सेट्. आत्म.)

वितर्कः=सम्भावना ।

ऊहकः-हिका,	ऊहकः-हिका,	[1]ऊजिहिषकः-षिका ;
ऊहिता-त्री,	ऊहयिता-त्री,	ऊजिहिषिता-त्री ;
समूहन्-न्ती,	ऊहयन्-न्ती,	—
[2]समूहिष्यन्-न्ती-ती,	ऊहयिष्यन्-न्ती-ती,	—
ऊहमानः, समूहमानः,	ऊहयमानः,	ऊजिहिषमाणः ;
ऊहिष्यमाणः,	ऊहयिष्यमाणः,	ऊजिहिषिष्यमाणः ;
ऊट्-ऊहौ-ऊहः ;	—	—
ऊहितम्-तः,	ऊहितः-तम्,	ऊजिहिषितः-तवान् ;
ऊहः,	ऊहः,	ऊजिहिषुः, ऊजिहयिषुः ;
ऊहितव्यम्,	ऊहयितव्यम्,	ऊजिहिषितव्यम् ;
ऊहनीयम्,	ऊहनीयम्,	ऊजिहिषणीयम् ;
ईषदूहः, दुरूहः, सूहः ;	—	—
[A]ऊह्यम्, [3]समूह्योऽग्निः,	ऊह्यम्,	ऊजिहिष्यम् ;
ऊह्यमानः, [4]निरुह्यमानः, समुह्यमानः,	ऊह्यमानः,	ऊजिहिष्यमाणः ;
ऊहः, [5]प्रौहः,	ऊहः,	ऊजिहिषः ;
ऊहितुम्,	ऊहयितुम्,	ऊजिहिषितुम् ;
ऊहा,	ऊहना,	ऊजिहिषा, ऊजिहयिषा ;
ऊहनम्, [6]प्रोहणम्,	ऊहनम्,	ऊजिहिषणम् ;

---

1. 'कुहोश्चुः' (7-4-62) इति अभ्यासे हकारस्य चुत्वम् ।
2. 'उपसर्गादस्यत्यूह्योर्वाविचनम्' (वा. 1-3-30) इति परस्मैपदं विकल्पेन ।
3. 'अग्नौ परिचाय्योपचाय्य**समूह्याः**' (3-1-131) इति ण्यत्प्रत्ययान्तो निपातितः ।
4. 'उपसर्गाद्ध्रस्व **ऊहतेः**' (7-4-23) इति यादौ क्ङिति ह्रस्वः ।
5. 'प्रा**दूहो**ढ—' (वा. 6-1-89) इति वृद्धिः ।
6. 'कृत्यचः' (8-4-29) इति णत्वम् ।

A. 'द्राहितः शुभपथप्रकाशने सस्वजेऽथ तमनूह्यवैभवः । गाढमैत्ररसगृह्यमाणधीभूषणग्लहनघुंषितो बलः ॥' धा. का. 1-82.

ऊहित्वा, ऊहयित्वा, ऊजिहिषित्वा ;

समुह्य, } समूह्य, समूजिहिष्य ;
निरुह्य, }

ऊहम् २, } ऊहम् २, } ऊजिहिषम् २ ; }
ऊहित्वा २, } ऊहयित्वा २, } ऊजिहिषित्वा २. }

(117) " ऋ गतिप्रापणयोः " (I-भ्वादिः-936. सक. अनि. पर.)

' तत्रेयर्त्यृच्छतीत्यर्तेः, श्नि गतौ स्याद् ऋणाति तु ।' (श्लो-30) इति **देवः** ।

[1]आरकः-रिका, [2]अर्पकः-र्पिका, [3]अरिरिषकः-षिका, [4]अरारकः-रिका ;

अर्ता-र्त्री, अर्पयिता-त्री, अरिरिषिता-त्री, अरारिता-त्री ;

[5]ऋच्छन्-न्ती, अर्पयन्-न्ती, अरिरिषन्-न्ती ; —

[6]अरिष्यन्-न्ती-ती, अर्पयिष्यन्-न्ती-ती, अरिरिषिष्यन्-न्ती-ती ;

[7]समृच्छमानः, अर्पयमाणः, [8]समरिरिषमाणः, अरार्यमाणः ;

समरिष्यमाणः, अर्पयिष्यमाणः, समरिरिषिष्यमाणः, अरारिष्यमाणः ;

[9]समृत्-समृतौ-समृतः ; — — —

---

1. ' अचो ञ्णिति ' (7-2-115) इति वृद्धौ, ' उरण् रपरः ' (1-1-51) इति रपरत्वे रूपम् ।
2. ' **अर्ति**ह्रीव्ली–' (7-3-36) इति णौ पुगागमः । ' पुगन्तलघूपधस्य च ' (7-1-86) इति गुणे रूपम् । एवं सर्वत्र ण्यन्ते बोध्यम् ।
3. ' स्मिपूङ्रञ्ज्वशां सनि ' (7-2-74) इति सन इडागमः । गुणः । ' अजादेर्द्वितीयस्य ' (6-1-2) इति ' रिस् ' इत्यस्य द्वित्वम् । एवं सर्वत्र सन्नन्ते बोध्यम् ।
4. ' सूचिसूत्रिमूत्र्य**ट्यर्त्य**शूर्णोतिभ्यो यङ् वाच्यः' (वा. 3-1-22) इति यङ् । 'यङि च ' (7-4-30) इति गुणे, द्वितीयस्यैकाचः ' र्य ' इत्यस्य ' सन्यङोः ' (6-1-9) इति द्वित्वे ' हलादिःशेषे ' (7-4-60), ' दीर्घोऽकितः ' (7-4-83) इत्यभ्यासस्य दीर्घे च रूपम् । ' न न्द्राः—' (6 1-3) इति रेफस्य द्वित्वनिषेधस्तु न भवति— ' **अरार्यते** ' इति **भाष्यो**दाहरणात् । एवं सर्वत्र यङन्ते बोध्यम् ।
5. शपि ' पाघ्राध्मास्थाम्नादाण्**दृश्यर्ति**—' (7-3-78) इत्यादिना **ऋच्छा**देशः ।
6. ' **ऋद्ध**नोः स्ये ' (7-2-20) इति स्यप्रत्ययस्येडागमः ।
7. अस्याकर्मकत्वे ' समो गम्**यृच्छिभ्याम्** ' (1-3-29) इति शानच् प्रत्ययो भवति ।
8. ' पूर्ववत् सनः ' (1-3-62) इति सन्नन्तात् शानच् ।
9. ' ह्रस्वस्य पिति कृति—' (6-1-71) इति तुगागमः ।

ऋतम्- [1]ऋतः-ऋतवान्, [2]सुखार्तः, [3]ऋणम्, [4]प्रार्णम्-वत्सतरार्णम्-कम्बलार्णम्-वसनार्णम्-दशार्णः (देशः)-दशार्णा (नदी)-ऋणार्णम्, [A]उत्तमर्णः-[A]अधमर्णः, अर्पितम्-तः, अरिरिषितं-तः, अरारितः-तवान् ;

अरः, [5]आरिवान्, [6]अर्वा, [7]अरित्रम्, अर्पः, अरिरिषुः, अर्पिपयिषुः; अरारः;

अर्तव्यम्, अर्पयितव्यम्, अरिरिषितव्यम्, अरारितव्यम् ;

अरणीयम्, अर्पणीयम्, अरिरिषणीयम्, अरारणीयम् ;

[B8] अर्यः-अर्यी-अर्या-अर्याणी, [C]आर्यः-आर्या, अर्प्यम्, अरिरिष्यम्, अरार्यम् ;

ईषदरः-दुररः-स्वरः ; — — —

[9]अर्यमाणः, अर्प्यमाणः, अरिरिष्यमाणः, अरार्यमाणः ;

---

1. धातोर्गत्यर्थकत्वात् ' **गत्यर्था**कर्मक—' (3-4-72) इति, ' क्तोऽधिकरणे च—' (3-4-76) इति च कर्तरि अधिकरणे कर्मणि च क्तप्रत्ययः ।
2. ' **ऋते** च तृतीयासमासे ' (वा.6-1-89) इति वृद्धिः ।
3. '**ऋण**माधमर्ण्ये' (8-2-60) इति निष्ठातकारस्य नत्वम् आधमर्ण्यव्यवहारे निपात्यते । '**ऋणं** नाम अन्यदीयं द्रव्यं गृहीतं इयता कालेन इयत्या वृद्ध्या प्रतिदीयते—इति संविद्रूपम् ।' इति **बालमनोरमा** । अन्यत्र **ऋतम्** । सत्यमित्यर्थः ।
4. ' प्रवत्सतरकम्बलवसनदशार्णानाम् **ऋणे** ' (वा. 6-1-89) इति वृद्धौ साधु । एवं **वत्सतरार्ण**मित्यादिकम् ।
5. लिटः क्वस्वादेशे द्वित्वे ' वस्वेकाजाद्घसाम् ' (7-2-67) इति इडागमे च रूपम् ।
6. ' अन्येभ्योऽपि दृश्यन्ते ' (3-2-75) इति वनिप् । **अर्वा**=सूर्योऽश्वश्च ।
7. '**अर्ति**लूधू—' (3-2-184) इत्यनेन करणे इत्रप्रत्ययः । ' **अरित्रं** केनिपातकः ' **इत्यमरः** । ऋच्छत्यनेनेत्य**रित्रम्**=नौकाचालनदण्डविशेषः ।
8. '**अर्यः** स्वामिवैश्ययोः ' (3-1-103) इति ण्यदपवादो यत् प्रत्ययः । ' **अर्य**क्षत्रियाभ्यां वा स्वार्थे ' (वा. 4-1-40) इति आनुक् ङीषा सह विकल्पितः । तदानीं **अर्याणी–अर्या** इति रूपद्वयम् । **अर्यी** इति तु पुंयोगे ज्ञेयम् । स्वामिवैश्याभ्यामन्यत्र **आर्यः** इति भवति । पूज्य इत्यर्थः । ' **अर्याणी** स्वयम**र्या** स्यात् स्याद**र्यी** क्षत्रियी तथा ' **इत्यमरः** ।
9. ' गुणो**ऽर्ति**संयोगाद्योः ' (7-4-29) इति यकि गुणः ।

A. ' **स्वमुत्तमर्णाय** यथाऽ**धमर्णः** तस्मै कुमारान् बत धारयामः ।' वा. वि-3-29.

B. ' तेन वध्येन हन्तासि त्व**मर्यं** पुरुषाशिनाम् ।
राक्षसं क्रूरकर्माणं शक्रारिं दूरवासिनम् ॥' भ. का. 6. 51.

C. 'तेन सङ्ग**तमार्येण** रामाजर्यं कुरु द्रुतम् ।
लङ्कां प्राप्य ततः पापं दशग्रीवं हनिष्यसि ॥' भ. का. 6. 53.

आर:, अर्प:, अरिरिष:, अरार: ;
अर्तुम्, अर्पयितुम्, अरिरिषितुम्, अरारितुम् ;
ऋति:, [1]आर्ति:, [2]आरा, अर्पणा, अरिरिषा, अर्पिपयिषा, अरारा ;
अरणम्, अर्पणम्, अरिरिषणम्, अरारणम् ;
ऋत्वा, अर्पयित्वा, अरिरिषित्वा, अरारित्वा ;
समृत्य, समर्प्य, अमरिरिष्य, समराय्य ;
आरम् २ ऋत्वा २ } अर्पम् २ अर्पयित्वा २ } अरिरिषम् २ अरिरिषित्वा २ } आरारम् २ ; अरारित्वा २ ; }
[3]अरु:, [4]अरणि:, [5]अरुण:, [6]अरण्यम्, [7]अर्थ:, [8]अर्भक:,
[9]इरिणम्, [10]ऋतु: .

(118) "**ऋ गतौ**" (III—जुहोत्यादि:-1098. सक. अनि. पर. [अ]
'तत्रेयर्त्यृच्छतीत्यर्तै:, श्नि गतौ स्याद् ऋणाति तु ।' (श्लो-30) इति **देव:** ।
आरक:-रिका, [11]अर्पक:-र्पिका ;
अरिरिषक:-षिका, अरारक:-रिका ;

1. आङ: **ऋति**शब्देन समासे 'उपसर्गादृति धातो:' (6-1-91) इति वृद्धि: ।
2. '**आरा** शस्त्र्याम्' (गणसूत्रम् भिदादौ 3-3-104) इति पाठात् वृद्धि: अङ् च ।
3. औणादिके (द. उ. 9-39) उसिप्रत्यये गुण: । **अरु:**=प्राण: आदित्यो वा ।
4. औणादिके (द. उ. 1-2) अनिप्रत्यये गुण: । **अरणि:**=अग्नियोनि: काष्ठविशेष: ।
5. औणादिक: (द. उ-5-59) उनन् प्रत्यय: । **अरुण:**=वैनतेय: अनूरु: सूर्यसारथि: ।
6. कर्मणि औणादिक: (द. उ-8-6) अन्यप्रत्यय: । **अरण्यं**=निर्जनस्थानम् ।
7. औणादिक: (द. उ-6-29) थन् प्रत्यय: । '**अर्थो**ऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' **इत्यमर:** ।
8. औणादिके (द. उ. 3-50) अकप्रत्यये भुगागम: वयसि वाच्ये । **अर्भक:** बाल: ।
9. औणादिक: (द. उ. 5-17) इनन् प्रत्यय: । तत्सन्नियोगेन प्रकृते: इ: आदेश: । 'उरण् रपर:' (1-1-51) इति रपरत्वम् । **इरिणम्**=अल्पोदकतृणस्थानम् ।
10. औणादिक: (द. उ. 1-124) तु: प्रत्यय: । तस्य च कित्त्वम् । तेन न गुण: । **ऋतु:**= वसन्तादि: कालविशेष:, स्त्रीणां पुष्पकालश्च ।
11. ण्यन्तात्-सन्नन्तात्-यङन्ताच्च सर्वाणि रूपाणि (117) ऋधातुवत् बोध्यानि ।

[अ]. 'अस्य च अर्तै: घृप्रभृतित्वेऽपि, भाषायामपि प्रयोग इष्यते । तच्च 'बहुलं छन्दसि' (7-4-78) इत्येव इत्त्वे सिद्धे, **अर्तै:** पृथगित्त्वविधानसामर्थ्यादवसीयते' इति, '**अर्ति**पिपर्त्योश्च' (7-4-77) इत्यत्र **भाष्ये** स्थितम् ॥' इति **पुरुषकारे** (पु. 34.) **लीलाशुकेनो**क्तम् ।

अर्ता-र्त्री, ईषदर:, दुरर:, स्वर:, अर्यमाण: ;
[1]इयृत्-ती, आर: ;
अरिष्यन्-न्ती-ती, अर्तुम् ;
समृत्-समृतौ-समृत:, आरा-ऋति:, [2]आर्ति: ;
ऋतम्-त:-तवान्, अरणम् ;
अर:, ऋत्वा ;
अर्तव्यम्, समृत्य ;
अरणीयम्, आरम् २ ऋत्वा २ ;
अर्य:, आर्य:, इति शुद्धाद्धातो: रूपाणि ।

(119) "**ऋच दीप्तौ**" (VI-तुदादि:-1302. अक. सेट्. पर.)
'**स्तुतौ**' इत्यपि पाठ: । 'वियोजनेऽर्चयेदर्चेद् यौ, स्तुतावृचतीत्यृचे: ।' (श्लो-55) इति **देव:** ।

अर्चक:-र्चिका, अर्चक:-र्चिका, अर्चिचिषक:-षिका ;
अर्चिता-त्री, अर्चयिता-त्री, अर्चिचिषिता-त्री ;
[3]ऋचन्-ती,[A] अर्चयन्-न्ती, अर्चिचिषन्-न्ती ;
अर्चिष्यन्-न्ती-ती, अर्चयिष्यन्-न्ती-ती, अर्चिचिषिष्यन्-न्ती-ती ;
— अर्चयमान:, अर्चयिष्यमाण: ; —
ऋक्-ऋचौ-ऋच: ; — —
ऋचितम्-त:-तवान्, अर्चितम्-त:, अर्चिचिषित:-तवान् ;
[4]ऋच:, अर्च:, अर्चिचिषु:, अर्चिचयिषु: ;
अर्चितव्यम्, अर्चयितव्यम्, अर्चिचिषितव्यम् ;

1. जुहोत्यादित्वात् 'श्लौ' (6-1-10) इति द्वित्वम् । '**अर्ति**पिपर्त्योश्च' (7-4-77) इत्यभ्यासस्येत्त्वम् । 'अभ्यासस्यासवर्णे' (6-4-78) इतीयङ् । 'इको यणचि' (6-1-77) इति यण् । 'नाभ्यस्ताच्छतु:' (7-1-78) इति नुम्निषेध: ।
2. **आरा** शस्त्रे । अन्यत्र क्तिन् । 'उपसर्गादृति–' (6-1-91) इति वृद्धि: ।
3. 'तुदादिभ्य: श:' (3-1-77) इति श: विकरणप्रत्यय: । शप्रत्ययस्य 'सार्वधातुकमपित्' (1-2-4) इति ङिद्वद्भावात् धातो: गुणो न ।
4. 'इगुपधज्ञाप्रीकिर: क:' (3-1-135) इति क: ।

A. 'चर्चन्ती कटु झर्झती बुधजनं दोषं त्वचित्वर्चती नित्यं भूपतिमुज्जनोज्झितमना यत्रास्त खल्या सुखम् ॥' धा. का. 2-73.

अर्चनीयम्, अर्चनीयम्, अर्चिचिषणीयम्;
[1]अर्च्यम्, अर्च्यम्, अर्चिचिष्यम्;
ईषदर्चः, दुरर्चः, स्वर्चः; — —
ऋच्यमानः, अर्च्यमानः, अर्चिचिष्यमाणः;
अर्चः, अर्चः, अर्चिचिषः;
अर्चितुम्, अर्चयितुम्, अर्चिचिषितुम्;
ऋक्तिः, अर्चना, अर्चिचिषा, अर्चिचयिषा;
अर्चनम्, अर्चनम्, अर्चिचिषणम्;
[2]अर्चित्वा, अर्चयित्वा, अर्चिचिषित्वा;
समृच्य, समर्च्य, समर्चिचिष्य;
अर्चम् २, } अर्चम् २, } अर्चिचिषम् २; }
अर्चित्वा २, } अर्चयित्वा २, } अर्चिचिषित्वा २. }

(120) "ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु"

(VI-तुदादिः-1296. सक. सेट्. पर.)

इन्द्रियप्रलयः=सम्मोहः, **मूर्तिभावः**=काठिन्यम्।

ऋच्छकः-च्छिका, ऋच्छकः-च्छिका, [3]ऋचिच्छिषकः-षिका;
ऋच्छिता-त्री, ऋच्छयिता-त्री, ऋचिच्छिषिता-त्री;
ऋच्छन्-[4]न्ती-ती, ऋच्छयन्-न्ती, ऋचिच्छिषन्-न्ती;
ऋच्छिष्यन्-न्ती-ती, ऋच्छयिष्यन्-न्ती-ती, ऋचिच्छिषिष्यन्-न्ती-ती;
[5]समृच्छमानः, ऋच्छयमानः, [6]समृचिच्छिषमाणः;
समृच्छिष्यमाणः, ऋच्छयिष्यमाणः, समृचिच्छिषिष्यमाणः;

---

1. 'यजयाचरुचप्रवचर्चश्च' (7-3-66) इति ण्यति परतः कुत्वनिषेधसामर्थ्यात् 'ऋदुपधाच्चाक्लृपि—' (3-1-110) इति प्राप्तं क्यपं बाधित्वा ण्यदेव।
2. 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधाल्लघूपधगुणः।
3. चकारछकारयोर्द्वित्वे 'हलादिः शेषः' (7-4-60) इति चकारस्य शेषः।
4. 'आच्छीनद्योर्नुम्' (7-1-80) इति वा नुम्।
5. 'समो गम्यृच्छिभ्याम्—' (1-3-29) इति सम्पूर्वकात् शानच्।
6. 'पूर्ववत् सनः' (1-3-62) इति आत्मनेपदी।

[1]समृट्-समृड्-समृच्छौ-समृच्छः; — —
ऋच्छितम्-तः, ऋच्छितम्-तः, ऋचिच्छिषितः-तवान्;
ऋच्छः, [2]उपार्च्छः, ऋचिच्छिषुः, ऋचिच्छयिषुः;
ऋच्छितव्यम्, ऋच्छयितव्यम्, ऋचिच्छिषितव्यम्;
ऋच्छनीयम्, ऋच्छनीयम्, ऋचिच्छिषणीयम्;
ऋच्छ्यम्, ऋच्छ्यम्, ऋचिच्छिष्यम्;
ईषदृच्छः, दुरृच्छः, स्वृच्छः; —
ऋच्छ्यमानः, ऋच्छ्यमानः, ऋचिच्छिष्यमाणः;
ऋच्छः, ऋच्छः, ऋचिच्छिषः;
ऋच्छितुम्, ऋच्छयितुम्, ऋचिच्छिषितुम्;
ऋच्छा, ऋच्छना, ऋचिच्छिषा; ऋचिच्छयिषा;
ऋच्छनम्, ऋच्छनम्, ऋचिच्छिषणम्;
ऋच्छित्वा, ऋच्छयित्वा, ऋचिच्छिषित्वा;
समृच्छ्य, समृच्छ्य, समृचिच्छिष्य;
ऋच्छम् २, } ऋच्छम् २, } ऋचिच्छिषम् २; }
ऋच्छित्वा २, } ऋच्छयित्वा २, } ऋचिच्छिषित्वा २. }

(121) "ऋज गतिस्थानार्जनोपार्जनेषु"

(I-भ्वादिः-176. सक. सेट्. आत्म.)

'ऊर्जनेषु' इति **क्षीरस्वाम्यादीनां** पाठः। **ऊर्जनम्**=शक्तिप्राप्तिः प्राणनं वेति **धातुकाव्ये**। 'ऋञ्जते भर्जने, गत्याद्यर्थे स्यादर्जते त्वृजेः।' (श्लो-62) इति **देवः**।

[A]अर्जकः-र्जिका, अर्जकः-र्जिका, अर्जिजिषकः-षिका;
अर्जिता-त्री, अर्जयिता-त्री, अर्जिजिषिता-त्री;
— अर्जयन्-न्ती, अर्जयिष्यन्-न्ती-ती;

---

1. 'च्छ्वोः शूडनुनासिके च' (6-4-19) इति सतुक्कस्य छकारस्य शकारे 'व्रश्चभ्रस्ज–' (8-2-36) इति षत्वम्। जश्त्वविकल्पः।
2. 'उपसर्गादृति धातौ' (6-1-91) इति वृद्धिः।

A. 'अमुञ्चनैर्मञ्चितचित्तपञ्चितत्रयीमतप्रस्तुचितैरशुभार्जकैः। समृञ्जितं कन्दमभृक्तसत्फलान्यदद्भिरेकत्र यदेजितं जनैः॥' धा. का. 1. 24.

अर्जमानः,	अर्जयमानः,	अर्जिजिषमाणः ;
अर्जिष्यमाणः,	अर्जयिष्यमाणः,	अर्जिजिषिष्यमाणः ;
ऋक्-ऋग्-ऋजौ-ऋजः ;	—	—
ऋजितम्-तः-तवान्, [1]उपार्जितः,	अर्जितः-तम्,	अर्जिजिषितः-तवान् ;
ऋजः,	अर्जः,	अर्जिजिषुः, अर्जिजयिषुः ;
अर्जितव्यम्,	अर्जयितव्यम्,	अर्जिजिषितव्यम् ;
अर्जनीयम्,	अर्जनीयम्,	अर्जिजिषणीयम् ;
[2]ऋज्यम्,	अर्ज्यम्,	अर्जिजिष्यम् ;
ईषदर्जः, दुरर्जः, स्वर्जः ;	—	—
ऋज्यमानः,	अर्ज्यमानः,	अर्जिजिष्यमाणः ;
अर्जः, [3]स्वर्गः,	अर्जः,	अर्जिजिषः ;
अर्जितुम्,	अर्जयितुम्,	अर्जिजिषितुम् ;
ऋक्तिः,	अर्जना,	अर्जिजिषा, अर्जिजयिषा;
अर्जनम्,	अर्जनम्,	अर्जिजिषणम् ;
[4]अर्जित्वा,	अर्जयित्वा,	अर्जिजिषित्वा ;
समृज्य,	समर्ज्य,	समर्जिजिष्य ;
अर्जम् २, अर्जित्वा २,	अर्जम् २, अर्जयित्वा २,	अर्जिजिषम् २ ; अर्जिजिषित्वा २.

(122) "ऋजि भर्जने" (I-भ्वादिः-177. सक. सेट्. आत्म.)

भर्जनम्=पाकविशेषः ।

'ऋञ्जते भर्जने, गत्याद्यर्थे स्यादर्जने त्वृजेः ।' (श्लो-62) इति **देवः** ।

---

1. 'उपसर्गादृति धातौ' (6-1-91) इति वृद्धिः ।
2. 'ऋदुपधाच्च—' (3-1-110) इति भावकर्मणोः क्यप् ।
3. 'सुष्ठु ऋज्यते=स्थीयते अस्मिन्—इत्यधिकरणे संज्ञायां 'हलश्च' (3-3-121) इति घञ् । न्यङ्क्वादित्वात् (7-3-53) कुत्वम् ।' इति **अमरसुधा** । निष्ठायां सेट्त्वात् **अर्ज** इत्यत्र कुत्वं न ।
4. 'न क्त्वा सेट्' (1-2-18) इति कित्वनिषेधाद्गुणः ।

[1]ऋञ्जकः-ञ्जिका,	ऋञ्जकः-ञ्जिका,	[2]ऋञ्जिजिषकः-षिका ;
ऋञ्जिता-त्री,	ऋञ्जयिता-त्री,	ऋञ्जिजिषिता-त्री ;
—	ऋञ्जयन्-न्ती,	ऋञ्जयिष्यन्-न्ती-ती ;
ऋञ्जमानः,	ऋञ्जयमानः,	ऋञ्जिजिषमाणः ;
ऋञ्जिष्यमाणः,	ऋञ्जयिष्यमाणः,	ऋञ्जिजिषिष्यमाणः ;
ऋन्-ऋञ्जौ-ऋञ्जः ;	—	—
[A]ऋञ्जितः-तं-तवान्,	ऋञ्जितं-तः,	ऋञ्जिजिषितः-तवान् ;
ऋञ्जः,	ऋञ्जः,	ऋञ्जिजिषुः, ऋञ्जिजयिषुः ;
ऋञ्जितव्यम्,	ऋञ्जयितव्यम्,	ऋञ्जिजिषितव्यम् ;
ऋञ्जनीयम्,	ऋञ्जनीयम्,	ऋञ्जिजिषणीयम् ;
[3]ऋञ्ज्यम्,	ऋञ्ज्यम्,	ऋञ्जिजिष्यम् ;
ईषदृञ्जः, दुर्ऋञ्जः, स्वृञ्जः;		—
[4]ऋञ्ज्यमानः,	ऋञ्ज्यमानः,	ऋञ्जिजिष्यमाणः ;
ऋञ्जः,	ऋञ्जः,	ऋञ्जिजिषः ;
ऋञ्जितुम्,	ऋञ्जयितुम्,	ऋञ्जिजिषितुम् ;
ऋञ्जा,	ऋञ्जना,	ऋञ्जिजिषा, ऋञ्जिजयिषा ;
ऋञ्जनम्,	ऋञ्जनम्,	ऋञ्जिजिषणम् ;
ऋञ्जित्वा,	ऋञ्जयित्वा,	ऋञ्जिजिषित्वा ;
समृञ्ज्य,	समृञ्ज्य,	समृञ्जिजिष्य ;
ऋञ्जम् २, ऋञ्जित्वा २,	ऋञ्जम् २, ऋञ्जयित्वा २,	ऋञ्जिजिषम् २; ऋञ्जिजिषित्वा २.

---

1. 'इदितो नुम् धातोः' (7-1-58) इति नुम् ।
2. 'न न्द्राः-(6-1-3) इति नकारस्य द्वित्वनिषेधः ।
3. निष्ठायां सेट्त्वात् 'चजोः कु—' (7-3-52) इति कुत्वं न ।
4. अस्य धातोरिदित्वात् 'अनिदितां हल—' (6-4-24) इति नलोपो न ।

A. 'अमुञ्चनैर्मृञ्जितचित्तपञ्जितलयीमतप्रस्तुचितैः शुभार्जकैः । **समृञ्जितं** कन्दममृक्तसत्फलान्ययदद्भिरेकत्र यदेजितं जनैः ॥' धा. का. 1. 24.

(123) “ऋणु गतौ” (VIII-तनादिः-1467. सक. सेट्. उभ.)

[1]अर्णकः-र्णिका,	अर्णकः-र्णिका,	[2]अर्णिनिषकः-षिका ;
अर्णिता-त्री,	अर्णयिता-त्री,	अर्णिनिषिता-त्री ;
[3]अर्णुवन्-वती,	अर्णयन्-न्ती,	अर्णिनिषन्-न्ती ;
अर्णिष्यन्-न्ती-ती,	अर्णयिष्यन् - न्ती-ती,	अर्णिनिषिष्यन्-न्ती-ती ;
[A]अर्णुवानः,	अर्णयमानः,	अर्णिनिषमाणः ;
अर्णिष्यमाणः,	अर्णयिष्यमाणः,	अर्णिनिषिष्यमाणः ;
[4]ऋत्-ऋतौ-ऋतः ;	—	—
[5]ऋतम्-ऋतः-ऋतवान् ,	अर्णितं-तः,	अर्णिनिषितः-तवान् ;
[6]ऋणः, अर्णः,	अर्णिनिषुः,	अर्णिनयिषुः ;
अर्णितव्यम् ,	अर्णयितव्यम् ,	अर्णिनिषितव्यम् ;
अर्णनीयम् ,	अर्णनीयम् ,	अर्णिनिषणीयम् ;
[7]ऋण्यम् ,	अर्ण्यम् ,	अर्णिनिष्यम् ;
ईषदर्णः-दुरर्णः-स्वर्णः ;	—	—
अर्ण्यमानः,	अर्ण्यमाणः,	अर्णिनिष्यमाणः ;

---

1. ‘पुगन्तलघूपधस्य—’ (7-3-86) इति गुणः ।
2. धातुरयं नकारान्तः, णत्वं तु लाक्षणिकम् । अतः, ‘नि’ शब्दस्यैव ‘सन्यङोः’ (6-1-9) इति द्वित्वम् । पूर्वखण्डे रेफात् परत्वात् णत्वम् , उत्तरखण्डे तु नकारस्यैव श्रवणम् । ‘पूर्वत्रासिद्धमद्वित्वे’ (वा. 1-1-58) इति तु न ; ‘उभौ साभ्यासस्य’ (8-4-21) इति लिङ्गात् तस्यानित्यत्वात् । एवं सन्नन्ते सर्वत्र बोध्यम् ।
3. ‘**तनादि**कृञ्भ्य उः’ (3-1-79) इति उः विकरणप्रत्ययः । विकरणनिमित्तके गुणे, उवङि च रूपम् । **आत्रेयादयस्तु** ‘संज्ञापूर्वको विधिरनित्यः’ इत्यङ्गीकृत्य ‘**ऋण्वन्-ण्वती**’ इति गुणरहिततया रूपं साधयन्ति । तत्र **भाष्यानु**ग्रहो नास्ति ।
4. ‘अनुदात्तोपदेशवनतित**नोत्यादीनाम्**—’ (6-4-37) इति अनुनासिकलोपे तुक् ।
5. उदित्त्वात् क्त्वायामिड्विकल्पात् ‘यस्य विभाषा’ (7-2-15) इति निष्ठायां इण्निषेधः । अनुनासिकलोपः । एवं क्तिनि, इडभावपक्षे क्त्वाप्रत्यये च बोध्यम् ।
6. ‘**इगुपधज्ञा**—’ (3-1-135) इति कर्तरि कः ।
7. ‘**ऋदुपधाच्चा**क्लृपि—’(3-1-110) इति क्यप् ।

A. ‘तन्वन् स मञ्चभुवि सातरसः स्वबन्धून् अक्षण्वतां क्षितिकरो मुद**मर्णुवानः** । कंसस्तृणीकृतरिपुर्घृणिमान् वतार्ति मन्वान एकमथ मञ्चमलञ्चकार ॥’ धा. का. 3. 4.

अर्णः, [1]स्वर्णम् ,	अर्णः,	अर्णिनिषः ;
अर्णितुम् ,	अर्णयितुम् ,	अर्णिनिषितुम् ;
ऋतिः,	अर्णना, अर्णिनिषा,	अर्णिनयिषा ;
अर्णनम् ,	अर्णनम् ,	अर्णिनिषणम् ;
[2]अर्णित्वा-ऋत्वा,	अर्णयित्वा,	अर्णिनिषित्वा ;
[3]समृत्य, [4]प्रार्त्य,	समर्ण्य,	समर्णिनिष्य ;
अर्णम् २, अर्णित्वा २, ऋत्वा २,	अर्णम् २, अर्णयित्वा २,	अर्णिनिषम् २ ; अर्णिनिषित्वा २.

(124) “ऋतिः” (I-भ्वादिः-1010-A. अक. सेट्. आत्म.)

धातुपाठेऽपठितोऽपि सूत्रेऽनुवादात् धातुत्वं बोध्यम् । **घृणायां** वर्तते इति केचित् । **जुगुप्सायाम**यं धातुरिति बहवः ।

[5]ऋतीयकः-यिका, अर्तकः-र्तिका,	ऋतीयकः-यिका, अर्तकः-र्तिका,	[6]ऋतितीयिषकः-षिका ; अर्तितिषकः-षिका ;
ऋतीयिता, अर्तिता -त्री,	[7]ऋतीययिता, अर्तयिता -त्री,	ऋतितीयिषिता, अर्तितिषिता -त्री ;
—	ऋतीययन्-न्ती, अर्तयन्-न्ती,	अर्तितिषन्-न्ती ;

---

1. ‘हलश्च’ (3-3-121) इति संज्ञायां घञ् । ‘लिङ्गमशिष्यं, लोकाश्रयत्वाल्लिङ्गस्य’ इति न्यायात् नपुंसकलिङ्गत्वम् ।
2. ‘उदितो वा’ (7-2-56) इति क्त्वायामिड्विकल्पः । इट्पक्षे ‘न क्त्वा सेट्’ (1-2-18) इति कित्त्वनिषेधाद् गुणः ।
3. ‘वा ल्यपि’ (6-4-38) इत्यत्र व्यवस्थितविभाषाश्रयणात् अनुनासिकलोपो नित्यः । तुक् ।
4. ‘उपसर्गा**दृति धातौ**’ (6-1-91) इति वृद्धिरेकादेशः ।
5. ‘**ऋते**रीयङ्’ (3-1-29) इति स्वार्थे ईयङ् प्रत्ययः । ‘सनाद्यन्ता धातवः’ (3-1-32) इति ईयङन्तस्य धातुत्वम् । ततो ण्वुलादयः । ईयङ् प्रत्ययः ‘आयादय आर्धधातुके वा’ (3-1-31) इति विकल्पेन भवति । ततश्च ‘**अर्त**कः—’ इत्यादीनि रूपाणि पक्षे बोध्यानि । एवं णिजन्तात् सन्नन्तादपि आयप्रत्ययस्य वैकल्पिकत्वं ज्ञेयम् ।
6. ईयङो ङित्त्वाल्लघूपधगुणाभावे, अजादित्वेन द्वितीयस्यैकाचः ‘ती’ शब्दस्य द्वित्वे, अभ्यासह्रस्वत्वे च रूपम् । एवं सर्वत्र सन्नन्ते ज्ञेयम् ।
7. णिचः गुणायादेशयोः एवं रूपम् ।

[1]अर्तिष्यन्-न्ती-ती,	ऋतीययिष्यन्-न्ती-ती, अर्तयिष्यन्-न्ती-ती,	अर्तितिषिष्यन्-न्ती-ती ;
ऋतीयमानः,	ऋतीययमानः, अर्तयमानः	ऋतितीयिषमाणः ;
ऋतीयिष्यमाणः,	ऋतीययिष्यमाणः, अर्तयिष्यमाणः,	ऋतितीयिषिष्यमाणः ;
[2]ऋतीः-ऋत्यौ-ऋत्यः,	ऋत्-ऋतौ-ऋतः ;	—
ऋतीयितम्-तः-तवान्, ऋतितम्-तः-तवान्,	ऋतीयितं-तः, अर्तितम्-तः,	ऋतितीयिषितः-तवान् ; अर्तितिषितः-तवान् ;
ऋतीयः ऋतीयः ऋतः अर्तः	ऋतितीयिषुः-अर्तितिषुः ;	—
ऋतीयितव्यम्, अर्तितव्यम्,	ऋतीययितव्यम्, अर्तयितव्यम्,	ऋतितीयिषितव्यम् ; अर्तितिषितव्यम् ;
ऋतीयनीयम्, अर्तनीयम्,	[3]ऋतीयनीयम्, अर्तनीयम्,	ऋतितीयिषणीयम् ; अर्तितिषणीयम् ;
[4]ऋतीय्यम्, ऋत्र्यम्,	ऋतीय्यम्, अर्त्यम्,	ऋतितीयिष्यम्-अर्तितिष्यम् ;
ऋतीय्यमानः, ऋत्र्यमानः,	ऋतीय्यमानः, अर्त्यमानः,	ऋतितीयिष्यमाणः; अर्तितिष्यमाणः ;

ईषदृतीयः-दुरृतीयः-स्वृतीयः, ईषदर्तः-दुरर्तः-स्वर्तः ;

ऋतीयः, अर्तः,	ऋतीयः, अर्तः,	ऋतितीयिषः-अर्तितिषः ;
ऋतीयितुम्, अर्तितुम्,	ऋतीययितुम्, अर्तयितुम्,	ऋतितीयिषितुम् ; अर्तितिषितुम् ;

---

1. ईयङभावे 'शेषात् कर्तरि—' (1-3-78) इति लृटः शता ।
2. ईयङन्तात् क्विपि, अतो लोपे, वलि लोपे च एवं रूपम् । ईयङभावे 'ऋत्' इति रूपम् ।
3. 'णेरनिटि' (6-4-51) इति णिलोपः ।
4. ईयङन्तात् 'अचो यत्' (3-1-97) इति यति द्वियकारघटितं रूपम् । ईयङभावपक्षे 'ऋदुपधात्—' (3-1-110) इति क्यपि रूपम् ।

[1]ऋतीया, ऋत्तिः,	ऋतीयना, अर्तना,	ऋतितीयिषा ; अर्तितिषा ;
ऋतीयनम्, अर्तनम्,	ऋतीयनम्, अर्तनम्,	ऋतितीयिषणम् ; अर्तितिषणम् ;
ऋतीयित्वा, [2]अर्तित्वा-ऋतित्वा,	ऋतीययित्वा, अर्तयित्वा,	ऋतितीयिषित्वा ; अर्तितिषित्वा ;
समृतीय्य, समृत्य,	समृतीय्य, समर्त्य,	समृतितीयिष्य ; समर्तितिष्य ;
ऋतीयम् २, ऋतीयित्वा २, अर्तम् २, अर्तित्वा २, ऋतित्वा २,	ऋतीयम् २, अर्तम् २, ऋतीययित्वा २, अर्तयित्वा २,	ऋतितीयिषम् २ ; ऋतितीयिषित्वा २; अर्तितिषम् २ ; अर्तितिषित्वा२.

(125) "ऋधु वृद्धौ" (IV - दिवादिः-1245. अक. सेट्. पर.)

'ऋध्नोतीति भवेद् वृद्धावृध्यतीत्यत्र तु श्यनि ।' (श्लो-122) इति देवः ।

अर्धकः-र्धिका, अर्धकः-र्धिका, अर्दिधिषकः-षिका, [3]ईर्त्सकः-र्त्सिका ;

अर्धिता-त्री, अर्धयिता-त्री, अर्दिधिषिता-त्री, ईर्त्सिता-त्री ;

ऋध्यन्-न्ती, अर्धयन्-न्ती, अर्दिधिषन्-न्ती, ईर्त्सन्-न्ती ;

अर्धिष्यन्-न्ती-ती, अर्धयिष्यन्-न्ती-ती, अर्दिधिषिष्यन्-न्ती-ती, ईर्त्सिष्यन्-न्ती;

— अर्धयमानः, अर्धयिष्यमाणः ; —

ऋत् ऋध्-ऋधौ-ऋधः ; — — —

[4]ऋद्धम्-द्धः-द्धवान्, अर्धितः-तं, अर्दिधिषितः-ईर्त्सितः-तवान् ;

---

1. 'अ प्रत्ययात्' (3-3-102) इति ईयङन्तादकारः प्रत्ययः ।
2. 'वञ्चिलुञ्च्यृतश्च' (1-2-24) इति क्त्वायाः कित्त्वविकल्पः । तेन कदाचित् गुणः, कदाचिन्न गुणः ।
3. 'सनीवन्तर्ध—' (7-2-49) इतीड्विकल्पः । 'आप्ज्ञप्यृधामीत्' (7-4-55) इति ईत्वम् । 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपः ।
4. उदित्त्वात्, निष्ठायां 'यस्य विभाषा' (7-2-15) इतीडभावः ।

[1]ऋधः, अर्धः, [A]अर्दिधिषुः, [A]ईर्त्सुः, अर्दिधयिषुः ;
अर्धितव्यम्, अर्धयितव्यम्, अर्दिधिषितव्यम्, ईर्त्सितव्यम् ;
अर्धनीयम्, अर्धनीयम्, अर्दिधिषणीयम्, ईर्त्सनीयम् ;
[2]ऋद्ध्यम्, अर्ध्यम्, अर्दिधिष्यम्, ईर्त्स्यम् ;
ईषदर्धः, दुरर्धः, स्वर्धः ; — —
ऋध्यमानः, अर्ध्यमानः, अर्दिधिष्यमाणः, ईर्त्स्यमानः ;
अर्धः, अर्धः, अर्दिधिषः, ईर्त्सः ;
अर्धितुम्, अर्धयितुम्, अर्दिधिषितुम्, ईर्त्सितुम् ;
[B]ऋद्धिः, अर्धना, अर्दिधिषा, ईर्त्सा, अर्दिधयिषा ;
अर्धनम्, अर्धनम्, अर्दिधिषणम्, ईर्त्सनम् ;
[3]अर्धित्वा / ऋद्ध्वा } अर्धयित्वा, अर्दिधिषित्वा, ईर्त्सित्वा ;
अमृद्ध्य, समर्ध्य, अमर्दिधिष्य, समीर्त्स्य ;
अर्धम् २, अर्धित्वा, ऋद्ध्वा २, } अर्धम् २, अर्धयित्वा २, } अर्दिधिषम् २, अर्दिधिषित्वा २, } ईर्त्सम् २ ; ईर्त्सित्वा २. }

(126) "ऋधु वृद्धौ" (V-स्वादिः-1271. अक. सेट्. पर.)

'ऋध्नोतीति भवेद् वृद्धौ ऋध्यतीत्यत्र तु श्यनि ।' (श्लो. 122) इति देवः ।

अस्य धातोः पूर्वोक्त (125) दैवादिक ऋधुधातुवत् सर्वत्र रूपाणि ज्ञेयानि । शतरि परं ऋध्नुवन्-वती, इति रूपमिति विशेषः । स्वादित्वात्

1. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कः ।
2. 'ऋदुपधाच्चाक्लृपिचृतेः' (3-1-110) इति क्यप् ।
3. क्त्वायां 'उदितो वा' (7-3-56) इतीड्विकल्पः । सेटः क्त्वायाः 'न क्त्वा सेट्' (1-2-18) इति कित्वं न ।

A. 'शस्त्रैर्दिदेविषुं संख्ये दुद्यूषुः परिघं कपिः । **अर्दिधिषुः** यशः कीर्तिं **ईर्त्सुं** वृक्षैरताडयत् ॥' भ. का. 9. 32.
B. 'नभ्यांस्तुभ्य विभो जयेति नुवते क्षियन् प्रमेयद्रुजं क्षिवयन् **ऋद्धिम्** अगृध्नवेऽपि स विमृश्याक्षीयमानां ददौ ॥' धा. का. 2. 67.

'स्वादिभ्यः श्नुः' (3-1-73) इति श्नुः प्रत्ययः । श्नुप्रत्ययस्य 'सार्वधातुकमपित्' (1-2-4) इति ङिद्वद्भावातिदेशात् गुणो न । उवङ् ।

(127) "ऋम्फ हिंसायाम्" (VI-तुदादिः-1316. सक. सेट्. पर.)

ऋम्फकः-म्फिका, ऋम्फकः-म्फिका, ऋम्पिफिषकः-षिका ;
ऋम्फिता-त्री, ऋम्फयिता-त्री, ऋम्पिफिषिता-त्री ;
[1]ऋम्फन्-न्ती-ती, ऋम्फयन्-न्ती, ऋम्पिफिषन्-न्ती-ती ;
ऋम्फिष्यन्-न्ती-ती, ऋम्फयिष्यन्-न्ती-ती, ऋम्पिफिषिष्यन्-न्ती-ती ;
— [2]ऋम्फयमाणः, ऋम्फयिष्यमाणः ;
[3]ऋप्-ऋब्-ऋम्फौ-ऋम्फः ; — —
ऋफितः-तम्, ऋम्फितः-तम्, ऋम्पिफिषितः-तवान् ;
ऋम्फः, ऋम्फः, ऋम्पिफिषुः, ऋम्पिफयिषुः ;
ऋम्फितव्यम्, ऋम्फयितव्यम्, ऋम्पिफिषितव्यम् ;
ऋम्फणीयम्, ऋम्फणीयम्, ऋम्पिफिषणीयम् ;
ईषदृम्फः, दुरृम्फः, स्वृम्फः ; — —
ऋफ्यमाणः, ऋम्फ्यमाणः, ऋम्पिफिष्यमाणः ;
[A]ऋम्फः, ऋम्फः, ऋम्पिफिषः ;
ऋम्फितुम्, ऋम्फयितुम्, ऋम्पिफिषितुम् ;
ऋम्फा, ऋम्फणा, ऋम्पिफिषा, ऋम्पिफयिषा ;
ऋम्फणम्, ऋम्फणम्, ऋम्पिफिषणम् ;
[4]ऋफित्वा, / ऋम्फित्वा, } ऋम्फयित्वा, ऋम्पिफिषित्वा ;

1. 'अनिदिताम्—' (6-4-24) इति नलोपे, 'शे तृम्फादीनामिति वाच्यम्' (वा. 7-1-59) इति नुम् ।
2. 'ऋवर्णान्नस्य णत्वं वाच्यम्' (वा. 8-4-2) इति णत्वम् ।
3. 'अनिदितां हल उपधायाः—' (6-4-24) इत्युपधानकारलोपः । एवं निष्ठायामपि ।
4. 'नोपधात् थफान्ताद्वा' (1-2-23) इति कित्वविकल्पः । कित्वपक्षे नलोपः ।

A. "युद्धेष्वृद्दृफिता हितेष्वदृफिता यस्मिन्नृफन्ती सुरान् **ऋम्फार्हा** पूतना स्थिता सुगुफितैर्माल्यैः कचान् गुम्फती ॥" धा. का. 2-74.

समृफ्य,	समृम्फ्य,	समृम्पिफिष्य ;
ऋम्फम् २, ऋफित्वा २, ऋम्फित्वा २,	ऋम्फम् २, ऋम्फयित्वा २,	ऋम्पिफिषम् २ ; ऋम्पिफिषित्वा २.

(128) " ऋफ हिंसायाम् " (VI-तुदादिः-1315. सक. सेट्. पर.)

अर्फकः-र्फिका,	अर्फकः-र्फिका,	अर्पिफिषकः-षिका ;
अर्फिता-त्री,	अर्फयिता-त्री,	अर्पिफिषिता-त्री ;
[1]ऋफन्-[A]न्ती-ती,	अर्फयन्-न्ती,	अर्पिफिषन्-न्ती ;
अर्फिष्यन्-न्ती-ती,	अर्फयिष्यन्-न्ती-ती,	अर्पिफिषिष्यन्-न्ती-ती ;
—	अर्फयमाणः,	अर्फयिष्यमाणः ;
ऋप्-ऋफौ-ऋफः ;	—	—
ऋफितम्-तः,	अर्फितम्-तः,	अर्पिफिषितः-तवान् ;
ऋफः, अर्फः,	अर्पिफिषुः,	अर्पिफयिषुः ;
अर्फितव्यम्,	अर्फयितव्यम्,	अर्पिफिषितव्यम् ;
अर्फणीयम्,	अर्फणीयम्,	अर्पिफिषणीयम् ;
[2]ऋफ्यम्,	अफर्य्यम्,	अर्पिफिष्यम् ;
ईषदर्फः, दुरर्फः, स्वर्फः ;	—	—
ऋफ्यमाणः,	अफर्य्यमाणः,	अर्पिफिष्यमाणः ;
अर्फः,	अर्फः,	अर्पिफिषः ;
अर्फितुम्,	अर्फयितुम्,	अर्पिफिषितुम् ;
ऋप्तिः,	अर्फणा,	अर्पिफिषा, अर्पिफयिषा ;
अर्फणम्,	अर्फणम्,	अर्पिफिषणम् ;
अर्फित्वा,	अर्फयित्वा,	अर्पिफिषित्वा ;
समृफ्य,	समफर्य,	समर्पिफिष्य ;

1. 'सार्वधातुकमपित्' (1-2-4) इति शप्रत्ययस्य ङिद्वद्भावातिदेशात्, 'क्ङिति च' (1-1-5) इति गुणनिषेधः। 'आच्छीनद्योः—' (7-1-80) इति नुम् विकल्पेन।
2. 'ऋदुपधाच्चाक्लृपि—' (3-1-110) इति क्यप्।

A. 'युद्धेषूद्दपिता हितेष्वहफिता यस्मिन् **ऋफन्ती** सुरान्
ऋम्फार्हा पृतना स्थिता सुगुफितैर्माल्यैः कचान् गुम्फती ॥' धा. का. 2-74.

अर्षम् २, अर्षित्वा २,	अर्षम् २, अर्षयित्वा २,	अर्पिफिषम् २ ; अर्पिफिषित्वा २.

(129) " ऋषी गतौ " (VI-तुदादिः. सक. सेट्. पर.)

अर्षकः-र्षिका,	अर्षकः र्षिका,	अर्षिषिषकः-षिका ;
अर्षिता-त्री,	अर्षयिता-त्री,	अर्षिषिषिता-त्री ;
[1]ऋषन्-[A]न्ती-ती,	अर्षयन्-न्ती,	अर्षिषिषन्-न्ती ;
अर्षिष्यन्-न्ती-ती,	अर्षयिष्यन्-न्ती-ती,	अर्षिषिषिष्यन्-न्ती-ती ;
—	अर्षयमाणः,	अर्षयिष्यमाणः ;
[2]ऋट्-ऋड्-ऋषौ-ऋषः ;	—	—
[3]ऋष्टम्-ष्टः-ष्टवान्,	अर्षितः-तम्,	अर्षिषिषितः-तवान् ;
ऋषः, अर्षः,	अर्षिषिषुः,	अर्षिषयिषुः ;
अर्षितव्यम्,	अर्षयितव्यम्,	अर्षिषिषितव्यम् ;
अर्षणीयम्,	अर्षणीयम्,	अर्षिषिषणीयम् ;
[4]ऋष्यम्,	अर्ष्यम्,	अर्षिषिष्यम् ;
ईषदर्षः, दुरर्षः, स्वर्षः ;	—	—
ऋष्यमाणः,	अर्ष्यमाणः,	अर्षिषिष्यमाणः ;
अर्षः,	अर्षः,	अर्षिषिषः ;
अर्षितुम्,	अर्षयितुम्,	अर्षिषिषितुम् ;
ऋष्टिः,	अर्षणा,	अर्षिषिषा, अर्षिषयिषा ;
अर्षणम्,	अर्षणम्,	अर्षिषिषणम् ;
अर्षित्वा,	अर्षयित्वा,	अर्षिषिषित्वा ;
समृष्य,	समर्ष्य,	समर्षिषिष्य ;

1. 'तुदादिभ्यः शः' (3-1-77) इति शः प्रत्ययः। तस्य ङिद्वद्भावात् 'क्ङिति च' (1-1-5) इति गुणनिषेधः।
2. 'झलां जशोऽन्ते' (8-2-39) इति षकारस्य जश्त्वम्। चर्त्वविकल्पः।
3. 'श्वीदितो निष्ठायाम्' (7-2-14) इतीण्णिषेधः।
4. 'ऋदुपधात्—' (3-1-110) इति क्यप्।

A. '**ऋषन्** अजुषत क्रमात् नगरगर्भमुद्वेजयन्
अलमृमनसः खलानवशलज्जमानाङ्गनम् ॥' धा. का. 2-72.

अर्षम् २, अर्षिंत्वा २, | अर्षम् २, अर्षयित्वा २, | अर्षिषिषम् २ ; अर्षिषिषित्वा २.

[1]ऋषिः, [2]ऋषभः.

(130) " ऋ गतौ " (IX-क्र्यादिः-1497. सक. सेट्. पर. प्वादिः ।)

' तत्रेयर्त्यृच्छतीत्यर्तेः, श्नि गतौ स्याद् ऋणाति तु ॥ '

(श्लो-30) इति देवः ।

आरकः-रिका, आरकः-रिका, [3]अरिरीषकः-अरिरिषकः-[4]ईर्षिषकः-षिका ;
[5]अरीता-अरिता-त्री, आरयिता-त्री, अरिरीषिता-अरिरिषिता-ईर्षिषिता-त्री ;
[6]ऋणन्-ती, आरयन्-न्ती, अरिरीषन्-अरिरिषन्-ईर्षिषन्-न्ती ;
अरीष्यन्-अरिष्यन्-न्ती-ती, आरयिष्यन्-न्ती-ती, अरिरीषिष्यन्-अरिरिषिष्यन्- ईर्षिषिष्यन्-न्ती-ती ;
— आरयमाणः, आरयिष्यमाणः ; — —
[7]ईः-इरौ-इरः ; — — — —
[8]समीर्णम्-र्णः-र्णवान्, आरितम्-तः, अरिरीषितः-अरिरिषितः-ईर्षिषितः-[तवान् ;

---

1. औणादिके (द. उ. 1-48) इन् प्रत्यये किद्वद्भवान्न गुणः ।
2. औणादिके (द. उ. 7-19) अभच् प्रत्यये रूपम् । कित्त्वान्न गुणः । गोपतिः, युवा वाऽर्थः ।
3. अस्य धातोः सनि, 'इट् सनि वा' (7-2-41) इतीड्विकल्पः । इट्पक्षे द्वितीयस्यैकाचो द्विर्वचने 'वॄतो वा' (7-2-38) इति दीर्घविकल्पः । एवं सर्वत्र सन्नन्ते इट्पक्षे बोध्यम् ।
4. इडभावपक्षे 'इको झल्' (1-2-9) इति सनः कित्त्वाद् गुणाभावेन, 'ॠत इद्धातोः' (7-1-100) इति इत्त्वे रपरत्वे, 'हलि च' (8-2-77) इति दीर्घे च रूपम् । एवं सन्नन्ते इडभावपक्षे सर्वत्र ज्ञेयम् ।
5. 'वॄतो वा' (7-2-38) इतीटो दीर्घविकल्पः ।
6. 'क्र्यादिभ्यः श्ना' (3-1-81) इति श्ना विकरणप्रत्ययः । 'प्वादीनां ह्रस्वः' (7-3-80) इति ह्रस्वे, 'श्नाभ्यस्तयोरातः' (6-4-112) इति आकारलोपे नुमि च रूपम् ।
7. धातोः इत्वे रपरत्वे, 'र्वोरुपधायाः—' (8-2-76) इति दीर्घे च रूपम् ।
8. सनि वैकल्पिकेट्त्वात् 'यस्य विभाषा' (7-2-15) इति, 'श्र्युकः किति' (7-2-11) इति वा इण्णिषेधः । 'ल्वादिभ्यः' (8-2-44) इति निष्ठानत्वे णत्वम् ।

अरः, आरः, अरिरीषुः-अरिरिषुः-ईर्षिषुः, आरिरयिषुः ;
अरीतव्यम्-अरितव्यम्, आरयितव्यम्, अरिरीषितव्यम्-अरिरिषितव्यम्-ईर्षिषितव्यम् ;
अरणीयम्, आरणीयम्, अरिरीषणीयम्-अरिरिषणीयम्-ईर्षिषणीयम् ;
[1]आर्यम्, आर्यम्, अरिरीष्यम्-अरिरिष्यम्-ईर्षिष्यम् ;
ईषदरः-दुररः-स्वरः ; — — —
[2]ईर्यमाणः, आर्यमाणः, अरिरीष्यमाणः-अरिरिष्यमाणः-ईर्षिष्यमाणः ;
अरः, आरः, अरिरीषः-अरिरिषः-ईर्षिषः ;
अरीतुम्-अरितुम्, आरयितुम्, अरिरीषितुम्-अरिरिषितुम्-ईर्षिषितुम् ;
[3]ईर्णिः, आरणा, अरिरीषा-अरिरिषा-ईर्षिषा, आरिरयिषा ;
अरणम्, आरणम्, अरिरीषणम्-अरिरिषणम्-ईर्षिषणम् ;
ईर्त्वा, आरयित्वा, अरिरीषित्वा-अरिरिषित्वा-ईर्षिषित्वा ;
समीर्य, समार्य, समरीरिष्य-समरिरिष्य-समीर्षिष्य ;
आरम् २, ईर्त्वा २, | आरम् २, आरयित्वा २, | अरिरीषम् २, अरिरिषम् २, अरिरीषित्वा २, अरिरिषित्वा २, ईर्षिषम् २ ; ईर्षिषित्वा २.

(131) " एजृ दीप्तौ " (I-भ्वादिः-179. अक. सेट्. आत्म.)

'दीप्तौ शप्येजते तत्र, भवेदेजति कम्पने ॥" (श्लो. 58) इति देवः ।

एजकः-जिका,	एजकः-जिका,	एजिजिषकः-षिका ;
एजिता-त्री,	एजयिता-त्री,	एजिजिषिता-त्री ;
—	एजयन्-न्ती,	एजयिष्यन्-न्ती-ती ;
एजमानः,	एजयमानः,	एजिजिषमाणः ;

---

1. 'ऋहलोर्ण्यत्' (3-1-124) इति ण्यत् ।
2. यकि धातोरित्वे रपरत्वे, 'हलि च' (8-2-77) इति दीर्घः । एवं क्त्वायां, ल्यपि च ज्ञेयम् ।
3. 'ऋल्वादिभ्यः क्तिन् निष्ठावद्वाच्यः' (वा. 8-2-44) इति क्तिनस्तकारस्य नत्वे, णत्वे च रूपम् ।

एजिष्यमाणः, एजयिष्यमाणः, एजिजिषिष्यमाणः ;

[1]एक्-एग्-एजौ-एजः ; — —

[A]एजितः-तम्, एजितः-तम्, एजिजिषितः-तवान् ;

एजः, [2]उदेजयः[B], [3]जनमेजयः, अङ्गमेजयः, सत्त्वमेजयः[C], एजः, एजिजिषुः, एजिजयिषुः ;

एजितव्यम्, एजयितव्यम्, एजिजिषितव्यम् ;

एजनीयम्, एजनीयम्, एजिजिषणीयम् ;

[4]एज्यम्, एज्यम्, एजिजिष्यम् ;

ईषदेजः, दुरेजः, स्वेजः ; — —

एज्यमानः, एज्यमानः, एजिजिष्यमाणः ;

एजः, एजः, एजिजिषः ;

एजितुम्, एजयितुम्, एजिजिषितुम् ;

[5]एजा, एजना, एजिजिषा, एजिजयिषा ;

एजनम्, [6]प्रेजनम्, एजनम्, एजिजिषणम् ;

एजित्वा, एजयित्वा, एजिजिषित्वा ;

समेज्य, प्रेज्य, समेजिजिष्य ;

---

1. 'चोः कुः' (8-2-30) इति कुत्वम्।
2. 'अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च' (3-1-138) इति शः प्रत्ययः। 'कर्तरि शप्' (3-1-68) इति शपि गुणायादेशौ। 'अनुपसर्गात्—' (3-1-138) इत्यत्र अनुपसर्गग्रहणं अन्यविशेषणम्, अत्रापि— उपसर्गान्तरनिवृत्त्यर्थं च। तेन '**समुदेज**' इत्यत्र अचि णिलोप एव। न तु शप्रत्ययः—इति **मा. धा. वृत्तौ**।
3. 'एजेः खश्' (3-2-28) इति खश्। शित्वात् शबादिः। 'अरुर्द्विषद्—' (6-3-67) इति उपपदस्य मुम्।
4. निष्ठायां सेट्त्वात् 'चजोः—' (7-3-52) इति कुत्वं न।
5. 'गुरोश्च हलः' (3-3-103) इत्यकारः प्रत्ययः।
6. 'एङि पररूपम्' (6-1-94) इति पररूपमेव। न वृद्धिः।

A. "अमुञ्चनैर्मञ्चितचित्तपञ्चितत्रयीमतप्रस्तुचितैः शुभार्जकैः। समृञ्जितं कन्दमभुक्तसत्फलान्यदद्भिरेकत्र **यदेजितं** जनैः॥" धा. का. 1-24.

B. 'आर्चीत् द्विजातीन् परमार्थविन्दान् **उदेजयान्** भूतगणान् न्यषेधीत्।' भ. का. 1-15.

C. '**सत्त्वमेजय**सिंहाढ्यान् स्तनन्धयसमत्विषौ।' भ. का. 6-94.

एजम् २, एजित्वा २, } एजम् २, एजयित्वा २, } एजिजिषम् २ ; एजिजिषित्वा २. }

(132) "एजृ कम्पने" (I-भ्वादिः-234. सक. सेट्. पर.)

'दीप्तौ शप्येजते तत्र, भवेदेजति कम्पने।' (श्लो-58) इति **देवः**।

एजन्-न्ती, एजिष्यन्-न्ती-ती, इति शतरि रूपमिति विशेषः। अन्यानि सर्वाणि रूपाणि दीप्त्यर्थकभौवादिकेजतिवत् (131) बोध्यानि।

(133) "एठ विबाधायाम्" (I-भ्वादिः-267. सक. सेट्. आत्म-) (अ)

एठकः-ठिका, एठकः-ठिका, एटिठिषकः-षिका ;

एठिता-त्री, एठयिता-त्री, एटिठिषिता-त्री ;

— एठयन्-न्ती, एठयिष्यन्-न्ती-ती ;

एठमानः, एठयमानः, एटिठिषमाणः ;

एठिष्यमाणः, एठयिष्यमाणः, एटिठिषिष्यमाणः ;

एट्-एड्-एठौ-एठः ; — —

[A]एठितम्-तः, एठितः-तम्, एटिठिषितः-तवान् ;

एठः, एठः, एटिठिषुः, एटिठयिषुः ;

एठितव्यम्, एठयितव्यम्, एटिठिषितव्यम् ;

एठनीयम्, एठनीयम्, एटिठिषणीयम् ;

एठ्यम्, एठ्यम्, एटिठिष्यम् ;

ईषदेठः, दुरेठः, स्वेठः ; — —

एठ्यमानः, एठ्यमानः, एटिठिष्यमाणः ;

एठः, एठः, एटिठिषः ;

एठितुम्, एठयितुम्, एटिठिषितुम् ;

एठा, एठना, एटिठिषा, एटिठयिषा ;

एठनम्, एठनम्, एटिठिषणम् ;

(अ) 'विपूर्वोऽयमिति **स्वामिकाश्यपौ**। **मैत्रेयादयस्तु** केवलमेवोदाजहुः।' इति **माधवधातुवृत्तिः**। अत्र **स्वामि**पदेन, न **क्षीरस्वामी** ग्राह्यः, अपि तु अन्यः **केशवस्वामी शिवस्वामी** वा इति प्रतिभाति।

A. 'अनन् कुमार्गेषु शुभाध्वनैव वन् प्रमन् भृशोत्कण्ठितगोपिके हरौ। स पापमुम्भिर्बुधहेड्भिरुन्मदैरनै**ठितां** क्ष्मां पुनरप्यहिण्डत॥' धा. का. 1-35.

एठित्वा,	एठयित्वा,	एटिठिषित्वा ;
समेठ्य,	समेठ्य,	समेटिठिष्य ;
एठम् २, एठित्वा २,	एठम् २, एठयित्वा २,	एटिठिषम् ; एटिठिषित्वा २.

(134) " एध वृद्धौ " (I-भ्वादिः-2. अक. सेट्. आत्म.)

एधकः [1]ऐधकः-धिका,	एधकः-धिका,	एदिधिषकः-षिका ;
एधिता-त्री,	एधयिता-त्री,	एदिधिषिता-त्री ;
एधयन्-न्ती,	([2]स्वं पुत्रम्) एधयन्,	एधयिष्यन्-न्ती-ती ;
एधमानः,	[3]एधयमानः,	एदिधिषमाणः ;
एधिष्यमाणः,	एधयिष्यमाणः,	एदिधिषिष्यमाणः ;
एत्-एधू-एधौ-एधः ;	—	—
[A]एधितम्-तः,[B]	एधितम्-तः,	एदिधिषितम्-तः-तवान् ;
एधः, एधः,	एदिधिषुः,	एदिधयिषुः ;
एधितव्यम्,	एधयितव्यम्,	एदिधिषितव्यम् ;
एधनीयम्,	एधनीयम्,	एदिधिषणीयम् ;
एध्यम्,	एध्यम्,	एदिधिष्यम् ;
ईषदेधः, दुरेधः, स्वेधः ;	—	—
एध्यमानः,	एध्यमानः,	एदिधिष्यमाणः ;
एधः,	एधः,	एदिधिषः ;
एधितुम्,	एधयितुम्,	एदिधिषितुम् ;
एधा,	एधना,	एदिधिषा, एदिधयिषा ;
एधनम्,	एधनम्,	एदिधिषणम् ;

---

1. '**एत्येधत्यूठ्सु**' (6-1-89) इति वृद्धिः, पररूपापवादः ।
2. 'विभाषोपपदेन प्रतीयमाने' (1-3-77) इत्यमुमपि बाधित्वा, परत्वात् 'अणौ—' (1-3-88) इति नित्यं परस्मैपदमेव ।
3. अण्यन्तावस्थायां चित्तवत्कर्तृकत्वे ण्यन्ते, 'अणावकर्मकात् चित्तवत्कर्तृकात्' (1-3-88) इति परस्मैपदमेव । '**एधयन्-न्ती**' इत्येव ।

A. 'स गान्दिनीभूः अथ गोकुलै**धितं** स्पर्धालुधीगाधितकार्यबाधिनम् ।
ईक्ष्यन् हरिं नाधितलोकनाथकं देधे मुदास्कुन्दितमन्तरिन्द्रियम् ॥' धा. का. 1–2.

B. 'अग्निः प्रमादेन ददाह लङ्कां वध्यस्य देहे स्वय**मेधित**श्चेत् ।' भ. का. 12. 24.

एधित्वा,	एधयित्वा,	एदिधिषित्वा ;
समेध्य,	समेध्य,	समेदिधिष्य ;
एधम् २, एधित्वा २,	एधम् २, एधयित्वा २,	एदिधिषम् २, एदिधिषित्वा २.

(135) " एषृ प्रयत्ने गतौ च " (I-भ्वादिः-618.सक. सेट्. आत्म.)

दीप्त्यर्थकभौवादिकैजतिवत् (131) सर्वाणि रूपाणि ज्ञेयानि । क्विपि तु एट् इति रूपम् । 'झलां जशोऽन्ते' (8-2-39) इति जश्त्वम् ।

(136) " ओखृ शोषणालमर्थयोः " (I-भ्वादिः-121.सक. सेट्. पर.)

ओखकः-खिका,	ओखकः-खिका,	[1]ओचिखिषकः-षिका ;
ओखिता-त्री,	ओखयिता-त्री,	ओचिखिषिता-त्री ;
ओखन्-न्ती,	ओखयन्-न्ती,	ओचिखिषन्-न्ती ;
ओखिष्यन्-न्ती-ती,	ओखयिष्यन्-न्ती-ती,	ओचिखिषिष्यन्-न्ती-ती,
—	ओखयमानः,	ओखयिष्यमाणः ;
ओक्-ओग्-ओखौ-ओखः ;	—	—
[A]ओखितः-तम्,	ओखितम्-तः,	ओचिखिषितः-तवान् ;
ओखः, ओखः,	ओचिखिषुः,	ओचिखयिषुः ;
ओखितव्यम्,	ओखयितव्यम्,	ओचिखिषितव्यम् ;
ओखनीयम्,	ओखनीयम्,	ओचिखिषणीयम् ;
ओख्यम्,	ओख्यम्,	ओचिखिष्यम् ;
ईषदोखः, दुरोखः, स्वोखः ;	—	—
ओख्यमानः,	ओख्यमानः,	ओचिखिष्यमाणः ;
ओखः,	ओखः,	ओचिखिषः ;
ओखितुम्,	ओखयितुम्,	ओचिखिषितुम् ;
ओखा,	ओखना,	ओचिखिषा, ओचिखयिषा ;
ओखनम्,	ओखनम्,	ओचिखिषणम् ;

---

1. 'कुहोश्चुः' (7-4-62) इति अभ्यासे चुत्वम् ।

A. "अफक्कतातकथगुणेन तङ्कता खलश्वबुक्कापरुषे पुरेऽमुना ।
फेनैः कखन्तीमिव तां कलिन्दजां सन्तीर्य बृन्दावनमैक्ष्य**नोखितम्**॥" धा.का. 1-17.

ओखित्वा, ओखयित्वा, ओचिखिषित्वा ;

समोख्य, समोख्य, समोचिखिष्य ;

ओखम् २, ओखित्वा २, } ओखम् २, ओखयित्वा २, } ओचिखिषम् २ ; ओचिखिषित्वा २. }

(137) "ओणृ अपनयने" (I-भ्वादिः-454. सक. सेट्. पर.)

ओणकः-णिका, ओणकः-णिका, ओणिणिषकः-षिका, इत्यादि-रूपाणि सर्वाणि 'ओखृ' (136) धातुवद्बोध्यानि। 'अन्येभ्योऽपि—' (3-2-75) इति वनिपि 'विड्वनोः—' (6-4-41) इति आत्वे, अवादेशे **अवावा** इति रूपम्। स्त्रियामपि **अवावा** इत्येव; 'वनो न हशः—' (वा. 4-1-7) इति ङीब्रत्वयोर्निषेधात्। 'वनो न हशः—' (वा. 4-1-7) इत्यस्य निषेधस्य प्रायिकत्वात् 'वनो र च' (4-1-7) इति ङीब्रत्वयोः **अवावरी** इत्यपि रूपम्—इति **न्यासकारादयः**।

(138) "ओलडि उत्क्षेपणे" (X-चुरादिः-1542. सक. सेट्. उभ.)

[1]ओलण्डकः-ण्डिका, ओलिलण्डयिषकः-षिका ;

ओलण्डयिता-त्री, ओलिलण्डयिषिता-त्री ;

ओलण्डयन्-न्ती, ओलिलण्डयिषन्-न्ती ;

ओलण्डयिष्यन्-न्ती-ती, ओलिलण्डयिषिष्यन्-न्ती-ती ;

ओलण्डयमानः, ओलिलण्डयिषमाणः ;

ओलण्डयिष्यमाणः, ओलिलण्डयिषिष्यमाणः ;

ओलण्डः, ओलिलण्डयिषुः ;

[A]ओलण्डितः-[B]तम्, ओलिलण्डयिषितः-तवान् ;

ओलण्डयितव्यम्, ओलिलण्डयिषितव्यम् ;

ओलण्डनीयम्, ओलिलण्डयिषणीयम् ;

1. 'ओकारः धात्ववयव' इति पक्षे—इमानि रूपाणि। 'ओकार इत्' इति पक्षे तु **लण्डकः** इत्यादिरूपाणि वक्ष्यन्ते।

A. '**ओलण्डिता**द्रिरपि जालितदिव्यधामा निष्पीडितारिरनुनाटितमर्त्यभावः।' धा. का. 3-14.

B. '**ओलण्डित**मिवापश्यत् उग्रं समरताण्डवम्।' **यादवाभ्युदये** 16·64.

ओलण्डयम्, ओलिलण्डयिष्यम् ;

ईषदोलण्डः, दुरोलण्डः, स्वोलण्डः ; —

ओलण्डयमानः, ओलिलण्डयिष्यमाणः ;

ओलण्डः, ओलिलण्डयिषः ;

ओलण्डयितुम्, ओलिलण्डयिषितुम् ;

ओलण्डना, ओलिलण्डयिषा ;

ओलण्डनम्, ओलिलण्डयिषणम् ;

ओलण्डयित्वा, ओलिलण्डयिषित्वा ;

समोलण्ड्य, समोलिलण्डयिष्य ;

ओलण्डम् २, ओलण्डयित्वा २, } ओलिलण्डयिषम् २ ; ओलिलण्डयिषित्वा २. }

(139) "कक लौल्ये" (I-भ्वादिः-90. अक. सेट्. आत्म.)

लौल्यम्=गर्वः, चापल्यं वा।

काककः-किका, काककः-किका, [1]चिककिषकः-षिका, [2]चाककक:-किका ;

ककिता-त्री, काकयिता-त्री, चिककिषिता-त्री, चाककिता-त्री ;

—, काकयन्-न्ती, काकयिष्यन्-न्ती-ती ; —

ककमानः, काकयमानः, चिककिषमाणः, [3]चाककथमानः ;

[4]प्रनिककिष्यमाणः, काकयिष्यमाणः, चिककिषिष्यमाणः, चाककिष्यमाणः ;

कक्-कग्-ककौ-ककः ; — —

ककितम्-तः, काकितः-तम्, चिककिषितः, चाककितः-तवान् ;

ककः, काकः, चिककिषुः, चिकाकयिषुः, [5]चाककः ;

ककितव्यम्, काकयितव्यम्, चिककिषितव्यम्, चाककितव्यम् ;

ककनीयम्, काकनीयम्, चिककिषणीयम्, चाककनीयम् ;

1. 'सन्यङोः' (6-1-9) इति द्वित्वे 'सन्यतः' (7-4-79) इति इत्वम्। चुत्वम्।
2. 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' (3-1-22) इति यङ्। 'सन्यङोः' (6-1-9) इति द्वित्वम्। 'दीर्घोऽकितः' (7-4-83) इति अभ्यासस्य दीर्घः।
3. यङन्तात् शानचि तस्य सार्वधातुकत्वात् 'अतो लोपः' (6-4-48) इति लोपस्याभावे यलोपाभावे च रूपम्।
4. 'शेषे विभाषाऽकखादावषान्त उपदेशे' (8-4-18) इति णत्वनिषेधः।
5. 'नन्दिग्रहिपचादिभ्यः—' (3-1-134) इति यङन्तात् पचाद्यच्।

काक्यम्, काक्यम्, चिककिष्यम्, चाकक्यम्;
ईषत्ककः, [1]दुष्ककः, सुककः; — —
कक्यमानः, काक्यमानः, चिककिष्यमाणः, चाकक्यमानः;
[2]काकः[A], काकः, चिककिषः, चाककः;
ककितुम्, काकयितुम्, चिककिषितुम्, चाककितुम्;
ककिः, काकना, चिककिषा, चिकाकयिषा, चाकका;
ककनम्, काकनम्, चिककिषणम्, चाककनम्;
ककित्वा, काकयित्वा, चिककिषित्वा, चाककित्वा;
प्रकक्य, प्रकाक्य, प्रचिककिष्य, प्रचाकक्य;
काकम् २, ककित्वा २, } काकम् २, काकयित्वा २, } चिककिषम् २, चिककिषित्वा २, } चाककम् २; चाककित्वा २. }

(140) "ककि गतौ" (I-भ्वादिः-94. सक. सेट्. आत्म.)

कङ्ककः-ङ्किका, कङ्ककः-ङ्किका, चिकङ्किषकः-षिका, चाकङ्ककः-किका;
कङ्किता-त्री, कङ्कयिता-त्री, चिकङ्किषिता-त्री, चाकङ्किता-त्री;
— कङ्कयन्-न्ती, कङ्कयिष्यन्-न्ती-ती; —
कङ्कमानः, कङ्कयमानः, चिकङ्किषमाणः, चाकङ्क्यमानः;
कङ्किष्यमाणः, कङ्कयिष्यमाणः, चिकङ्किषिष्यमाणः, चाकङ्किष्यमाणः;
[3]कन्-कङ्कौ-कङ्कः; — — —
कङ्कितम्-तः, कङ्कितम्-तः, चिकङ्किषितः, चाकङ्कितः-तवान्;
[B]कङ्कः (गृध्रः), कङ्कः, चिकङ्किषुः, चिकङ्कयिषुः, चाकङ्कः;
कङ्कितव्यम्, कङ्कयितव्यम्, चिकङ्किषितव्यम्, चाकङ्कितव्यम्;
[4]प्रनिकङ्कनीयम्, कङ्कनीयम्, चिकङ्किषणीयम्, चाकङ्कनीयम्;

---

1. 'इदुदुपधस्य—' (8-3-41) इति षत्वम्।
2. बाहुलकात् कर्तरि घञ्।
3. 'संयोगान्तस्य लोपः' (8-2-23) इति ककारलोपः।
4. 'शेषे विभाषा—' (8-4-18) इति णत्वनिषेधः।

A. 'फलाङ्कितान् वङ्कितवल्लिमङ्कितान् वनप्रदेशात् उरुकाककोकिलान्।
वृकावृतान् मुग्धचकोरकूजितानुड्डीनकङ्कानयमत्यवङ्कत ॥' धा. का. 1-13.

B. 'फलाङ्कितान् वङ्कितवल्लिमङ्कितान् वनप्रदेशानुरुकाककोकिलान्।
वृकावृतान् मुग्धचकोरकूजितानुड्डीनकङ्कानयमत्यवङ्कत ॥' धा. का. 1-13.

कङ्क्यम्, कङ्क्यम्, चिकङ्किष्यम्, चाकङ्क्यम्;
ईषत्कङ्कः, दुष्कङ्कः, सुकङ्कः; — —
कङ्क्यमानः, कङ्क्यमानः, चिकङ्किष्यमाणः, चाकङ्क्यमानः;
कङ्कः, कङ्कः, चिकङ्किषः, चाकङ्कः;
कङ्कितुम्, कङ्कयितुम्, चिकङ्किषितुम्, चाकङ्कितुम्;
कङ्का, कङ्कना, चिकङ्किषा, चिकङ्कयिषा, चाकङ्का;
[1]प्रकङ्कनम्, कङ्कनम्, चिकङ्किषणम्, चाकङ्कनम्;
कङ्कित्वा, कङ्कयित्वा, चिकङ्किषित्वा, चाकङ्कित्वा;
सङ्कङ्क्य, प्रकङ्क्य, प्रचिकङ्किष्य, प्रचाकङ्क्य;
कङ्कम् २, कङ्कित्वा २, } कङ्कम् २, कङ्कयित्वा २, } चिकङ्किषम् २, चिकङ्किषित्वा २, } चाकङ्कम् २; चाकङ्कित्वा २. }

(141) "कख हसने" (I-भ्वादिः-120. सक. सेट्. पर.)

काखकः-खिका, काखकः-खिका, चिकखिषकः-षिका, चाकखकः-खिका;
कखिता-त्री, काखयिता-त्री, चिकखिषिता-त्री, चाकखिता-त्री;
कखन्-[A]न्ती, काखयन्-न्ती, चिकखिषन्-न्ती; —
कखिष्यन्-न्ती-ती, काखयिष्यन्-न्ती-ती, चिकखिषिष्यन्-न्ती-ती;
— काखयमानः, काखयिष्यमाणः, चाकखमानः, चाकखिष्यमाणः;
कक्-कखौ-कखः; — —
कखितं-तः, काखितः-तम्, चिकखिषितः, चाकखितः-तवान्;
कखः, काखः, चिकखिषुः, चिकाखयिषुः, चाकखः;
कखितव्यम्, काखयितव्यम्, चिकखिषितव्यम्, चाकखितव्यम्;
प्रनिकखनीयम्, काखनीयम्, चिकखिषणीयम्, चाकखनीयम्;
काख्यम्, काख्यम्, चिकखिष्यम्, चाकख्यम्;
ईषत्कखः, दुष्कखः, सुकखः; — —
कख्यमानः, काख्यमानः, चिकखिष्यमाणः, चाकख्यमानः;

---

1. 'इजादेस्सनुमः' (8-4-32) इति नियमात् णत्वं न।

A. 'अफक्कतातकथगुणेन तङ्कता खलश्वबुक्कापरुषे पुरेऽमुना।
फेनैः कखन्तीमिव तां कलिन्दजां सन्तीर्य बृन्दावनमैक्ष्यनोखितम् ॥'
धा. का. 1-17.

काखः, काखः, चिकखिषः, चाकखः ;
कखितुम्, काखयितुम्, चिकखिषितुम्, चाकखितुम् ;
कखितः, काखना, चिकखिषा, चिकाखयिषा, चाकखा ;
[1]प्रकखणम्, काखनम्, चिकखिषणम्, चाकखनम् ;
कखित्वा, काखयित्वा, चिकखिषित्वा, चाकखित्वा ;
प्रकख्य, प्रकाख्य, प्रचिकखिष्य, प्रचाकख्य ;

काखम् २,	काखम् २,	चिकखिषम् २,	चाकखम् २ ;
कखित्वा २,	काखयित्वा २,	चिकखिषित्वा २,	चाकखित्वा २.

(142) " कखे हसने " (I-भ्वादिः-784. अक. सेट्. पर. घटादिः ।)

काखकः-खिका, चिकखिषकः-षिका, चाकखकः-खिका, इत्यादीनि रूपाणि क्रमेण शुद्धात्-सन्नन्तात् यङन्ताच्च, पूर्वोक्तकख (141) धातुवत् ज्ञेयानि । ण्यन्ते परं घटादिपाठात् 'घटादयो मितः' (गणसूत्रम्-भ्वादौ) इति मित्त्वे, 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वे इमानि रूपाणि—

कखकः-खिका,	कख्यमानः ;
कखयिता-त्री,	कखः ;
कखयन्-न्ती,	कखयितुम् ;
कखयिष्यन्-न्ती-ती,	कखना ;
कखयमानः,	कखनम् ;
कखयिष्यमाणः,	कखयित्वा ;
कखः, चिकखयिषुः,	[2]प्रकखय्य ;
कखयितव्यम्,	[3]कखम् २ ;
कखनीयम्,	काखम् २ ;
कख्यम्,	कखयित्वा २ .
ईषत्कखः-दुष्कखः-सुकखः,	इति विशेषः ।

1. 'कृत्यचः' (8-4-29) इति णत्वम् ।
2. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः ।
3. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति दीर्घविकल्पः ।

(143) " कगे नोच्यते " (I-भ्वादिः-791.-अक. सेट्. पर. घटादिः ।)

अस्यायमर्थ इति विशिष्य नोच्यते-क्रियासामान्यार्थत्वात् इत्येके । अनेकार्थत्वात्-इत्यन्ये । शुद्धात्-सन्नन्तात्-यङन्ताच्च, धातोरस्य कखतिवत् (141) रूपाणि सर्वाण्यपि ज्ञेयानि । ण्यन्तात् तु 'कखे हसने' (142) इति घटादिधातुवत् ज्ञेयानि ॥

(144) " कच बन्धने " (I-भ्वादिः. 168. सक. सेट्. आत्म.)

दीप्तौ च-इति कविकल्पद्रुमे ।

काचकः-चिका,	काचकः-चिका,	चिकचिषकः-षिका,	चाकचकः-चिका ;
कचिता-त्री,	काचयिता-त्री,	चिकचिषिता-त्री,	चाकचिता-त्री ;
—	काचयन्-न्ती,	काचयिष्यन्-न्ती-ती ;	—
कचमानः,	काचयमानः,	चिकचिषमाणः,	चाकच्यमानः ;
कचिष्यमाणः,	काचयिष्यमाणः,	चिकचिषिष्यमाणः,	चाकचिष्यमाणः ;
[1]कक्-कचौ-कचः ;	—	—	—
कचितम्-तः,	काचितः-तम्,	चिकचिषितः,	चाकचितः-तवान् ;
[2]कचः[A], काचः,	चिकचिषुः,	चिकाचयिषुः,	चाकचः ;
कचितव्यम्,	काचयितव्यम्,	चिकचिषितव्यम्,	चाकचितव्यम् ;
कचनीयम्,	काचनीयम्,	चिकचिषणीयम्,	चाकचनीयम् ;
[3]काच्यम्,	काच्यम्,	चिकचिष्यम्,	चाकच्यम् ;
ईषत्कचः, दुष्कचः, सुकचः ;		—	—
कच्यमानः,	काच्यमानः,	चिकचिष्यमाणः,	चाकच्यमानः ;
[4]काचः,	काचः,	चिकचिषः,	चाकचः ;
कचितुम्,	काचयितुम्,	चिकचिषितुम्,	चाकचितुम् ;

1. 'चोः कुः' (8-2-30) इति कुत्वम् ।
2. कचते=बध्नाति यूनां मनांसीति कचः=स्त्रीणां केशपाशः ।
3. निष्ठायां सेट्त्वात् 'चजोः कु—' (7-3-52) इति न कुत्वम् ।
4. 'हलश्च' (3-3-121) इति संज्ञायां घञ् । 'काचः शिक्ये मणौ नेत्ररोगभेदे मृदन्तते' इति विश्वमेदिन्यौ ।

A. 'सुलोचना यत्र शचीसमप्रभा अशाश्वचुः श्वञ्चितसौरभाः कचैः । सकञ्चुकाः काञ्चनकाञ्चिभूषिता प्रजाङ्गना निर्मचनेन नर्मणा ॥' धा. का. 1-23.

कचितः, काचना, चिकचिषा, चिकाचयिषा, चाकचा ;
कचनम्, काचनम्, चिकचिषणम्, चाकचनम् ;
कचित्वा, काचयित्वा, चिकचिषित्वा, चाकचित्वा ;
प्रकच्य, प्रकाच्य, प्रचिकचिष्य, प्रचाकच्य ;
काचम् २, कचित्वा २, } काचम् २, काचयित्वा २, } चिकचिषम् २, चिकचिषित्वा २, } चाकचम् २ ; चाकचित्वा २. }

(145) " कचि दीप्तिबन्धनयोः " (I-भ्वादिः-169. सक. सेट्. आत्म.)

[1]कञ्चकः-ञ्चिका, कञ्चकः-ञ्चिका, चिकञ्चिषकः-षिका, [2]चाकञ्चकः-ञ्चिका ;
कञ्चिता-त्री, कञ्चयिता-त्री, चिकञ्चिषिता-त्री, चाकञ्चिता-त्री ;
— कञ्चयन्-न्ती, कञ्चयिष्यन्-न्ती-ती, —
प्रनिकञ्चमानः, कञ्चयमानः, चिकञ्चिषमाणः, चाकञ्चयमानः ;
कन्-कञ्चौ-कञ्चः ; — — —
कञ्चितम्-तः, कञ्चितम्-तः, चिकञ्चिषितः, चाकञ्चितः-तवान् ;
कञ्चः, कञ्चः, चिकञ्चिषुः, चिकञ्चयिषुः, चाकञ्चः ;
कञ्चितव्यम्, कञ्चयितव्यम्, चिकञ्चिषितव्यम्, चाकञ्चितव्यम् ;
कञ्चनीयम्, कञ्चनीयम्, चिकञ्चिषणीयम्, चाकञ्चनीयम् ;
[3]कञ्च्यम्, कञ्च्यम्, चिकञ्चिष्यम्, चाकञ्च्यम् ;
ईषत्कञ्चः, दुष्कञ्चः, सुकञ्चः ; — —
कञ्च्यमानः, कञ्च्यमानः, चिकञ्चिष्यमाणः, चाकञ्च्यमानः ;
कञ्चः, कञ्चः, चिकञ्चिषः, चाकञ्चः ;
कञ्चितुम्, कञ्चयितुम्, चिकञ्चिषितुम्, चाकञ्चितुम् ;
[4]कञ्चा, कञ्चना, चिकञ्चिषा, चिकञ्चयिषा, चाकञ्चा ;
कञ्चनम्, कञ्चनम्, चिकञ्चिषणम्, चाकञ्चनम् ;
कञ्चित्वा, कञ्चयित्वा, चिकञ्चिषित्वा, चाकञ्चित्वा ;

---

1. 'इदितो नुम् धातोः' (7-1-58) इति नुम् ।
2. 'अतो लोपः' (6-4-48) इति अकारलोपः । 'यस्य हलः' (6-4-49) इति यङो यकारस्य लोपः ।
3. निष्ठायां सेट्त्वात् 'चजोः—' (7-3-52) इति कुत्वं न ।
4. 'गुरोश्च हलः' (3-3-103) इति अः प्रत्ययः ।

प्रकञ्च्य, प्रकञ्च्य, प्रचिकञ्चिष्य, प्रचाकञ्च्य ;
कञ्चम् २, कञ्चित्वा २, } कञ्चम् २, कञ्चयित्वा २, } चिकञ्चिषम् २, चिकञ्चिषित्वा २, } चाकञ्चम् २ ; चाकञ्चित्वा २ ; }
कञ्चुकम्.[A]

(146) " कटि[कटी]गतौ " (I-भ्वादिः-320. सक. सेट्. पर.)

[1]कण्टकः-ण्टिका, कण्टकः-ण्टिका, चिकण्टिषकः-षिका, चाकण्टकः-ण्टिका ;
कण्टिता-त्री, कण्टयिता-त्री, चिकण्टिषिता-त्री, चाकण्टिता-त्री ;
कण्टन्-न्ती, कण्टयन्-न्ती, चिकण्टिषन्-न्ती ; —
कण्टिष्यन्-न्ती-ती, कण्टयिष्यन्-न्ती-ती, चिकण्टिषिष्यन्-न्ती-ती ;
— कण्टयमानः, कण्टयिष्यमाणः, चाकण्टयमानः, चाकण्टिष्यमाणः ;
कन् - कण्टौ-कण्टः ; — — —
कण्टः, कण्टः, चिकण्टिषुः, चिकण्टयिषुः, चाकण्टः ;
कण्टितम्-तः[B], कण्टितम्-तः, चिकण्टिषितः, चाकण्टितः-तवान् ;
कण्टितव्यम्, कण्टयितव्यम्, चिकण्टिषितव्यम्, चाकण्टितव्यम् ;
कण्टनीयम्, कण्टनीयम्, चिकण्टिषणीयम्, चाकण्टनीयम् ;
कण्ट्यम्, कण्ट्यम्, चिकण्टिष्यम्, चाकण्ट्यम् ;
ईषत्कण्टः, दुष्कण्टः, सुकण्टः ; —
कण्ट्यमानः, कण्ट्यमानः, चिकण्टिष्यमाणः, चाकण्ट्यमाणः ;
कण्टः, कण्टः, चिकण्टिषः, चाकण्टः ;

---

1. 'इट किट **कटी** गतौ' इति धातुपाठे वर्तते । तत्र इदित् '**कटि**' इति धातुरिति पक्षमवलम्ब्य इमानि रूपाणि विलिखितानि । अन्ये तु '**कटी**' इति ईदितं धातुं प्रचक्षते । तन्मते **काटकः**, **कट्टम्–कट्टः-कट्टवान्**—इत्यादीनि रूपाणि भवन्ति । परे तु 'ई' इति धातुं प्रश्लिष्टं अङ्गीकृत्य, 'उदयति विततोर्ध्वरश्मि-' (शिशुपालवधे 4-20) रित्यादिप्रयोगनिर्वाहं कुर्वन्ति । तेषां मते 'ई' इति धात्वन्तरमप्यत्रेति ज्ञायते ।

A. बाहुलकात् उकप्रत्ययः । '**कञ्चुको** वारबाणे स्यान्निर्मोके कवचेऽपि च । वर्धापकगृहीताङ्गस्थितवस्त्रे च चोलके ॥ **कञ्चुक्योषधिभेदे** च—' इति **मेदिनी** ।
'सुलोचना यत्र शचीसमप्रभा अशाश्वचुः श्वञ्चितसौरभाः कचे ।
सकञ्चुका: काञ्चनकाञ्चिभूषिता व्रजाङ्गना निर्मचनेन नर्मणा ॥' धा. का. 1-23.

B. 'चेटैर्विटैश्चानुगतानबेटकैः एटत्पशूत्केटिरजः कटन् मलान् ।
प्रकण्टिताशोदयदंशुमण्डितैरकुण्डरत्नैर्मुडितार्कदीधितीन् ॥' धा. का. 1-42.

कण्टितुम्, कण्टयितुम्, चिकण्टिषितुम्, चाकण्टितुम्;
कण्टा, कण्टना, चिकण्टिषा, चिकण्टयिषा, चाकण्टा;
कण्टनम्, कण्टनम्, चिकण्टिषणम्, चाकण्टनम्;
कण्टित्वा, कण्टयित्वा, चिकण्टिषित्वा, चाकण्टित्वा;
सङ्कण्टय, प्रकण्ट्य, प्रचिकण्टिष्य, प्रचाकण्ट्य;
कण्टम् २, कण्टित्वा २, } कण्टम् २, कण्टयित्वा २, } चिकण्टिषम् २, चिकण्टिषित्वा २, } चाकण्टम् २; चाकण्टित्वा २. }

(147) "कटे वर्षावरणयोः" (I-भ्वादिः-294.सक. सेट्. पर.)

काटकः-टिका, काटकः-टिका, चिकटिषकः-षिका, चाकटकः-टिका, इति सर्वाण्यपि रूपाणि 'कख हसने' (141) इति धातोरिव ज्ञेयानि।

(148) "कठ कृच्छ्रजीवने" (I-भ्वादिः-333. अक. सेट्. पर.)*

'—अथ कण्ठते। शोके यो कण्ठयेत् कण्ठेत्, कठेत् स्यात् कृच्छ्रजीवने॥' (श्लो-79) इति देवः।

काठकः-ठिका, काठकः-ठिका, चिकठिषकः-षिका, चाकठकः-ठिका;
कठिता-त्री, काठयिता-त्री, चिकठिषिता-त्री, चाकठिता-त्री;
कठन्-न्ती, काठयन्-न्ती, चिकठिषन्-न्ती;
कठिष्यन्-न्ती-ती, काठयिष्यन्-न्ती-ती, चिकठिषिष्यन्-न्ती-ती;
— काठयमानः, काठयिष्यमाणः, चाकठ्यमानः, चाकठिष्यमाणः;
कट्-कड्-कठौ-कठः; — — —
कठितम्-तः-काठितः-तम्, चिकठिषितः, चाकठितः-तवान्;
कठः, काठः, चिकठिषुः, चिकाठयिषुः, चाकठः;
कठितव्यम्, काठयितव्यम्, चिकठिषितव्यम्, चाकठितव्यम्;
कठनीयम्, काठनीयम्, चिकठिषणीयम्, चाकठनीयम्;
काठ्यम्, काठ्यम्, चिकठिष्यम्, चाकठ्यम्;
ईषत्कठः, दुष्कठः, सुकठः; —
कठ्यमानः, काठ्यमानः, चिकठिष्यमाणः, चाकठ्यमानः;

* 'मठ कठ मदनिवासयोः' इति मैत्रेयरक्षितसम्मतः पाठः।

[A]काठः, काठः, चिकठिषः, चाकठः;
कठितुम्, काठयितुम्, चिकठिषितुम्, चाकठितुम्;
[1]कट्टिः, काठना, चिकठिषा, चिकाठयिषा, चाकठा;
कठनम्, काठनम्, चिकठिषणम्, चाकठनम्;
कठित्वा, काठयित्वा, चिकठिषित्वा, चाकठित्वा;
प्रकठ्य, प्रकाठ्य, प्रचिकठिष्य, प्रचाकठ्य;
काठम् २, कठित्वा २, } काठम् २, काठयित्वा २, } चिकठिषम् २, चिकठिषित्वा २, } चाकठम् २; चाकठित्वा २; }
[2]कठिनम्, [3]कठोरम्.

(149) "कठि शोके" (I-भ्वादिः-264. अक. सेट्. आत्म.)

'—अथ कण्ठते। शोके यो कण्ठयेत् कण्ठेत्, कठेत् स्यात् कृच्छ्रजीवने॥' (श्लो-79) इति देवः। प्रायेणायमुत्पूर्वक एव प्रयुज्यते।

शोकः=सोत्कण्ठस्मरणम्। **उत्कण्ठामात्रे त्वकर्मकः।**

उत्कण्ठकः-ण्ठिका, कण्ठकः-ण्ठिका, उच्चिकण्ठिषकः-षिका, चाकण्ठकः-ण्ठिका;
कण्ठिता-त्री, कण्ठयिता-त्री, चिकण्ठिषिता-त्री, चाकण्ठिता-त्री;
— कण्ठयन्-न्ती, कण्ठयिष्यन्-न्ती-ती;
[B]उत्कण्ठमानः, कण्ठयमानः, चिकण्ठिषमाणः, चाकण्ठ्यमानः;
कण्ठिष्यमाणः, कण्ठयिष्यमाणः, चिकण्ठिषिष्यमाणः, चाकण्ठिष्यमाणः;
कन्-कण्ठौ-कण्ठः; — — —
[C]कण्ठितम्-तः, कण्ठितम्-तः, चिकण्ठिषितः, चाकण्ठितः-तवान्;

1. 'तितुत्र—' (7-2-9) इति नेट्। 'ष्टुना ष्टुः' (8-4-41.) इति ष्टुत्वम्।
2. औणादिके (द. उ. 5-15) इनच् प्रत्यये रूपम्।
3. औणादिके (द. उ. 8-29) ओरप्रत्यये रूपम्।
A. 'वनाश्रयत्वेऽपि स**काठ**पर्यठद्रठन्मृगालीहठकर्मवर्जितान्। रोठन्नृशंसालुठितैः अनोठकैर्वृतान् धनाढ्यैर्मणिपीठसंश्रयैः॥' धा. का. 1-44.
B. 'अशिश्रवन्नात्ययिकं तमेत्य दूता यदार्थं प्रयियासयन्तः। आंहिष्ट जाताञ्जिहिषस्तदाऽसावुत्**कण्ठमानो** भरतो गुरूणाम्॥' भ. का. 3-25.
C. 'अनन् कुमार्गेषु शुभाध्वनैव वन् भ्रमन् भृशोत्**कण्ठित**गोपिके हरौ।' धा. का. 1-35.

कण्ठः, [1]उत्कण्ठी, कण्ठः, चिकण्ठिषुः, चिकण्ठयिषुः, चाकण्ठः ;

कण्ठितव्यम् , कण्ठयितव्यम् , चिकण्ठिषितव्यम् , चाकण्ठितव्यम् ;

कण्ठनीयम् , कण्ठनीयम् , चिकण्ठिषणीयम् , चाकण्ठनीयम् ;

कण्ठ्यम् , कण्ठ्यम् , चिकण्ठिष्यम् , चाकण्ठ्यम् ;

ईषत्कण्ठः, दुष्कण्ठः, सुकण्ठः ; —

कण्ठ्यमानः, कण्ठ्यमानः, चिकण्ठिष्यमाणः, चाकण्ठ्यमानः ;

कण्ठः, कण्ठः, चिकण्ठिषः, चाकण्ठः ;

कण्ठितुम् , कण्ठयितुम् , चिकण्ठिषितुम् , चाकण्ठितुम् ;

उत्कण्ठा, कण्ठना, चिकण्ठिषा, चिकण्ठयिषा, चाकण्ठा ;

कण्ठनम् , कण्ठनम् , चिकण्ठिषणम् , चाकण्ठनम् ;

कण्ठित्वा, कण्ठयित्वा, चिकण्ठिषित्वा, चाकण्ठित्वा ;

उत्कण्ठ्य, प्रकण्ठ्य, उच्चिकण्ठिष्य, उच्चाकण्ठ्य ;

कण्ठम् २, कण्ठित्वा २, } कण्ठम् २, कण्ठयित्वा २, } चिकण्ठिषम् २, चिकण्ठिषित्वा २, } चाकण्ठम् २ ; चाकण्ठित्वा २. }

(150) " कठि शोके " (X-चुरादिः-1848. अक. सेट्. उभ.)

'—अथ कण्ठते। शोके स्यात् कण्ठयेत् कण्ठेत , कठे स्यात् कृच्छ्रजीवने ॥' (श्लो. 79) इति देवः । **प्रायेणोत्पूर्वः उत्कण्ठार्थकः** ।

इदित्त्वात् णिज्विकल्पः। णिजभावपक्षे उत्कण्ठकः-चिकण्ठिषकः, चाकण्ठकः-इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककण्ठतिवत् (149) ज्ञेयानि। णिजभावपक्षे 'शेषात् कर्तरि परस्मैपदम्' (1-3-78) इति शास्त्रात् शतरि उत्कण्ठन्-[A]न्ती, उत्कण्ठिष्यन्-न्ती-ती, इति रूपमिति विशेषः। ण्यन्तात् सनि तु—

चिकण्ठयिषकः-षिका, चिकण्ठयिषिता-त्री, चिकण्ठयिषन्-न्ती, चिकण्ठयिषिष्यन्-न्ती-ती, चिकण्ठयिषमाणः, चिकण्ठयिषिष्यमाणः, चिकण्ठयिषितः-तवान् , चिकण्ठयिषुः, चिकण्ठयिषितव्यम् , चिकण्ठयिषणीयम् , चिकण्ठयिष्यम् , चिकण्ठयिष्यमाणः, ईषच्चिकण्ठयिषः,

1. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति णिनिः।

A. 'स्त्रियश्चोत्कण्ठन्त्यो ददृशुरजितं मृष्टतनवः नृपस्त्वेतन्नामर्षत रिपुजनाधर्षितबलः॥' धा. का. 3-52.

दुश्चिकण्ठयिषः-सुचिकण्ठयिषः, चिकण्ठयिषः, चिकण्ठयिषितुम् , चिकण्ठयिषा, चिकण्ठयिषणम् , चिकण्ठयिषित्वा, सञ्चिकण्ठयिष्य, चिकण्ठयिषम् २—चिकण्ठयिषित्वा २, इत्यादीनि रूपाणि—इति विशेषः ।

(151) " कड मदे " (I-भ्वादिः-360. सक. सेट्. पर.)

काडकः-डिका, काडकः-डिका, चिकडिषकः-षिका, चाकडकः-डिका, इति सर्वाण्यपि रूपाणि भौवादिककठधातुवत् (148) बोध्यानि ।

(152) " कड मदे " (VI-तुदादिः-1380. सक. सेट्. पर. कुटादिः।)

शतरि परम्-कडन्-न्ती-ती, इति रूपम् । 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम् विकल्पः। अन्यत्र सर्वत्रापि भौवादिककठतिवत्—(148) रूपाणि ज्ञेयानि। डकारान्तप्रकरणात् अस्य कुटादौ पाठः। कुटादिपाठस्य फलं किमपि न ।

(153) " कडि भेदने " (I-भ्वादिः-282. सक. सेट्. आत्म.)

'कण्डयेदिति भेदे णौ, मदे तु शपि कण्डते ।' (श्लो. 86) इति देवः ।

कण्डकः-ण्डिका, कण्डकः-ण्डिका, चिकण्डिषकः-षिका, चाकण्डकः-ण्डिका-इत्यादीनि रूपाणि भौवादिककण्ठतिवत् (149) ज्ञेयानि ।

(154) " कडि मदे " (I-भ्वादिः-360. अक. सेट्. पर.)

'कड मदे' (151) इत्यस्य पाठान्तरमिदम् ।

कण्डकः-ण्डिका, कण्डकः-ण्डिका, चिकण्डिषकः-षिका, चाकण्डकः-ण्डिका-इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककण्टतिवत (149) ज्ञेयानि ।

(155) " कडि भेदने " (X-चुरादिः-1582. सक. सेट्. उभ.)

'कण्डयेदिति भेदे णौ, मदे तु शपि कण्डते ।' (श्लो-86) इति देवः ।

इदित्त्वाण्णिचो वैकल्पिकत्वम् । णिजभावपक्षे—कण्डकः-ण्डिका, चिकण्डिषकः-षिका, चाकण्डकः-ण्डिका, इत्यादीनि रूपाणि 'कठि शोके' (149) इति भौवादिकधातुवत् ज्ञेयानि। णिच्पक्षे तु कण्डकः-ण्डिका, चिकण्डयिषकः-षिका, इत्यादीनि रूपाणि चौरादिककण्ठयतिवत् (150) ज्ञेयानि ।

(156) " कड्ड कार्कश्ये " (I-भ्वादिः-349. अक.सेट्.पर.)

अयं दोपधः ।

कड्डकः-ड्डिका, कड्डकः-ड्डिका, चिकड्डिषकः-षिका, चाकड्डकः-ड्डिका ;
कड्डिता-त्री, कड्डयिता-त्री, चिकड्डिषिता-त्री, चाकड्डिता-त्री ;
कड्डन्-न्ती, कड्डयन्-न्ती, चिकड्डिषन्-न्ती —
कड्डिष्यन्-न्ती-ती, कड्डयिष्यन्-न्ती-ती, चिकड्डिषिष्यन्-न्ती-ती ;
— कड्डयमानः, कड्डयिष्यमाणः, चाकड्ड्यमानः, चाकड्डिष्यमाणः ;
[1]कत्[A]-कद्-कड्-ट्-कड्डौ-कड्डः ; — —
कड्डितम्-तः, कड्डितम्-तः, चिकड्डिषितः, चाकड्डितः-तवान् ;
कड्डः, कड्डः, चिकड्डिषुः, चिकड्डयिषुः, चाकड्डः ;
कड्डितव्यम् , कड्डयितव्यम् , चिकड्डिषितव्यम् , चाकड्डितव्यम् ;
कड्डनीयम् , कड्डनीयम् , चिकड्डिषणीयम् , चाकड्डनीयम् ;
कड्ड्यम् , कड्ड्यम् , चिकड्डिष्यम् , चाकड्ड्यम् ;
ईषत्कड्डः-दुष्कड्डः-सुकड्डः ; —
कड्ड्यमानः, कड्ड्यमानः, चिकड्डिष्यमाणः, चाकड्ड्यमानः ;
कड्डः, कड्डः, चिकड्डिषः, चाकड्डः ;
कड्डितुम् , कड्डयितुम् , चिकड्डिषितुम् , चाकड्डितुम् ;
कड्डा, कड्डना, चिकड्डिषा, चिकड्डयिषा, चाकड्डा ;
कड्डनम्, कड्डनम्, चिकड्डिषणम् , चाकड्डनम् ;
कड्डित्वा, कड्डयित्वा, चिकड्डिषित्वा, चाकड्डित्वा ;
प्रकड्ड्य, प्रकड्ड्य, प्रचिकड्डिष्य, प्रचाकड्ड्य ;
कड्डम् २, कड्डित्वा २, } कड्डम् २, कड्डयित्वा २, } चिकड्डिषम् २, चिकड्डिषित्वा २, } चाकड्डम् २ ; चाकड्डित्वा २. }

---

1. डकारस्य 'संयोगान्तस्य–' (8-2-23) इति लोपे, दकारस्य चर्त्वे च रूपम् । **क्षीरस्वामी** तु डोपधममुं धातुं पठति । तत्पक्षे, डकारस्य संयोगान्तलोपे, उपधाडकारस्य चर्त्वविकल्पे च '**कट्-कड्**—' इति रूपम् ।

A. ' **अकड्ड**रिक्रीडनधूततोडकान् प्रहूडितान् होडदरोडथभिक्षुकैः ।
प्ररोडकानङ्गविलोलितैर्वृतान् रतावडङ्घ्रिलैलनाजनैः कलैः ॥ ' धा. का. 1·46.

(157) " कण शब्दार्थः " (I-भ्वादिः-449. सक. सेट्. पर.)

' कणेः कणति शब्दार्थे, काणयेण्णौ निमीलने ॥ ' (श्लो-90) इति **देवः** ।

काणकः-णिका, काणकः-णिका, चिकणिषकः-षिका, [1]चङ्कणकः-णिका ;
कणिता-त्री, काणयिता-त्री, चिकणिषिता-त्री, चङ्कणिता-त्री ;
कणन्-न्ती, काणयन्-न्ती, चिकणिषन्-न्ती ; —
कणिष्यन्-न्ती-ती, काणयिष्यन्-न्ती-ती, चिकणिषिष्यन्-न्ती-ती ; —
— काणयमानः, काणयिष्यमाणः, [2]चङ्कण्यमानः, चङ्कणिष्यमाणः ;
[3]काण्-काणौ-काणः ; — — —
कणितम्-तः, काणितः-तम् , चिकणिषितः, चङ्कणितः-तवान् ;
कणः, [A]उत्कणः, [4]कङ्कणः, काणः, चिकणिषुः, चिकाणयिषुः, चङ्कणः ;
कणितव्यम् , काणयितव्यम् , चिकणिषितव्यम् , चङ्कणितव्यम् ;
कणनीयम् , काणनीयम् , चिकणिषणीयम् , चङ्कणनीयम् ;
काण्यम् , काण्यम् , चिकणिष्यम् , चङ्कण्यम् ;
ईषत्कणः-दुष्कणः-सुकणः ; — —
कण्यमानः, काण्यमानः, चिकणिष्यमाणः, चङ्कण्यमानः ;
काणः, [5]कणः, काणः, चिकणिषः, चङ्कणः ;
कणितुम् , काणयितुम् , चिकणिषितुम् , चङ्कणितुम् ;
[6]कणितिः, काणना, चिकणिषा, चिकाणयिषा , चङ्कणा ;
कणनम् , काणनम् , चिकणिषणम् , चङ्कणनम् ;

---

1. यङि अभ्यासस्य 'नुगतोऽनुनासिकान्तस्य ' (7-4-85) इति नुक् ।
2. शानचः शित्त्वात् 'कर्तरि शप् ' (3-1-68) इति शप् । तस्य 'अतो गुणे' (6-1-97) इति पररूपम् । 'आने मुक् ' (7-2-82) इति मुक् ।
3. ' अनुनासिकस्य क्विझलोः क्ङिति ' (6-4-15) इति दीर्घः ।
4. 'कं शुभं कणति इति **कङ्कणम्**=करभूषणम् । पचाद्यच् (3-1-134) ।' **इत्यमरसुधा** ।
5. 'गोचरसंचर–' (3-3-119) इति सूत्रे चकारस्यानुक्तसमुच्चयार्थकत्वात् अस्यापि धातोः घप्रत्ययः संज्ञायां भवति । **कणः**=लेशः सूक्ष्मतण्डुलश्च ।' इति **मा. धा. वृत्तौ** ।
6. 'तितुत्रेष्वग्रहादीनाम्—' (वा. 7-2-9) इति पर्युदासादिड् भवति । यथा **भणिति**-रित्यत्र ।

A. ' अणद्द्विशः केलिरणैर्मनोज्ञया वाण्या भणन्तो मणिभूष**णोत्कणाः**।
वनात्कुमाराः क्वणिताम्र्यवेणवो व्रणद्विषाणभ्रणिताभ्रमाययुः ॥ ' धा. का. 1-58.

कणित्वा,	काणयित्वा,	चिकणिषित्वा,	चङ्कणित्वा ;
सङ्कण्य,	सङ्काण्य,	सञ्चिकणिष्य,	सञ्चङ्कण्य ;
काणम् २, कणित्वा २,	काणम् २, काणयित्वा २,	चिकणिषम् २, चिकणिषित्वा २,	चङ्कणम् २ ; चङ्कणित्वा २;

[1]कण्ठः, [2]कण्वः.

(158) " **कण गतौ** " (I-भ्वादिः-794. सक. सेट्. पर.) **घटादिः।**

अस्य धातोः पूर्वोक्तणतिवत् (157) शुद्धात्-सन्नन्तात्-यङन्ताच्च रूपाणि ज्ञेयानि । ण्यन्ते परम्—

[3]कणकः-णिका,	ईषत्कणः-दुष्कणः-सुकणः ;
कणयिता-त्री,	कण्यमानः ;
[A]कणयन्-न्ती,	कणः;
कणयिष्यन्-न्ती-ती,	कणयितुम् ;
कणयमानः,	कणना ;
कणयिष्यमाणः,	कणनम् ;
कणितः-तवान्,	कणयित्वा ;
कणयिषुः,	[5]प्रकणय्य ;
कणयितव्यम्,	[6]कणम् २ ;
कणनीयम्,	काणम् २ ;
[4]कण्यम्,	काणयित्वा २ ;

इति रूपाणीति विशेषः । एतच्च गत्यर्थकत्वे एव (धातूनामनेकार्थकत्वात्)। अन्यार्थकत्वे तु काणयिता इत्यादीनि रूपाण्येव, पूर्ववत् ।

---

1. औणादिके (द. उ. 5-6) ठप्रत्यये रूपम् । **कण्ठः**=गलः ।
2. औणादिके (द. उ. 8-125) कन् प्रत्यये रूपम् । **कण्वं**=पापम् । **कण्वः**=ऋषिः ।
3. घटादिपाठात् मित्त्वम् । 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वः ।
4. 'अचो यत्' (3-1-97) इति यत् ।
5. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः ।
6. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति णमुलि दीर्घो वा ।

A. 'अगन्मनीषः **कणयन्** मुकुन्दमस्मान् वियोगं रणयन् स दूतः ।
चणन् विषादं विशणन् विचिन्तां श्रणन् विमोहं श्रथितोऽस्तु सद्यः ॥' धा. का. 2.9.

(159) " **कण निमीलने** " (X-चुरादिः-1716. सक. सेट्. उभ.)

'कणेः कणति शब्दार्थे, काणयेण्णौ निमीलने ।' (श्लो. 90) इति **देवः ।**

काणकः-णिका,	चिकाणयिषकः-षिका ;
काणयिता-त्री,	चिकाणयिषिता-त्री ;
काणयन्-न्ती,	चिकाणयिषन्-न्ती ;
काणयिष्यन्-न्ती-ती,	चिकाणयिषिष्यन्-न्ती-ती ;
काणयमानः,	चिकाणयिषमाणः ;
काणयिष्यमाणः,	चिकाणयिषिष्यमाणः ;
काण्-काणौ-काणः,	——
काणितम्-तः,	चिकाणयिषितः-तवान् ;
[A]काणः[1],	चिकाणयिषुः ;
काणयितव्यम्,	चिकाणयिषितव्यम् ;
काणनीयम्,	चिकाणयिषणीयम् ;
काण्यम्,	चिकाणयिष्यम् ;
ईषत्काणः-दुष्काणः-सुकाणः ;	—
काण्यमानः,	चिकाणयिष्यमाणः ;
काणः,	चिकाणयिषः ;
काणयितुम्,	चिकाणयिषितुम् ;
काणना,	चिकाणयिषा ;
काणनम्,	चिकाणयिषणम् ;
काणयित्वा,	चिकाणयिषित्वा ;
सङ्काण्य,	सञ्चिकाणयिष्य ;
काणम् २, काणयित्वा २,	चिकाणयिषम् २ ; चिकाणयिषित्वा २.

---

1. स्वभावात् एकस्य नेत्रस्य दर्शनशक्तिराहित्ये एवायं प्रयुज्यते ।

A. 'सञ्चर्चयन् अपनयानथ बुक्कयिष्णुः श्वेवोग्रशब्दनपरः कररुद्धकाणः ।
मल्लो जिजम्भिषुरसूदितवीर्यमीशं मुष्टया जजास बहु पाशितवांश्च दोष्णा ॥'
धा. का. 3-38.

(160) " कत्थ श्लाघायाम् " (I-भ्वादिः-37. अक. सेट्. आत्म.)

श्लाघा-गुणारोपः, इति क्षीरस्वामी ।

कत्थकः-त्थिका, कत्थकः-त्थिका, चिकत्थिषकः-षिका, चाकत्थकः-त्थिका ;

कत्थिता-त्री, कत्थयिता-त्री, चिकत्थिषिता-त्री, चाकत्थिता-त्री ;

— कत्थयन्-न्ती, कत्थयिष्यन्-न्ती-ती ; —

विकत्थमानः, कत्थयमानः, चिकत्थिषमाणः, चाकत्थ्यमानः ;

कत्थिष्यमाणः, कत्थयिष्यमाणः, चिकत्थिषिष्यमाणः, चाकत्थिष्यमाणः ;

[1]कत्-कत्थौ-कत्थः ; — — —

कत्थितम्-तः, कत्थितम्-तः, चिकत्थिषितः, चाकत्थितः-तवान् ;

कत्थः, [2]विकत्थी,[A] विकत्थनः,[3] चिकत्थिषुः, चिकत्थयिषुः, चाकत्थः ;

कत्थितव्यम्, कत्थयितव्यम्, चिकत्थिषितव्यम्, चाकत्थितव्यम् ;

कत्थनीयम्, कत्थनीयम्, चिकत्थिषणीयम्, चाकत्थनीयम् ;

कत्थ्यम्, कत्थ्यम्, चिकत्थिष्यम्, चाकत्थ्यम् ;

ईषत्कत्थः-दुष्कत्थः-सुकत्थः ; — —

कत्थ्यमानः, कत्थ्यमानः, चिकत्थिष्यमाणः, चाकत्थ्यमानः ;

कत्थः, कत्थः, चिकत्थिषः, चाकत्थः ;

कत्थितुम्, कत्थयितुम्, चिकत्थिषितुम्, चाकत्थितुम् ;

कत्था, कत्थना, चिकत्थिषा, चिकत्थयिषा, चाकत्था ;

[B]कत्थनम्, कत्थनम्, चिकत्थिषणम्, चाकत्थनम् ;

कत्थित्वा, कत्थयित्वा, चिकत्थिषित्वा, चाकत्थित्वा ;

विकत्थ्य, विकत्थ्य, प्रचिकत्थिष्य, प्रचाकत्थ्य ;

कत्थम् २ } कत्थम् २ } चिकत्थिषम् २ } चाकत्थम् २ ; }
कत्थित्वा २ } कत्थयित्वा २ } चिकत्थिषित्वा २ } चाकत्थित्वा २ ; }

---

1. ' संयोगान्तस्य लोपः ' (8-2-23) इति थकारस्य लोपः ।
2. ' वौ कषलषकत्थस्रम्भः ' (3-2-143) इति ताच्छीलिको घिनुण् ।
3. ' अनुदात्तेतश्च हलादेः ' (3-2-149) इति युच् ताच्छीलिकः ।
   ' वाऽसरूपोऽस्त्रियाम् ' (3-1-94) इत्यनेन कदाचित् युजपि ।

A. ' **विकत्थी** याचते प्रत्तमविस्रम्भी मुहुर्जलम् ।' भ. का 7-11.

B. ' स वेथते स्माखिलवेथितं विधिं प्रश्रन्थितग्रन्थनधीर**कत्थनः** ।
अतेन्मुरारिर्मम चिन्मयोऽन्तिके च्योतन् दिशः प्रश्च्युतितैः स्मितामृतैः ॥ '
धा. का. 1-6.

(161) " कत्र शैथिल्ये " (X-चुरादिः-1915. सक. सेट्. उभ.)(अ)

अदन्तः ।

अदन्तपाठसामर्थ्यात् णिचो वैकल्पिकत्वम् । अन्यथा उपधाकार्याभावात् अदन्तपाठो व्यर्थः स्यात् ।

कत्रकः-त्रिका, चिकत्रयिषकः-षिका, कत्रकः-त्रिका, [1]चिकत्रिषकः-षिका ;[2]

कत्रयिता-त्री, चिकत्रयिषिता-त्री, कत्रिता-त्री, चिकत्रिषिता-त्री ;

कत्रयन्-न्ती, चिकत्रयिषन्-न्ती, कत्रन्-न्ती, चिकत्रिषन्-न्ती ;

कत्रयमाणः, चिकत्रयिषमाणः ; —

कत्रयिष्यन्-न्ती-ती, चिकत्रयिषिष्यन्-न्ती-ती, कत्रिष्यन्-न्ती-ती, चिकत्रिषिष्यन्-न्ती-ती ;

कत्रयिष्यमाणः, चिकत्रयिषिष्यमाणः ; —

[3]कत् ; — —

कत्रितम्-[A]तः, चिकत्रयिषितः, कत्रितः, चिकत्रिषितः-तवान् ;

कत्रः, चिकत्रयिषुः, कत्रः, चिकत्रिषुः ; —

कत्रयितव्यम्, चिकत्रयिषितव्यम्, कत्रितव्यम्, चिकत्रिषितव्यम् ;

कत्रणीयम्, चिकत्रयिषणीयम्, कत्रणीयम्, चिकत्रिषणीयम् ;

कत्र्यम्, चिकत्रयिष्यम्, कत्र्यम्, चिकत्रिष्यम् ;

ईषत्कत्रः-दुष्कत्रः-सुकत्रः ; —

कत्र्यमाणः, चिकत्रयिष्यमाणः, कत्र्यमाणः, चिकत्रिष्यमाणः ;

कत्रः, चिकत्रयिषः, कत्रः, चिकत्रिषः ; —

कत्रयितुम्, चिकत्रयिषितुम्, कत्रितुम्, चिकत्रिषितुम् ;

कत्रणा, चिकत्रयिषा, कत्रा, चिकत्रिषा ; —

(अ) ' **कर्त** ' इति **क्षीरस्वाम्या**दिसम्मतः पाठः ।

1. णिजभावपक्षे केवलधातोस्सनि रूपम् ।
2. णिजभावपक्षे अनेकाच्त्वाद्धातोः यङ् न ।
3. ' संयोगान्तलोपे—यणः प्रतिषेधो वाच्यः ; न वा झलो लोपात् ; बहिरङ्गलक्षणत्वाद्वा ' (वा. 8-2-23) इति **भाष्य**पर्यालोचनया—' कलत्रमाचक्षाणः ' इत्यत्रेव अकृत्रिम-यणघटितानां प्रयोगाणां—**शब्दरत्नकारै**रनभिधानं प्रपञ्चितमिह स्मर्तव्यम् ।

A. ' दुष्पारदुश्चरिततीरणकृद्यथेशो नो चक्षमे पुटयितुं तम**कत्रितोष्मा** ॥ '
धा. का. 5-93.

कत्रणम् , चिकत्रयिषणम् , कत्रणम् , चिकत्रिषणम् ;
कत्रयित्वा, चिकत्रयिषित्वा, कत्रित्वा, चिकत्रिषित्वा ;
सङ्कत्र्य, सञ्चिकत्रयिष्य, संकत्र्य, सञ्चिकत्रिष्य ;

कत्रम् २,	चिकत्रयिषम् २,	कत्रम् २,	चिकत्रिषम् २,
कत्रयित्वा २,	चिकत्रयिषित्वा २,	कत्रित्वा २,	चिकत्रिषित्वा २.

(162) " कथ वाक्यप्रबन्धे " (X-चुरादिः-1852. सक. सेट्. उभ.)

अदन्तः ।

कथकः[1]-थिका,	चिकथयिषकः-षिका ;
कथयिता-त्री,	चिकथयिषिता-त्री ;
कथयन्-न्ती,	चिकथयिषन्-न्ती ;
कथयिष्यन्-न्ती-ती,	चिकथयिषिष्यन्-न्ती-ती ;
कथयमानः,	चिकथयिषमाणः ;
कथयिष्यमाणः,	चिकथयिषिष्यमाणः ;
कत्-कद्-कथौ-कथः ;	—
कथितम्-तः,	चिकथयिषितः-तवान् ;
कथः,	चिकथयिषुः ;
कथयितव्यम् ,	चिकथयिषितव्यम् ;
[A]कथनीयम् ,	चिकथयिषणीयम् ;
कथ्यम् ,	चिकथयिष्यम् ;
ईषत्कथः-दुष्कथः-सुकथः ;	—
कथ्यमानः,	चिकथयिष्यमाणः ;
कथः,	चिकथयिषः ;
कथयितुम् ,	चिकथयिषितुम् ;
[2]कथा[B],	चिकथयिषा ;

1. धातोरदन्तत्वात् , अल्लोपस्य स्थानिवद्भावादुपधावृद्धिर्न ।
2. 'चिन्तिपूजिकथिकुम्बिचर्चश्च' (3-3-105) इत्यङ् युजपवादः ।

A. 'प्रष्टव्यं पृच्छतस्तस्य **कथनीयम**वीवचत् । आत्मानं वनवासं च जेयं चारिं रघूत्तमः ॥' भ. का. 6-46.

B. 'चिन्तावन्तः **कथां** चक्रुरुपधामेदभीरवः ।
अकृत्वा नृपतेः कर्ण पूजां लप्स्यामहे कथम् ॥' भ. का. 7-72.

कथनम् ,	चिकथयिषणम् ;
कथयित्वा,	चिकथयिषित्वा ;
[1]प्रकथय्य[A],	प्रचिकथयिष्य ;
कथम् २,	चिकथयिषम् २ ;
कथयित्वा २,	चिकथयिषित्वा २.

(163) " कदि आह्वाने रोदने च " (I-भ्वादिः-70. सक. सेट्. पर.)

आह्वाने सकर्मकः, अन्यत्राकर्मकः ।

'आह्वाने रोदने क्रन्देः कन्देः क्रन्दति कन्दति । वैक्लव्ये तु तयोर्धात्वोः
क्रन्दते कन्दते मितोः ॥' (श्लो-105) इति **देवः** ।

[2]कन्दकः-न्दिका, कन्दकः-न्दिकाः, चिकन्दिषकः-षिका, चाकन्दकः-न्दिका ;
कन्दिता-त्री, कन्दयिता-त्री, चिकन्दिषिता-त्री, चाकन्दिता-त्री ;

कन्दन्-न्ती,	कन्दयन्-न्ती,	चिकन्दिषन्-न्ती ;	—

कन्दिष्यन्-न्ती-ती, कन्दयिष्यन्-न्ती-ती, चिकन्दिषिष्यन्-न्ती-ती ;

कन्दयमानः,	कन्दयिष्यमाणः,	चाकन्द्यमानः,	चाकन्दिष्यमाणः ;
कन्-कन्दौ-कन्दः ;	—	—	—
कन्दितम्-तः,	[B]कन्दितः-तं,	चिकन्दिषितः,	चाकन्दितः-तवान् ;
कन्दः, कन्दः,	आकन्दी,[3] चिकन्दिषुः,	चिकन्दयिषुः,	चाकन्दः ;
कन्दितव्यम्,	कन्दयितव्यम्,	चिकन्दिषितव्यम् ,	चाकन्दितव्यम् ;
कन्दनीयम् ,	कन्दनीयम् ,	चिकन्दिषणीयम् ,	चाकन्दनीयम् ;
कन्द्यम् ,	कन्द्यम् ,	चिकन्दिष्यम् ,	चाकन्द्यम् ;
ईषत्कन्दः,-दुष्कन्दः-सुकन्दः ;		—	—
कन्द्यमानः,	कन्द्यमानः,	चिकन्दिष्यमाणः,	चाकन्द्यमानः ;

1. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः ।
2. 'इदितो नुम् धातोः' (7-1-58) इति नुम् ।
3. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति णिनिः ।

A. 'ग्रामेयकैर्नागरकैश्च लोकैर्निरीक्ष्यमाणा सह राजकीयैः ।
कर्मन्दिवन्द्या **प्रकथय्य** सैवं तिरोदधेऽनु स्तनयित्नुपद्याम् ॥' वा. वि. 3- 55.

B. 'मनोज्ञगण्डं तमनिन्दितानं नन्दात्मजं शारदचन्द्रशीतलम् ।
पराक्रमत्रन्दन**कन्दिता**सुरं संक्रन्दनक्रन्दितमीक्षितास्महे ॥' धा. का. 1-10.

कन्दः, कन्दः, चिकन्दिषः, चाकन्दः ;
कन्दितुम्, कन्दयितुम्, चिकन्दिषितुम्, चाकन्दितुम् ;
कन्दा, कन्दना, चिकन्दिषा, चिकन्दयिषा, चाकन्दा ;
कन्दनम्, कन्दनम्, चिकन्दिषणम्, चाकन्दनम् ;
कन्दित्वा, कन्दयित्वा, चिकन्दिषित्वा, चाकन्दित्वा ;
सङ्कन्द्य, संकन्द्य, सञ्चिकन्दिष्य, सञ्चाकन्द्य ;
कन्दम् २ } कन्दम् २ } चिकन्दिषम् २ } चाकन्दम् २ }
कन्दित्वा २ } कन्दयित्वा२ } चिकन्दिषित्वा २ } चाकन्दित्वा २. }

(164) "कदि वैक्लव्ये" (I-भ्वादिः-772. अक. सेट्. आत्म.)

[A]घटादिः षित् च ।

'आह्वाने रोदने क्रन्देः कन्देः क्रन्दति कन्दति ।
वैक्लव्ये तु तयोर्धात्वोः क्रन्दते कन्दते मितोः ॥
मित्त्वार्थपाठसामर्थ्यात् तयोर्दीर्घविकल्पनम् ।
भवेच्चिण्णमुलोस्तस्मादक्रान्द्यक्रन्दि सिध्यतः ॥'
(श्लो-105-106.) इति **देवः** ।

'कदि आह्वाने रोदने च' (163) इति धातोरेव, अर्थविशेषे आत्मनेपदार्थं मित्त्वार्थं चानुवादो घटादौ ॥

कन्दकः-न्दिका, कन्दकः-न्दिका, चिकन्दिषकः-षिका, चाकन्दकः-न्दिका ;
कन्दिता-त्री, कन्दयिता-त्री, चिकन्दिषिता-त्री, चाकन्दिता-त्री ;
— कन्दयन्-न्ती, कन्दयिष्यन्-न्ती-ती ; —
कन्दमानः, कन्दयमानः, चिकन्दिषमाणः, चाकन्द्यमानः ;
कन्दिष्यमाणः, कन्दयिष्यमाणः, चिकन्दिषिष्यमाणः, चाकन्दिष्यमाणः ;
कन्-कन्दौ-कन्दः ; — — —
कन्दितं-तः, [1]कन्दितः-तम्, चिकन्दिषितः, चाकन्दितः-तवान् ;
कन्दः, कन्दः, चिकन्दिषुः, चिकन्दयिषुः, चाकन्दः ;

---

1. 'निष्ठायां सेटि' (6-4-52) इति णेर्लोपः ।

A. 'घटादिषु त्विहापूर्वपठितास्सर्वदा मितः । बहिस्स्थस्येह पाठे तु मित्त्वमुक्तेऽर्थ एव हि' ॥ (धातुकाव्यव्याख्याने) इत्यनेन न्यायेन वैकल्ये एव मित्त्वप्रयुक्तं कार्यम् । **आह्वानरोदनयोस्तु मित्त्वं न** ।

कन्दितव्यम्, कन्दयितव्यम्, चिकन्दिषितव्यम्, चाकन्दितव्यम् ;
कन्दनीयम्, [1]कन्दनीयम्, चिकन्दिषणीयम्, चाकन्दनीयम् ;
कन्द्यम्, कन्द्यम्, चिकन्दिष्यम्, चाकन्द्यम् ;
ईषत्कन्दः-दुष्कन्दः-सुकन्दः ; — —
कन्द्यमानः, कन्द्यमानः, चिकन्दिष्यमाणः, चाकन्द्यमानः ;
कन्दः, कन्दः, चिकन्दिषः, चाकन्दः ;
कन्दितुम्, कन्दयितुम्, चिकन्दिषितुम्, चाकन्दितुम् ;
[2]कन्दा, कन्दना, चिकन्दिषा, चिकन्दयिषा, चाकन्दा ;
कन्दनम्, कन्दनम्, चिकन्दिषणम्, चाकन्दनम् ;
कन्दित्वा, कन्दयित्वा, चिकन्दिषित्वा, चाकन्दित्वा ;
सङ्कन्द्य, सङ्कन्द्य, प्रचिकन्दिष्य, प्रचाकन्द्य ;
कन्दम् २, } कन्दम् २, } चिकन्दिषम् २, } चाकन्दम् २ ; }
कन्दित्वा २, } [3]कान्दम् २, } चिकन्दिषित्वा २, } चाकन्दित्वा २. }
} कन्दयित्वा २, }

(165) "कनी दीप्तिकान्तिगतिषु" (I-भ्वादिः-460. सक. सेट्. पर.)

दीप्तिः=प्रकाशः, कान्तिः=शोभा—इति क्षीरस्वामी ।

कानकः-निका, कानकः-निका, चिकनिषकः-षिका, [4]चङ्कनकः-निका ;
कनिता-त्री, कानयिता-त्री, चिकनिषिता-त्री, चङ्कनिता-त्री ;
[A]कनन्-न्ती, कानयन्-न्ती, चिकनिषन्-न्ती ; —
कनिष्यन्-न्ती-ती, कानयिष्यन्-न्ती-ती, चिकनिषिष्यन्-न्ती-ती ;

---

1. 'णेरनिटि' (6-4-51) इति णेर्लोपः ।
2. घटादीनां षित्त्वात् 'षिद्भिदादिभ्यः—' (3-3-104) इति अङ् । 'गुरोश्च—' (3-3-103) इति वा अः प्रत्ययः ।
3. अनुपधात्वेऽपि घटादिषु पाठसामर्थ्यात् 'चिण्णमुलोः—' (6-4-93) इति दीर्घविकल्पः ।
4. 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इति अभ्यासस्य नुक् ।

A. 'ध्वणच्छिशून् धाणसमोणिताशुभान् शोणान् पृथुश्रोणिजनो दुदोह च ।
प्रश्लोणितान् प्रैणनविध्रणत्क्षितीन् अनुल्बणान् धेनुगणान् **कनत्स्तनात्** ॥'
धा. का. 1-59.

— कानयमानः, कानयिष्यमाणः, चङ्कन्यमानः, चङ्कनिष्यमाणः ;

[1]का-कानौ-कानः ; — — —

[2]कान्तः-न्तं-न्तवान्, कानितं-तः, चिकनिषितः, चङ्कनितः-तवान् ;

कनः, कानः, चिकनिषुः, चिकानयिषुः, चङ्कनः ;

कनितव्यम्, कानयितव्यम्, चिकनिषितव्यम्, चङ्कनितव्यम् ;

कननीयम्, काननीयम्, चिकनिषणीयम्, चङ्कननीयम् ;

कान्यम्, [3]कन्या, कान्यम्, चिकनिष्यम्, चङ्कन्यम् ;

ईषत्कनः-दुष्कनः-सुकनः ; — —

कन्यमानः, कान्यमानः, चिकनिष्यमाणः, चङ्कन्यमानः ;

कानः, कानः, चिकनिषः, चङ्कनः ;

कनितुम्, कानयितुम्, चिकनिषितुम्, चङ्कनितुम् ;

कान्तिः, कानना, चिकनिषा, चिकानयिषा, चङ्कना ;

कननम्, काननम्, चिकनिषणम्, चङ्कननम् ;

कनित्वा, कानयित्वा, चिकनिषित्वा, चङ्कनित्वा ;

सङ्कन्य, सङ्कान्य, प्रचिकनिष्य, प्रचङ्कन्य ;

कानम् २, } कानम् २, } चिकनिषम् २, } चङ्कनम् २ ; }
कनित्वा २, } कानयित्वा २, } चिकनिषित्वा २, } चङ्कनित्वा २ ; }

[4]कनकम्.

(166) "कपि चलने" (I-भ्वादिः. 375-अक. सेट्. आत्म.)

कम्पकः-म्पिका, कम्पकः-म्पिका, चिकम्पिषकः-षिका, चाकम्पकः-म्पिका ;

कम्पिता-त्री, कम्पयिता-त्री, चिकम्पिषिता-त्री, चाकम्पिता-त्री ;

— [5]कम्पयन्-न्ती, कम्पयिष्यन्-न्ती-ती ; —

1. 'अनुनासिकस्य—' (6-4-15) इति दीर्घे नलोपे च रूपम्। एवं क्तिन्प्रत्ययेऽपि।
2. ईदित्त्वात् निष्ठायां 'श्वीदित—' (7-2-14) इतीण्णिषेधः। दीर्घः।
3. कनेर्यत्प्रत्यये टापि **कन्या** इति भवति। '**कन्यायाः** कनीन च' (4-1-116) इति निर्देशोऽत्र लिङ्गमिति **माधवधातुवृत्तौ**।
4. 'क्वुन् शिल्पिसंज्ञयोः' (द. उ. 3-5.) इति क्वुन्।
5. 'निगरणचलनार्थेभ्यश्च' (1-3-87) इत्यनेन ण्यन्तात् परस्मैपदमेव।

कम्पमानः, — चिकम्पिषमाणः, चाकम्पयमानः ;

कम्पिष्यमाणः, — चिकम्पिषिष्यमाणः, चाकम्पिष्यमाणः ;

कन्-कम्पौ-कम्पः ; — — —

कम्पितम्-तः-तवान्, }
[1]विकपितम्-तः-तवान्, } कम्पितः-तम्, चिकम्पिषितः-चाकम्पितः-तवान् ;

कम्पः, [2]कम्पनः, [3]कम्प्रः,[A] [4]शिरःकम्पी, चिकम्पिषुः, चिकम्पयिषुः, चाकम्पः ;

कम्पितव्यम्, कम्पयितव्यम्, चिकम्पिषितव्यम्, चाकम्पितव्यम् ;

कम्पनीयम्, कम्पनीयम्, चिकम्पिषणीयम्, चाकम्पनीयम् ;

कम्प्यम्, कम्प्यम्, चिकम्पिष्यम्, चाकम्प्यम् ;

ईषत्कम्पः-दुष्कम्पः-सुकम्पः ; — —

कम्प्यमानः, कम्प्यमानः, चिकम्पिष्यमाणः, चाकम्प्यमानः ;

[B]कम्पः, कम्पः, चिकम्पिषः, चाकम्पः ;

कम्पितुम्, कम्पयितुम्, चिकम्पिषितुम्, चाकम्पितुम् ;

कम्पा, कम्पना, चिकम्पिषा, चिकम्पयिषा, चाकम्पा ;

कम्पनम्, कम्पनम्, चिकम्पिषणम्, चाकम्पनम् ;

कम्पित्वा, कम्पयित्वा, चिकम्पिषित्वा, चाकम्पित्वा ;

विकम्प्य, विकम्प्य, प्रचिकम्पिष्य, प्रचाकम्प्य ;

कम्पम् २ } कम्पम् २ } चिकम्पिषम् २ } चाकम्पम् २ }
कम्पित्वा २ } कम्पयित्वा २ } चिकम्पिषित्वा २ } चाकम्पित्वा २. }

1. 'लंगिकम्प्योरुपतापशरीरविकारयोरुपसंख्यानम्—' (वा. 6-4-24) इति नुमो लोपः। अन्यत्र **विकम्पित** इत्येव। यः शिरः असकृत् कम्पयति रोगवशात्—स **विकपितः**। 'पीडाव्याध्योः **प्रदीपो**क्ता लङ्गिकम्प्योर्नलोपिता। निस्स्वो विलगितो नित्यं, वातात् **विकपिता** तनुः॥' इति **प्र. सर्वस्वे**।
2. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति, 'चलनशब्दार्थादकर्मकाद्युच्' (3-2-148) इति वा युच् ताच्छीलिकः।
3. 'नमिकम्पिस्म्यजस—' (3-2-167) इति ताच्छीलिकः रः वासरूपविधिना भवत्येव। 'ताच्छीलिकेषु वासरूपविधिर्नास्तीति प्रायिकं, तेन **कम्प्रा-कम्पना** इति सिद्धम्' इति **सि. कौमुदी**॥
4. 'सुप्यजातौ णिनिः—(3-2-78) इति णिनिः। अन्तर्भावितण्यर्थोऽयम्।

A. '**अकम्प्रं** मारुतिर्दीप्रं नम्रः प्राविशयत् गुहाम्॥' भ. का. 7-23.
B. '**सकम्प**हेरम्बसमानलम्बनाः समाव्रजन्नम्बितघण्टिकास्तदा।' धा. का. 1-49.

(167) “ कबृ वर्णे ” (I-भ्वादिः-380. अक. सेट्. आत्म.)

वर्णनम्=वर्णः-शुक्लादिः, इति **क्षीरस्वामी** ।

काबकः-बिका, काबकः-बिका, चिकबिषकः-षिका, चाकबकः-बिका ;
कबिता-त्री, काबयिता-त्री, चिकबिषिता-त्री, चाकबिता-त्री ;
— काबयन्-न्ती, काबयिष्यन्-न्ती-ती; —
कबमानः, काबयमानः, चिकबिषमाणः, चाकब्यमानः ;
कबिष्यमाणः, काबयिष्यमाणः, चिकबिषिष्यमाणः, चाकबिष्यमाणः ;
कप्-कब्-कबौ-कबः ; — — —
कबितम्-तः, काबितः-तम्, चिकबिषितः, चाकबितः-तवान् ;
कबः, काबः, चिकबिषुः, चिकाबयिषुः, चाकबः ;
कबितव्यम्, काबयितव्यम्, चिकबिषितव्यम्, चाकबितव्यम् ;
कबनीयम्, काबनीयम्, चिकबिषणीयम्, चाकबनीयम् ;
[1]कब्यम्, काब्यम्, चिकबिष्यम्, चाकब्यम् ;
ईषत्कबः-दुष्कबः-सुकबः ; — —
कबचमानः, काब्यमानः, चिकबिष्यमाणः, चाकब्यमानः ;
काबः, काबः, चिकबिषः, चाकबः ;
कबितुम्, काबयितुम्, चिकबिषितुम्, चाकबितुम् ;
कबिः, काबना, चिकबिषा, चिकाबयिषा, चाकबा ;
कबनम्, काबनम्, चिकबिषणम्, चाकबनम् ;
कबित्वा, काबयित्वा, चिकबिषित्वा, चाकबित्वा ;
प्रकब्य, प्रकाब्य, प्रचिकबिष्य, प्रचाकब्य ;
काबम् २, कबित्वा २, } काबम् २, काबयित्वा २, } चिकबिषम् २, चिकबिषित्वा २, } चाकबम् २ ; चाकबित्वा २; }
[A]कबर[2]:-[3]री, कर्बुरः.

---

1. ‘ पोरदुपधात् ’ (3-1-98.) इति यत् ।
2. कबरः कर्बुरः, इतीमौ औणादिकप्रत्ययान्तौ ।
3. ‘ जानपद—’ (4-1-42.) इत्यादिना केशपाशविषये ङीप् । **कबरी** केशवेशः । अन्यत्र **कबरा** ।

A. ‘ सकम्पहेरम्बसमानलम्बनाः समाव्रजन् अम्बितघण्टिकास्तदा ।
प्रलम्बसास्नाः **कबर**त्विषो वृषाः अक्षीबिताः क्षीबतयाऽतिशीभराः ॥’ धा. का. 1-49.

(168) “ कमु कान्तौ ” (I-भ्वादिः-443. सक. सेट्. आत्म.)

कान्तिः=इच्छा ।

[1]कामकः } [2]कामकः } मिका, कामकः-मिका, [3]चिकामयिषकः-षिका, चिकमिषकः-षिका, } [4]चङ्कामकः-मिका ; चङ्कमकः-मिका ; }
कामयिता-त्री, कमिता-त्री, } कामयिता-त्री, चिकामयिषिता-त्री, चिकमिषिता-त्री, } चङ्कामयिता-त्री ; चङ्कमिता-त्री ; }
— [5]कामयन्-न्ती, कामयिष्यन्-न्ती-ती ; —
[6]कामयमानः, कामयमानः, चिकामयिषमाणः चिकमिषमाणः } चङ्काम्यमानः ; चङ्कम्यमानः ; }
कामयिष्यमाणः, कामयिष्यमाणः, चिकामयिषिष्यमाणः, चिकमिषिष्यमाणः, } चङ्कामयिष्यमाणः ; चङ्कमिष्यमाणः ; }
[7]कान्-कामौ-कामः ; — — —
[8]कामितम्-तः-तवान्, [9]कान्तम्-न्तः-न्तवान्, } कामितम्-तः, चिकामयिषितः, चिकमिषितः, } चङ्कामितः चङ्कमितः } तवान् ;

---

1. ‘ **कमेर्णिङ्** ’ (3-1-30) इति स्वार्थे णिङ् । अमन्तत्वेन मित्त्वं तु न, ‘ न **कम्य**-मिचमाम् ’ (ग. सू. भ्वादौ) इति निषेधात् । अतः, ‘अत उपधायाः ’ (7-2-116) इति वृद्धिः । एवं घञ्यपि ।
2. ‘ आयादय आर्धधातुके वा ’ (3-1-31) इति णिङो वैकल्पिकत्वात् णिङभावपक्षे, ण्वुलि वृद्धौ रूपम् । ‘ नोदात्तोपदेशस्य—’(7-3-4) इति निषेधस्तु न; ‘ अनाचमि-**कमि**वमीनाम् ’ (वा. 7-3-34) इति निषेधात् ।
3. णिङ्पक्षे रूपम् । एवं सन्नन्ते सर्वत्र बोध्यम् ।
4. यङन्तात् ण्वुलि ‘ नुगतोऽनुनासिकान्तस्य ’ (7-4-85) इति अभ्यासे नुक् ।
5. णिजन्तात् ‘ णिचश्च ’ (1-3-74) इत्युभयपदी, न तु णिङन्तात् ।
6. शानचः शित्त्वेन आर्धधातुकत्वाभावात् नित्यं णिङ् । णिङो ङित्वात् ‘ अनुदात्तङित आत्मनेपदम् ’ (1-3-12) इति आत्मनेपदमेव ।
7. णिङन्तात् शुद्धाच्च धातोः क्विपि ‘ अनुनासिकस्य—’ (6-4-15) इति दीर्घः । ‘ मो नो धातोः ’ (8-2-64) इति नत्वम् ।
8. णिङ्पक्षे ‘ णेरनिटि ’ (6-4-51) इति निष्ठायां णिङो लोपः । सूत्रे ‘ **णेः** ’ इत्यनेन णिङोऽपि ग्रहणम् ।
9. णिङभावपक्षे, धातोरुदित्त्वात् क्त्वायाम् इड्विकल्पः । तेन ‘यस्य विभाषा’ (7-2-15) इति निष्ठायामिण्णिषेधे, ‘ अनुनासिकस्य—’ (6-4-15) इति दीर्घे च रूपम् ।

कामः-कमः,[1]प्रकामी, [2]मांसकामः-मांसकामा, [3]हन्तुकामः[A], [B]हरिकामा, [4]कम्रः[C], [5]कमनः, [6]कामुक[D]:-कामुकी-कामुका, कामः, चिकामयिषुः, चिकमिषुः, चङ्कामः-चङ्कमः ;

कामयितव्यम् , कमितव्यम् , कामयितव्यम् , चिकामयिषितव्यम् , चिकमिषितव्यम् , चङ्कामयितव्यम् ; चङ्कमितव्यम् ;

[7]प्रकामनीयम् , प्रकमनीयम् , कामनीयम् , चिकामयिषणीयम् , चिकमिषणीयम् , चङ्कामनीयम् ; चङ्कमनीयम् ;

[8]काम्यम्-[9]कम्यम् , काम्यम् , चिकामयिष्यम् , चिकमिष्यम् , चङ्काम्यम्-चङ्कम्यम् ;

ईषत्कामः-दुष्कामः-सुकामः, ईषत्कमः-दुष्कमः-सुकमः ; —

---

1. ताच्छील्ये णिनिः ।
2. 'शीलि**कामि**भक्ष्याचरिभ्यो णः' (वा. 3-2-1) इति अणपवादः णः । तेन स्त्रियां टाप् ।
3. 'तुं **काम**मनसोरपि ।' (वा. 6-3-109) इति तुमुनो मकारस्य लोपः ।
4. 'नमिकम्पिस्म्यजस**कम**हिंसदीपो रः' (3-2-167) इति ताच्छीलिको रः प्रत्ययः ।
5. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति युच् ताच्छीलिकः । 'ताच्छीलिकेषु 'वाऽसरूपः—' (3-1-94) इति विधिर्नास्तीति प्रायिकम् ; तेन **कम्रा कमना** युवतिः, इति सिद्धम्—' इति **सि. कौमुदी** ।
6. 'लषपतपदस्थाभू**कम**गम—' (3-2-154) इत्यादिना तच्छीलादिषु उकञ् । स्त्रियां, 'जानपद—' (4-1-42) इति विहितः ङीष् '**कामुकी** मैथुनेच्छा चेत् , **कामुका**ऽन्या, ' (वा. 4-1-42) इति वार्तिकेन अर्थविशेषे नियमितः ।
7. 'न भाभूपू**कमि**गमि—' (8-4-34) इति, 'ण्यन्तभादीनामुपसंख्यानम्' (वा. 8-4-34) इति च णत्वनिषेधः ।
8. णिङन्तात्—णिजन्ताच्च 'अचो यत्' (3-1-97) इति यत् ।
9. शुद्धाद्धातोः 'पोरदुपधात्' (3-1-98) इति यत् ।

A. 'इन्द्राबृहस्पत्युपक्लृप्तमन्त्रा उत्साहिनोऽग्नीवरुणौ तथाऽन्ये ।
सुरा भवन्तं बत **हन्तुकामाः** प्रबोधयांचक्रुरधोक्षजं तम् ॥' वा. वि. 2. 33.

B. 'स्तुतिशीला **हरिकामा** फलभक्षा कानने व्रताचारा ।
तदुपग्रहप्रतीक्षा वसति द्वन्द्वक्षमा मुनिश्रेणी ॥' इति **प्र. सर्वस्वे** ।

C. '**कम्रा**भिरावृतः स्त्रीभिराशंसुः क्षेममात्मनः ।
इच्छुः प्रसादं प्रणमन् सुग्रीवः प्रावदन् नृपम् ॥' भ. का. 7-24.

D. 'प्रघिण्य भूषाः परिघुण्य मालिकाः प्रघृग्य घोणापुटघूर्णिचन्दनम् ।
घणाघ्यरूपाः पनिताकृतीन् ययुर्भामिन्य एवाक्षमया स्त्र**कामुकान्** ॥'
भा. का. 1-57.

काम्यमानः, कम्यमानः, काम्यमानः, चिकामयिष्यमाणः, चिकमिष्यमाणः, चङ्काम्यमानः-चङ्कम्यमानः ;

[A]कामः-कामः, कामः, चिकामयिषः, चिकमिषः, चङ्कामः-चङ्कमः ;

कामयितुम्-कमितुम् , कामयितुम् , चिकामयिषितुम् , चिकमिषितुम् , चङ्कामयितुम् ; चङ्कमितुम् ;

कामना-[B]कान्तिः, कामना, चिकामयिषा-चिकमिषा, [1]चङ्कामा-चङ्कमा ;

कामनम् , कमनम् , कामनम् , चिकामयिषणम्-चिकमिषणम् , चङ्कामनम्-चङ्कमनम् ;

कामयित्वा , [2]कमित्वा, कान्त्वा, कामयित्वा, चिकामयिषित्वा चिकमिषित्वा चङ्कामयित्वा-चङ्कमित्वा;

प्रकाम्य-प्रकम्य, प्रकाम्य, प्रचिकामयिष्य-प्रचिकमिष्य, प्रचङ्काम्य-प्रचङ्कम्य ;

[3]कामम् २ कामयित्वा २ कामम् २ कमित्वा २ कान्त्वा २ कामम् २ कामयित्वा २ चिकामयिषम् २, चिकामयिषित्वा २,
चिकमिषम् २, चिकमिषित्वा २, चङ्कामम् २- चङ्कमम् २ ; चङ्कामयित्वा २- चङ्कमित्वा२;

[4]कमठः, [5]कन्तुः, [6]कमलम् , [7]कंसः.

---

1. 'यस्य हलः' (6-4-49) इति यलोपे, अतो लोपे च रूपमेवम् ।
2. णिङभावपक्षे धातोरुदित्त्वात् 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः । इडभावपक्षे दीर्घं रूपम् ।
3. 'न **कम्यमि**—' (ग. सू. भ्वादौ) इति मित्त्वनिषेधात् णिङन्तात् णिजन्ताच्च न दीर्घविकल्पः ।
4. '**कमे**रठः' (द. उ. 5. 5.) इत्यठः प्रत्ययः । **कमठः**=कूर्मः, भिक्षाभाजनं वा ।
5. औणादिके (द. उ. 1-112) कुप्रत्यये तुगागमः । **कन्तुः**=कामी ।
6. औणादिके (द. उ. 8-107) कलप्रत्यये रूपम् । **कमलम्**=पद्मम् ।
7. औणादिके (द. उ. 9-21.) सप्रत्यये रूपम् ।

A. 'यायास्त्वमिति **कामो** मे गन्तुमुत्सहसे न च ।
इच्छुः **कामयितुं** त्वं माम् इत्यसौ जगदे तया ॥' भ. का. 5-59.

B. 'सायन्तनीं तिथिप्रण्यः पङ्कजानां दिवातनीम् ।
कान्तिं कान्त्या सदातन्या ह्रेपयन्ती शुचिस्मिता ॥' भ. का. 5-65.

(169) “कर्ज व्यथने” (I-भ्वादिः-228. सक. सेट्. पर.)

व्यथनम्=भयदुःखम्, चलनं च ।

कर्जकः-र्जिका, कर्जकः-र्जिका, चिकर्जिषकः-षिका, चाकर्जकः-र्जिका ;
कर्जिता-त्री, कर्जयिता-त्री, चिकर्जिषिता-त्री, चाकर्जिता-त्री ;
कर्जन्-न्ती, कर्जयन्-न्ती, चिकर्जिषन्-न्ती ; —
कर्जिष्यन्-न्ती-ती, कर्जयिष्यन्-न्ती-ती, चिकर्जिषिष्यन्-न्ती-ती ;
— कर्जयमानः, कर्जयिष्यमाणः, चाकर्ज्यमानः, चाकर्जिष्यमाणः ;
[1]कर्क्-कर्ग्-कर्जौ-कर्जः ; — — —
[A]कर्जितम्-तः, कर्जितः-तम्, चिकर्जिषितः, चाकर्जितः-तवान् ;
कर्जः, [2]कर्जनः, कर्जः, चिकर्जिषुः, चिकर्जयिषुः, चाकर्जः ;
[3]प्रनिकर्जितव्यम्, कर्जयितव्यम्, चिकर्जिषितव्यम्, चाकर्जितव्यम् ;
कर्जनीयम्, कर्जनीयम्, चिकर्जिषणीयम्, चाकर्जनीयम् ;
[4]कर्ज्यम्, कर्ज्यम्, चिकर्जिष्यम्, चाकर्ज्यम् ;
ईषत्कर्जः-दुष्कर्जः-सुकर्जः ; — —
कर्ज्यमानः, कर्ज्यमानः, चिकर्जिष्यमाणः, चाकर्ज्यमानः ;
कर्जः, कर्जः, चिकर्जिषः, चाकर्जः ;
कर्जितुम्, कर्जयितुम्, चिकर्जिषितुम्, चाकर्जितुम् ;
कर्जा, कर्जना, चिकर्जिषा, चाकर्जा ;
कर्जनम्, कर्जनम्, चिकर्जिषणम्, चाकर्जनम् ;
कर्जित्वा, कर्जयित्वा, चिकर्जिषित्वा, चाकर्जित्वा ;
प्रकर्ज्य, प्रकर्ज्य, सञ्चिकर्जिष्य, सञ्चाकर्ज्य ;
कर्जम् २, कर्जित्वा २, } कर्जम् २, कर्जयित्वा २, } चिकर्जिषम् २, चिकर्जिषित्वा २, } चाकर्जम् २; चाकर्जित्वा २. }

---

1. ‘रात् सस्य’ (8-2-24) इति नियमान्न संयोगान्तलोपः ।
2. ‘चलनशब्दार्थादकर्मकाद्युच्’ (3-2-148) इति ताच्छीलिको युच् ।
3. ‘शेषे विभाषाऽकखादौ—’ (8-4-18) इति पर्युदासात् णत्वं न ।
4. निष्ठायां सेट्त्वात् ‘चजोः कु—’ (7-3-52) इति कुत्वं न ।

A. ‘अकर्जितोऽसौ हरिखर्जनोत्कधीः अजत्पशुव्रातमजेन तेजितम् ।
लसत्खजाकं व्रजमासदत् क्रमात् अखञ्जितै रेजितचामरैर्हयैः ॥’ धा. का. 1-31.

(170) “कर्ण भेदने” (X-चुरादिः-1924. सक. सेट्. उभ.) अदन्तः ।

‘छिद्र कर्णभेदने’ (X-1924) इत्यत्र ‘कर्ण’ इति पृथग्धात्वन्तरं इति पक्षे रूपाणि विलिख्यन्ते ।

कर्णकः-र्णिका, चिकर्णयिषकः-षिका ;[1]
कर्णयिता-त्री, चिकर्णयिषिता-त्री ;
कर्णयन्-न्ती, चिकर्णयिषन्-न्ती ;
कर्णयिष्यन्-न्ती-ती, चिकर्णयिषिष्यन्-न्ती-ती ;
कर्णयमानः, चिकर्णयिषमाणः ;
कर्णयिष्यमाणः, चिकर्णयिषिष्यमाणः ;
कर्ण्-कर्णौ-कर्णः ; —
कर्णितम्-तः, चिकर्णयिषितः-तवान् ;
कर्णः, चिकर्णयिषुः ;
कर्णयितव्यम्, चिकर्णयिषितव्यम् ;
कर्णनीयम्, चिकर्णयिषणीयम् ;
कर्ण्यम्, चिकर्णयिष्यम् ;
ईषत्कर्णः-दुष्कर्णः-सुकर्णः ; —
कर्ण्यमानः, चिकर्णयिष्यमाणः ;
कर्णः, चिकर्णयिषः ;
कर्णयितुम्, चिकर्णयिषितुम् ;
कर्णना, चिकर्णयिषा ;
कर्णनम्, चिकर्णयिषणम् ;
कर्णयित्वा, चिकर्णयिषित्वा ;
प्रकर्ण्य, प्रचिकर्णयिष्य ;
कर्णम् २, कर्णयित्वा २, } चिकर्णयिषम् २ ; चिकर्णयिषित्वा २. }

(171) “कर्त शैथिल्ये” (X-चुरादिः-1915. सक. सेट्. उभ.) अदन्तः ।

‘कर्ण भेदने’ (170) इति धातुवद्रूपाणि सर्वाणि ज्ञेयानि ।

---

1. अदन्तत्वेनानेकाच्त्वात् यङ् न ।

(172) “ कर्द कुत्सिते शब्दे ” (I-भ्वादिः-59. अक. सेट्. पर.)

कुत्सितशब्दः=कौक्षरवः ।

‘ कर्ज व्यथने ’ (169) इति भौवादिकधातुवत् सर्वाणि रूपाणि ज्ञेयानि ।

(173) “ कर्ब गतौ ” (I-भ्वादिः-420. सक. सेट्. पर.)

कर्बकः-र्बिका, कर्बकः-र्बिका, चिकर्बिषकः-षिका, चाकर्बकः-र्बिका ;
कर्बिता-त्री, कर्बयिता-त्री, चिकर्बिषिता-त्री, चाकर्बिता-त्री ;
कर्बन्-न्ती, कर्बयन्-न्ती, चिकर्बिषन्-न्ती ; —
— कर्बयमाणः, कर्बयिष्यमाणः, चाकर्ब्यमाणः, चाकर्बिष्यमाणः;
[1]कर्प्-कर्ब्-कर्बौ-कर्बः ; — — —
कर्बितम्-तः, कर्बितः-तम्, चिकर्बिषितः, चाकर्बितः-तवान् ;
कर्बः, कर्बः, चिकर्बिषुः, चिकर्बयिषुः, चाकर्बः ;
कर्बितव्यम्, कर्बयितव्यम्, चिकर्बिषितव्यम्, चाकर्बितव्यम् ;
[2]कर्बणीयम्, कर्बणीयम्, चिकर्बिषणीयम्, चाकर्बणीयम् ;
कर्ब्यम्, कर्ब्यम्, चिकर्बिष्यम्, चाकर्ब्यम् ;
ईषत्कर्बः-दुष्कर्बः-सुकर्बः ; — —
कर्ब्यमाणः, कर्ब्यमाणः, चिकर्बिष्यमाणः, चाकर्ब्यमाणः ;
कर्बः, कर्बः, चिकर्बिषः, चाकर्बः ;
कर्बितुम्, कर्बयितुम्, चिकर्बिषितुम्, चाकर्बितुम् ;
कर्बा, कर्बणा, चिकर्बिषा, चाकर्बा ;
कर्बणम्, कर्बणम्, चिकर्बिषणम्, चाकर्बणम् ;
कर्बित्वा, कर्बयित्वा, चिकर्बिषित्वा, चाकर्बित्वा ;
[A]प्रकर्ब्य, प्रकर्ब्य, संचिकर्बिष्य, प्रचाकर्ब्य ;
कर्बम् २, } कर्बम् २, } चिकर्बिषम् २, } चाकर्बम् २ ; }
कर्बित्वा २, } कर्बयित्वा २, } चिकर्बिषित्वा २, } चाकर्बित्वा २. }

---

1. ‘ वाऽवसाने ’ (8-4-56) इति चर्त्वविकल्पः ।
2. ‘ अट्कुप्वाङ्नुम्——’(8-4-2) इति णत्वम् ।

A. ‘ हयैस्खुरम्फैः द्रुतमर्बतो रवेः पर्बद्भिरालर्ब्यत रक्तिमा करैः ।
प्रबर्ब्य शैलानुपमर्ब्य पद्मिनीं **प्रकर्ब्य** चाशाः श्रमशोणितैरिव ॥’ धा. का. 1-54.

(173-A) “ कर्व दर्पे ” (I-भ्वादिः-581. अक. सेट्. पर.)

कर्वकः-र्विका, कर्वकः-र्विका, चिकर्विषकः-षिका, चाकर्वकः-र्विका ;
कर्विता-त्री, कर्वयिता-त्री, चिकर्विषिता-त्री, चाकर्विता-त्री ;
[A]कर्वन्-न्ती, कर्वयन्-न्ती, चिकर्विषन्-न्ती ; —
कर्विष्यन्-न्ती-ती, कर्वयिष्यन्-न्ती-ती, चिकर्विषिष्यन्-न्ती-ती ; —
[1]व्यतिकर्वमाणः, कर्वयमाणः, — चाकर्व्यमाणः ;
व्यतिकर्विष्यमाणः, कर्वयिष्यमाणः, — चाकर्विष्यमाणः ;
[2]प्रकः-प्रकरौ-प्रकरः ; — — —
कर्वितम्-तः, कर्वितः-तम्, चिकर्विषितः, चाकर्वितः-तवान् ;
कर्वः, कर्वः, चिकर्विषुः, चिकर्वयिषुः, चाकर्वः ;
कर्वितव्यम्, कर्वयितव्यम्, चिकर्विषितव्यम्, चाकर्वितव्यम् ;
कर्वणीयम्, कर्वणीयम्, चिकर्विषणीयम्, चाकर्वणीयम् ;
कर्व्यम्, कर्व्यम्, चिकर्विष्यम्, चाकर्व्यम् ;
ईषत्कर्वः-दुष्कर्वः-सुकर्वः ; — —
कर्व्यमाणः, कर्व्यमाणः, चिकर्विष्यमाणः, चाकर्व्यमाणः ;
कर्वः, कर्वः, चिकर्विषः, चाकर्वः ;
कर्वितुम्, कर्वयितुम्, चिकर्विषितुम्, चाकर्वितुम्;
[3]कर्वा, कर्वणा, चिकर्विषा, चिकर्वयिषा, चाकर्वा ;
कर्वणम्, कर्वणम्, चिकर्विषणम्, चाकर्वणम् ;
कर्वित्वा, कर्वयित्वा, चिकर्विषित्वा, चाकर्वित्वा ;
सङ्कर्व्य, संकर्व्य, सञ्चिकर्विष्य, सञ्चाकर्व्य ;
कर्वम् २, } कर्वम् २, } चिकर्विषम् २, } चाकर्वम् २ ; }
कर्वित्वा २, } कर्वयित्वा २, } चिकर्विषित्वा २, } चाकर्वित्वा २. }

---

1. ‘ कर्तरि कर्मव्यतीहारे ’ (1-3-14) इति शानच् ।
2. ‘ राल्लोपः ’ (6-4-21) इति वकारस्य लोपः । रुत्वविसर्गौ । रेफान्तोऽयं शब्दः ।
3. ‘ गुरोश्च हलः ’ (3-3-103) इति अः प्रत्ययः ।

A. ‘ अफर्विताकाङ्क्षितमर्वकं सतां मांसादिसञ्चर्वकदुष्टभर्वकम् ।
कर्वद्वधूकेलिरसेन खर्वितं गर्वाविकं शर्वपरेण सर्वताम् ॥ ’ धा. का. 1-74.

(174) "कल शब्दसंख्यानयोः" (I-भ्वादिः-497. सक. सेट्. आत्म.)

'कलेः कालयति क्षेपे, गतिसंख्यानयोर्द्वयोः ।
कलयेत्, शब्दसंख्यानविषये कलते शपि ॥' (श्लो-155) इति देवः ।

कालकः-लिका,	कालकः-लिका,	चिकलिषकः-षिका,	चाकलकः-लिका ;
कलिता-त्री,	कालयिता-त्री,	चिकलिषिता-त्री,	चाकलिता-त्री ;
—	कालयन्-न्ती,	कालयिष्यन्-न्ती-ती ;	—
कलमानः,	कालयमानः,	चिकलिषमाणः,	चाकल्यमानः ;
कलिष्यमाणः,	कालयिष्यमाणः,	चिकलिषिष्यमाणः,	चाकलिष्यमाणः ;
कल्-कलौ-कलः ;	—	—	—
कलितम्-तः,	कालितः-तम् ,	चिकलिषितः,	चाकलितः-तवान् ;

[A]कलः, विकलः, सकलः, [1]कलनः, कालः, चिकलिषुः, चिकालयिषुः, चाकलः ;

कलितव्यम् ,	कालयितव्यम् ,	चिकलिषितव्यम् ,	चाकलितव्यम् ;
[2]प्रनिकलनीयम् ,	प्रनिकालनीयम् ,	चिकलिषणीयम् ,	चाकलनीयम् ;
काल्यम् ,	काल्यम् ,	चिकलिष्यम् ,	चाकल्यम् ;
ईषत्कलः-दुष्कलः-सुकलः ;		—	—
कल्यमानः,	काल्यमानः,	चिकलिष्यमाणः,	चाकल्यमानः ;
[3]कालः-काली,	कालः,	चिकलिषः,	चाकलः ;
कलितुम् ,	कालयितुम् ,	चिकलिषितुम् ,	चाकलितुम् ;
कलिः, [4]कला,	कालना,	चिकलिषा, चिकालयिषा,	चाकला ;
कलनम् ,	कालनम् ,	चिकलिषणम् ,	चाकलनम् ;
कलित्वा,	कालयित्वा,	चिकलिषित्वा,	चाकलित्वा ;

---

1. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति युच् ताच्छीलिकः ।
2. 'शेषे विभाषा—' (8-4-18) इति णत्वनिषेधः ।
3. 'अकर्तरि च कारके संज्ञायाम्' (3-3-19) इति घञ् । स्त्रियां 'जानपद—' (4-1-42) इत्यादिना ङीष् वर्णे विवक्षिते, **काली** । अन्यत्र **काला** ।
4. बाहुलकात् अङ् ।

A. 'मामल्यमानं स्मितमल्लिकावलीमाभाल्यदैत्याधिपभल्लनोद्धुरम् ।
कलोरुकल्लोलकलिन्दजाजले बालैस्तयूगिस्सह देवनोत्सुकम् ॥' धा-का. 1-64.

संकल्य,	प्रकाल्य,	प्रचिकलिष्य,	प्रचाकल्य ;
कालम् २, कलित्वा २,	कालम् २, कालयित्वा २,	चिकलिषम् २, चिकलिषित्वा २,	चाकलम् २ ; चाकलित्वा २.

(175) "कल क्षेपे" (X-चुरादिः-1604. सक. सेट्. उभ.)

'कलेः कालयति क्षेपे, गतिसंख्यानयोर्द्वयोः ।
कलयेत्, शब्दसंख्यानविषये कलने शपि ॥' (श्लो-155) इति देवः ।

कालकः-लिका,	[1]चिकालयिषकः-षिका ;
कालयिता-त्री,	चिकालयिषिता-त्री ;
कालयन्-न्ती,	चिकालयिषन्-न्ती ;
कालयिष्यन्-न्ती-ती,	चिकालयिषिष्यन्-न्ती-ती ;
कालयमानः,	चिकालयिषमाणः ;
कालयिष्यमाणः,	चिकालयिषिष्यमाणः ;
काल्-कालौ-कालः ;	—
कालितम्-तः,	चिकालयिषितः-तवान् ;
कालः,	चिकालयिषुः ;
कालयितव्यम् ,	चिकालयिषितव्यम् ;
कालनीयम् ,	चिकालयिषणीयम् ;
[A]काल्यम् ,	चिकालयिष्यम् ;
ईषत्कालः-दुष्कालः-सुकालः ;	—
काल्यमानः,	चिकालयिष्यमाणः ;
कालः,	चिकालयिषः ;
कालयितुम् ,	चिकालयिषितुम् ;
कालना,	चिकालयिषा ;
कालनम् ,	चिकालयिषणम् ;
कालयित्वा,	चिकालयिषित्वा ;

---

1. अनेकाच्त्वात् यङ् न ।

A. '**कालय**न्नवेलनकरोऽयमवेलयद् द्रागन्यांश्च तेलितकृपः खलु कंसचाल्यान् । सम्पालयेद् विमतलूल्यपशुल्बभूमा क्ष्मामेष राम इव शूर्पनखाविचोटी ॥' धा. का. 3.22.

प्रकाल्य, प्रचिकालयिष्य ;

कालम् २, } चिकालयिषम् २ ; }
कालयित्वा २, } चिकालयिषित्वा २. }

(176) "कल गतौ संख्याने च"

(X-चुरादिः-1866. सक. सेट्. उभ. अदन्तः।

'कलेः कालयति क्षेपे, गतिसंख्यानयोर्द्वयोः।
कलयेत्, शब्दसंख्यानविषये कलते शपि॥' (श्लो. 155) इति **देवः**।

[1]कलकः-लिका, [1]चिकलयिषकः-षिका ;
कलयिता-त्री, चिकलयिषिता-त्री ;
कलयन्-न्ती, चिकलयिषन्-न्ती ;
कलयिष्यन्-न्ती-ती, चिकलयिषिष्यन्-न्ती-ती ;
कलयमानः, चिकलयिषमाणः ;
कलयिष्यमाणः, चिकलयिषिष्यमाणः ;
कल्-कलौ-कलः ; —
कलितम्-तः, चिकलयिषितः-तवान् ;
कलः, चिकलयिषुः ;
कलयितव्यम्, चिकलयिषितव्यम् ;
कलनीयम्, चिकलयिषणीयम् ;
ईषत्कलः-दुष्कलः-सुकलः ; —
कल्यम्, चिकलयिष्यम् ;
कल्यमानः, चिकलयिष्यमाणः ;
कलः, चिकलयिषः ;
कलयितुम्, चिकलयिषितुम् ;
कलना, चिकलयिषा ;
सङ्कलनम्, चिकलयिषणम् ;

1. अत्र सर्वत्र अल्लोपस्य स्थानिवत्वात् उपधावृद्धिर्न।

कलयित्वा, चिकलयिषित्वा ;
[1]सङ्कलय्य, प्रचिकलयिष्य ;

कलम् २, } चिकलयिषम् २ ; }
कलयित्वा २, } चिकलयिषित्वा २. }

(177) "कल्ल अव्यक्ते शब्दे" (I-भ्वादिः-498. अक. सेट्.आत्म.)

'कत्थ श्लाघायाम्' (160) इति भौवादिकधातुवत् सर्वाणि रूपाणि ज्ञेयानि। 'कल्ल अशब्दे' इति धातुममुं **क्षीरस्वाम्यादयः** पठन्ति। '**अशब्दः**=तूष्णीम्भावः' इति च विवृण्वन्ति।

(178) "कश गतिशासनयोः" (II-अदादिः-1024. अक. सेट्. आत्म.)

'कसि' 'कस' इत्यनयोः पाठान्तरम्।

काशकः-शिका, काशकः-शिका, चिकशिषकः-षिका, [2]चाकशकः-शिका ;
कशिता-त्री, काशयिता-त्री, चिकशिषिता-त्री, चाकशिता-त्री ;
— काशयन्-न्ती, काशयिष्यन्-न्ती-ती ; —
[3]कशानः, काशयमानः, चिकशिषमाणः, चाकश्यमानः ;
कशिष्यमाणः, काशयिष्यमाणः, चिकशिषिष्यमाणः, चाकशिष्यमाणः ;
[4]कट्-कड्-कशौ-कशः ; — —
कशितम्-तः, काशितः-तम्, चिकशिषितः, चाकशितः-तवान् ;
कशः, [5]कशा, प्रतिष्कशः,[6] काशः, चिकशिषुः, चिकाशयिषुः, चाकशः ;
कशितव्यम्, काशयितव्यम्, चिकशिषितव्यम्, चाकशितव्यम् ;
[A]कशनीयम्, प्रनिकाशनीयम्, चिकशिषणीयम्, चाकशनीयम् ;
काश्यम्, काश्यम्, चिकशिष्यम्, चाकश्यम् ;

1. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः।
2. 'दीर्घोऽकितः' (7-4-83) इति अभ्यासे दीर्घः।
3. 'अदिप्रभृतिभ्यः शपः' (2-4-72) इति शपो लुक्।
4. 'व्रश्चभ्रस्ज—' (8-2-36) इति षत्वम्। जश्त्वम्।
5. पचाद्यचि टाप्।
6. '**प्रतिष्कशश्च कशेः**' (6-1-152) इति पचाद्यचि सुट्। षत्वं च। वार्तापुरुषः सहायः पुरोयायी वा **प्रतिष्कश** इत्युच्यते। 'ग्राममद्य प्रवेक्ष्यामि भव मे त्वं **प्रतिष्कशः**।' इति **काशिका**।

A. 'स्वीयैश्वकंसे **कशनीय**कासी रमोष्ठर्निसी नतचितनिञ्जी॥' धा. का. 2-45.

ईषत्कशः- दुष्कशः- सुकशः ; — —

कश्यमानः, काश्यमानः, चिकशिष्यमाणः, चाकश्यमानः ;

काशः, काशः, चिकशिषः, चाकशः ;

कशितुम्, काशयितुम्, चिकशिषितुम्, चाकशितुम् ;

कष्टिः, काशना, चिकशिषा, चिकाशयिषा, चाकशा ;

कशनम्, काशनम्, चिकशिषणम्, चाकशनम् ;

कशित्वा, काशयित्वा, चिकशिषित्वा, चाकशित्वा ;

प्रकश्य, प्रकाश्य, प्रचिकशिष्य, प्रचाकश्य ;

काशम् २, कशित्वा २, } काशम् २, काशयित्वा २, } चिकशिषम् २, चिकशिषित्वा२, } चाकशम् २; चाकशित्वा २. }

(179) "कष हिंसायाम्" (I-भ्वादिः-686. सक. सेट्. पर.)

काषकः-षिका, काषकः-षिका, चिकषिषकः-षिका, चाकषकः-षिका ;

कषिता-त्री, काषयिता-त्री, चिकषिषिता-त्री, चाकषिता-त्री ;

कषन्-न्ती, काषयन्-न्ती, चिकषिषन्-न्ती ; —

कषिष्यन्-न्ती-ती, काषयिष्यन्-न्ती-ती, चिकषिषिष्यन्-न्ती-ती ;

काषयमाणः, काषयिष्यमाणः, चाकष्यमाणः, चाकषिष्यमाणः;

कट्-कड्-कषौ-कषः ; — — —

[1]कष्टम्[A]-ष्टः-ष्टवान्, कषितम्-तः-तवान् } काषितः-तम्, चिकषिषितः, चाकषितः-तवान् ;

कषः, [B]सत्कषः, [2]सर्वङ्कषः, कूलङ्कषः, कूलङ्कषा [नदी,] [C]अभ्रङ्कषो [वायुः,] करीषङ्कषा [वात्या], [3]पत्काषी, [4]विकाषी, काषः, चिकषिषुः, चिकाषयिषुः, चाकषः;

---

1. 'कृच्छ्रगहनयोः **कषः**' (7-2-22) इति असह्ये दुष्प्रापे च अर्थविशेषे निष्ठायामनिट्। अन्यत्र '**कषित**' इति।
2. 'सर्वकूलाभ्रकरीषेषु **कषः**' (3-2-42) इति खच्। 'अरुर्द्विषदजन्तस्य–' (6-3-67) इति मुम्।
3. 'सुप्यजातौ–' (3-2-78) इति णिनिः। '**हिमकाषि**–' (6-3-54) इति पद्भावः।
4. '**वौ कषलस**–' (3-2-143) इति घिनुण् ताच्छीलिकः।

A. '**कष्टं** विनर्दतः क्रूरान् शस्त्रघुष्टकरान् कपिः ॥' भ.का. 9-18.

B. 'सुकर्मणः क्ष्माविबुधान् हविर्दुघाः तथाऽर्जुनीः गाः स्म निहन्ति **सत्कषम्**।' वा. वि. 3. 46.

C. '**सर्वङ्कष**यशश्शाखं रामकल्पतरुं कपिः।
आदाया**भ्रङ्कषं** प्रायान्मलयं फलशालिनम् ॥' भ. का. 6-103.

कषितव्यम्, काषयितव्यम्, चिकषिषितव्यम्, चाकषितव्यम् ;

कषणीयम्, काषणीयम्, चिकषिषणीयम्, चाकषणीयम् ;

काष्यम्, काष्यम्, चिकषिष्यम्, चाकष्यम् ;

ईषत्कषः-दुष्कषः-सुकषः ; — —

कष्यमाणः, काष्यमाणः, चिकषिष्यमाणः, चाकष्यमाणः ;

काषः, [1]निकषः, आकषः, काषः, चिकषिषः, चाकषः ;

कषितुम्, काषयितुम्, चिकषिषितुम्, चाकषितुम् ;

कष्टिः, काषणा, चिकषिषा, चिकाषयिषा, चाकषा ;

कषणम्, काषणम्, चिकषिषणम्, चाकषणम् ;

कषित्वा, काषयित्वा, चिकषिषित्वा, चाकषित्वा ;

प्रकष्य, प्रकाष्य, प्रचिकषिष्य, प्रचाकष्य ;

काषम् २, कषित्वा २, [2]निमूलकाषं [कषति] [A]समूलकाषं [कषति] } काषम् २, काषयित्वा २, } चिकषिषम् २, चिकषिषित्वा२, } चाकषम् २; चाकषित्वा २. }

(180) "कस गतौ" (I-भ्वादिः-860.सक.सेट्.पर. ज्वलादिः।)

'गतिशासनयोः कस्ते कसतीति गतौ शपि।' (श्लो. 192) इति **देवः**।

[3]कासकः-सिका, कासकः-सिका, चिकसिषकः-षिका, [4]चनीकसकः-सिका ;

कसिता-त्री, कासयिता-त्री, चिकसिषिता-त्री, चनीकसिता-त्री ;

कसन्-न्ती, कासयन्-न्ती, चिकसिषन्-न्ती ; —

कसिष्यन्-न्ती-ती, कासयिष्यन्-न्ती-ती, चिकसिषिष्यन्-न्ती-ती ;

कासयमानः, कासयिष्यमाणः, चनीकस्यमानः, चनीकसिष्यमाणः ;

[5]कः-कसौ-कसः ; — — —

---

1. 'गोचरसंचर–' (3-3-119) इति सूत्रे अनुक्तसमुच्चयार्थकचकारात् अन्यत्रापि संज्ञायां अधिकरणे घः।
2. 'निमूलसमूलयोः **कषः**' (3-4-34) इति णमुल्। उपपदसमासः। '**कषादिषु** यथाविध्यनुप्रयोगः' (3-4-46) इति णमुलन्तात् परत्र पूर्वप्रयुक्तधातोरेवानुप्रयोगः।
3. 'अत उपधायाः' (7-2-116) इति वृद्धिः।
4. 'नीग्वञ्चुस्रंसुध्वंसुभ्रंसु**कस**पतपदस्कन्दाम्' (7-4-84) इत्यभ्यासस्य नीक्।
5. 'ससजुषो रुः' (8-2-66) इति रुत्वम्। विसर्गः।

A. '**समूलकाषं चकषू** रुदन्तः रामान्तिकं बृंहितमन्युवेगाः।' भ. का. 3-49.

कसितम्-तः, कासितः-तम्, चिकसिषितः, चनीकसितः-तवान् ;
कसः, [1]कासः, [2]कस्वरः, [A]कशनीयकासी, कासः, चिकसिषुः,
चिकासयिषुः, चनीकसः ;
कसितव्यम्, कासयितव्यम्, चिकसिषितव्यम्, चनीकसितव्यम् ;
कसनीयम्, कासनीयम्, चिकसिषणीयम्, चनीकसनीयम् ;
कास्यम्, कास्यम्, चिकसिष्यम्, चनीकस्यम् ;
ईषत्कसः-दुष्कसः-सुकसः, — —
कस्यमानः, कास्यमानः, चिकसिष्यमाणः, चनीकस्यमानः ;
कासः, [B]विकासः, कासः, चिकसिषः, चनीकसः ;
कसितुम्, कासयितुम्, चिकसिषितुम्, चनीकसितुम् ;
कस्तिः, कासना, चिकसिषा, चिकासयिषा, चनीकसा ;
कसनम्, कासनम्, चिकसिषणम्, चनीकसनम् ;
कसित्वा, कासयित्वा, चिकसिषित्वा, चनीकसित्वा ;
विकस्य, विकास्य, विचिकसिष्य, विचनीकस्य ;
कासम् २, कसित्वा २, } कासम् २, कासयित्वा २, } चिकसिषम् २, चिकसिषित्वा २, } चनीकसम् २ ; चनीकसित्वा २. }

(181) **"कस गतिशासनयोः"** (II-अदादिः-1024. सक. सेट्. आत्म.)

'कसि' इति उपरि विलेख्यमानस्य पाठान्तरोऽयम्। भौवादिक**कस**-धातुवत् (180) सर्वाणि रूपाणि ज्ञेयानि। शानचि परम्—कसानः, कसिष्यमाणः, कासयमानः, कासयिष्यमाणः, चिकसिषमाणः, चिकसिषिष्यमाणः, चनीकस्यमानः, चनीकसिष्यमाणः, इति रूपाणीति विशेषः।

(182) **"कसि गतिशासनयोः"** (II-अदादिः-1024. सक. सेट्. आत्म.)

'गतिशासनयोः कंस्ते, कसतीति गतौ शपि।' (श्लो-192) इति **देवः**।
कंसकः-सिका, कंसकः-सिका, चिकंसिषकः-षिका, चाकंसकः-सिका ;

1. 'ज्वलितिक**सन्तेभ्यो** णः' (3-1-140) इति वा णः। पक्षे पचाद्यच्।
2. 'स्थेशभासपिस**कसो** वरच्' (3-2-175) इति वरच् ताच्छीलिकः।
A. 'स्वीयैश्वकंसे **कशनीयकासी** स्मोष्ठनिंसी नतचित्तनिञ्जी ॥' धा. का. 2-45.
B. 'क्रोशैर्जनाः कोचगलान् मरालान् बोधन्ति यत्राम्बुरुहां **विकासे** ॥' धा. का. 2.24.

कंसिता-त्री, कंसयिता त्री, चिकंसिषिता-त्री, चाकंसिता-त्री ;
— कंसयन्-न्ती, कंसयिष्यन्-न्ती-ती ; —
[1]कंसानः, कंसयमानः, चिकंसिषमाणः, चाकंस्यमानः ;
कंसिष्यमाणः, कंसयिष्यमाणः, चिकंसिषिष्यमाणः, चाकंसिष्यमाणः ;
[2]कन्-कंसौ-कंसः — — —
कंसितम्-तः, कंसितः-तम्, चिकंसिषितः, चाकंसितः-तवान् ;
[[3]कंसः] कंसः, चिकंसिषुः, चिकंसयिषुः, चाकंसः ;
कंसितव्यम्, कंसयितव्यम्, चिकंसिषितव्यम्, चाकंसितव्यम् ;
कंसनीयम्, कंसनीयम्, चिकंसिषणीयम्, चाकंसनीयम् ;
कंस्यम्, कंस्यम्, चिकंसिष्यम्, चाकंस्यम् ;
ईषत्कंसः-दुष्कंसः-सुकंसः ; — —
कंस्यमानः, कंस्यमानः, चिकंसिष्यमाणः, चाकंस्यमानः ;
[4]कंसः, कंसः, चिकंसिषः, चाकंसः ;
कंसितुम्, कंसयितुम्, चिकंसिषितुम्, चाकंसितुम् ;
कंसा, कंसना, चिकंसिषा, चिकंसयिषा, चाकंसा ;
कंसनम्, कंसनम्, चिकंसिषणम्, चाकंसनम् ;
कंसित्वा, कंसयित्वा, चिकंसिषित्वा, चाकंसित्वा ;
प्रकंस्य, संकंस्य, प्रचिकंसिष्य, प्रचाकंस्य ;
कंसम् २, कंसित्वा २, } कंसम् २, कंसयित्वा २, } चिकंसिषम् २, चिकंसिषित्वा २, } चाकंसम् २ ; चाकंसित्वा २. }

(183) **"काक्षि काङ्क्षायाम्"** (I-भ्वादिः-667. सक. सेट्. पर.)

काङ्क्षकः-क्षिका, कांक्षकः-क्षिका, चिकांक्षिषकः-षिका, चाकाङ्क्षकः-क्षिका ;
कांक्षिता-त्री, काङ्क्षयिता-त्री, चिकाङ्क्षिषिता-त्री, चाकाङ्क्षिता-त्री ;

1. 'इदितो नुम् धातोः' (7-1-58.) इति नुम्। 'अदिप्रभृतिभ्यः शपः' (2-4-72) इति शपो लुक्।
2. 'संयोगान्तस्य लोपः' (8-2-23) इति सकारलोपः।
3. 'अतः कृकमि**कंस**—' (8-3-46) इति सूत्रे '**कमेः** सः **कंसः**, न तु **कंसेः** इति **भाष्यात्**–अस्यानभिधानं कल्प्यते।
4. 'पुंसि संज्ञायां घः प्रायेण' (3-3-118) इति घः। **कंसे**रच्प्रत्ययो न, अनभिधानात् इति 'प्रत्ययस्य लुक्श्लुलुपः' (1-1-61) इत्यत्र **भाष्यात्**।

काङ्क्षन्-न्ती, काङ्क्षयन्-न्ती, चिकाङ्क्षिषन्-न्ती ; —
काङ्क्षिष्यन्-न्ती-ती, काङ्क्षयिष्यन्-न्ती-ती, चिकाङ्क्षिषिष्यन्-न्ती-ती ;
[1]काङ्क्षमाणः, काङ्क्षयमाणः, — चाकाङ्क्ष्यमाणः ;
— काङ्क्षयिष्यमाणः, — चाकाङ्क्षिष्यमाणः ;
[2]कान्-काङ्क्षौ-काङ्क्षः ; — —
काङ्क्षितम्-[A]तः-तवान्, काङ्क्षितः-तम्, चिकाङ्क्षिषितः, चाकाङ्क्षितः-तवान् ;
काङ्क्षः, [3]आकाङ्क्षी, [B]वधकाङ्क्षी, काङ्क्षः, चिकाङ्क्षिषुः, चिकाङ्क्षयिषुः, चाकाङ्क्षः ;
काङ्क्षितव्यम्, काङ्क्षयितव्यम्, चिकाङ्क्षिषितव्यम् ; चाकाङ्क्षितव्यम् ;
काङ्क्षणीयम्, काङ्क्षणीयम्, चिकाङ्क्षिषणीयम्, चाकाङ्क्षणीयम् ;
काङ्क्ष्यम्, काङ्क्ष्यम्, चिकाङ्क्षिष्यम्, चाकाङ्क्ष्यम् ;
ईषत्काङ्क्षः-दुष्काङ्क्षः-सुकाङ्क्षः ; — —
काङ्क्ष्यमाणः, काङ्क्ष्यमाणः, चिकाङ्क्षिष्यमाणः, चाकाङ्क्ष्यमाणः ;
काङ्क्षः, काङ्क्षः, चिकाङ्क्षिषः, चाकाङ्क्षः ;
काङ्क्षितुम्, काङ्क्षयितुम्, चिकाङ्क्षिषितुम्, चाकाङ्क्षितुम् ;
अभिकाङ्क्षा, आकाङ्क्षा, काङ्क्षणा, चिकाङ्क्षिषा, चिकाङ्क्षयिषा, चाकाङ्क्षा ;
काङ्क्षणम्, काङ्क्षणम्, चिकाङ्क्षिषणम्, चाकाङ्क्षणम् ;
काङ्क्षित्वा, काङ्क्षयित्वा, चिकाङ्क्षिषित्वा, चाकाङ्क्षित्वा ;
अभिकाङ्क्ष्य, अभिकाङ्क्ष्य, प्रचिकाङ्क्षिष्य, प्रचाकाङ्क्ष्य ;
काङ्क्षम् २, काङ्क्षित्वा २, } काङ्क्षम् २, काङ्क्षयित्वा २, } चिकाङ्क्षिषम् २, चिकाङ्क्षिषित्वा २, } चाकाङ्क्षम् २; चाकाङ्क्षित्वा २. }

---

1. 'ताच्छील्यवयोवचनशक्तिषु चानश्' (3-2-129) इति ताच्छील्ये चानश्।
2. 'स्कोः संयोगाद्योः–' (8-2-29) इति कलोपः । 'संयोगान्तस्य–' (8-2-23) इति षकारस्य लोपः ।
3. 'सुप्यजातौ–' (3-2-78) इति णिनिः ।

A. 'सूर्य्य त्वदीक्षा चिरकाङ्क्षिता नः वाङ्क्षाम्यमाङ्क्ष्यान् न तु नीचलोकान् ।' धा. का. 1-85.

B. 'कुर्वन्तो हवमाप्तानां पिपासावधकाङ्क्षिणः ।
द्वारं तमोघनप्रख्यं गुहायाः प्राविशन् द्रुतम् ॥' भ. का. 7-61.

(184) "काचि दीप्तिबन्धनयोः" (I-भ्वादिः-170. सक. सेट्. आत्म.)

काञ्चकः-ञ्चिका, काञ्चकः-ञ्चिका, चिकाञ्चिषकः-षिका, चाकाञ्चकः-ञ्चिका ;
काञ्चिता-त्री, काञ्चयिता-त्री, चिकाञ्चिषिता-त्री, चाकाञ्चिता-त्री ;
— काञ्चयन्-न्ती, काञ्चयिष्यन्-न्ती-ती ; —
काञ्चमानः, काञ्चयमानः, चिकाञ्चिषमाणः, चाकाञ्चयमानः ;
काञ्चिष्यमाणः, काञ्चयिष्यमाणः, चिकाञ्चिषिष्यमाणः, चाकाञ्चिष्यमाणः ;
कान्-काञ्चौ-काञ्चः ; — — —
काञ्चितम्-तः, काञ्चितः-तम्, चिकाञ्चिषितः, चाकाञ्चितः-तवान् ;
काञ्चः, [1]काञ्चनम्[A], काञ्चः, चिकाञ्चिषुः, चिकाञ्चयिषुः, चाकाञ्चः ;
काञ्चितव्यम्, काञ्चयितव्यम्, चिकाञ्चिषितव्यम्, चाकाञ्चितव्यम् ;
काञ्चनीयम्, काञ्चनीयम्, चिकाञ्चिषणीयम्, चाकाञ्चनीयम् ;
काञ्चयम्, काञ्चयम्, चिकाञ्चिष्यम्, चाकाञ्चयम् ;
ईषत्काञ्चः-दुष्काञ्चः-सुकाञ्चः ; — —
काञ्च्यमानः, काञ्चयमानः, चिकाञ्चिष्यमाणः, चाकाञ्च्यमानः ;
काञ्चः, काञ्चः, चिकाञ्चिषः, चाकाञ्चः ;
काञ्चितुम्, काञ्चयितुम्, चिकाञ्चिषितुम्, चाकाञ्चितुम् ;
काञ्चा, काञ्चना, चिकाञ्चिषा, चिकाञ्चयिषा, चाकाञ्चा ;
काञ्चनम्, काञ्चनम्, चिकाञ्चिषणम्, चाकाञ्चनम् ;
काञ्चित्वा, काञ्चयित्वा, चिकाञ्चिषित्वा, चाकाञ्चित्वा ;
अवकाञ्च्य, संकाञ्च्य, प्रचिकाञ्चिष्य, प्रचाकाञ्च्य ;
काञ्चम् २, काञ्चित्वा २, } काञ्चम् २, काञ्चयित्वा २, } चिकाञ्चिषम् २, चिकाञ्चिषित्वा २, } चाकाञ्चम् २; चाकाञ्चित्वा २; }
[2]काञ्ची-काञ्चिः ॥

---

1. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति युच् ताच्छीलिकः ।
2. औणादिक इन् प्रत्ययः । 'कृदिकारादक्तिनः' (ग. सू. 4-1-45) इति वा ङीष् ।

A. 'सुलोचना यत्र शचीसमप्रभा अशाश्वचुः श्वञ्चितसौरभाः कचे ।
सकञ्चुकाः काञ्चनकाञ्चिभूषिता व्रजाङ्गना निर्मचनेन नर्मणा ॥'
धा. का. 1-23.

(185) "काल उपदेशे" (X-चुरादि:-1881. सक. सेट्.उभ.**अदन्तः**।)[अ]

कालकः-लिका,	चिकालयिषकः-षिका ;
कालयिता-त्री,	चिकालयिषिता-त्री ;
कालयन्-न्ती,	चिकालयिषन्-न्ती ;
कालयिष्यन्-न्ती-ती,	चिकालयिषिष्यन्-न्ती-ती ;
कालयमानः,	चिकालयिषमाणः ;
कालयिष्यमाणः,	चिकालयिषिष्यमाणः ;
काल्-कालौ-कालः ;	—
कालितम्-तः,	चिकालयिषितः-तवान् ;
कालः,	चिकालयिषुः ;
कालयितव्यम्,	चिकालयिषितव्यम् ;
कालनीयम्,	चिकालयिषणीयम् ;
काल्यम्,	चिकालयिष्यम् ;
ईषत्कालः-दुष्कालः-सुकालः ;	—
काल्यमानः,	चिकालयिष्यमाणः ;
कालः,	चिकालयिषः ;
कालयितुम्,	चिकालयिषितुम् ;
कालना,	चिकालयिषा ;
कालनम्,	चिकालयिषणम् ;
कालयित्वा,	चिकालयिषित्वा ;
संकाल्य,	संचिकालयिष्य ;
कालम् २, कालयित्वा २,	चिकालयिषम् २; चिकालयिषित्वा २.

[अ] 'वेल **कालोपदेशे**' (चुरादि:-1881) इत्यत्र '**काल**' इति पृथग् धातुरिति **आत्रेयादीनां** पक्षः। तदवलम्ब्य रूपाणि लिख्यन्ते। '**उपयोगे**' इति **मा. धा. वृत्तौ** पाठः।

(186) " काश्टृ दीप्तौ " (I-भ्वादि:-647. अक. सेट्. आत्म.)

' —काशेर्दीप्तौ काश्येत काशते ।' (श्लो. 165) इति **देवः** ।

काशकः-शिका, [A]काशिका[1],	प्रकाशकः-शिका,	चिकाशिषकः-षिका,	चाकाशकः-शिका ;
काशिता-त्री,	काशयिता-त्री,	चिकाशिषिता-त्री,	चाकाशिता-त्री ;
—	काशयन्-न्ती,	काशयिष्यन्-न्ती-ती ;	—
काशमानः,	काशयमानः,	चिकाशिषमाणः,	चाकाश्यमानः ;
काशिष्यमाणः,	काशयिष्यमाणः,	चिकाशिषिष्यमाणः,	चाकाशिष्यमाणः ;
[2]काट्-काड्-काशौ-काशः ;		—	—
काशितम्-तः,	काशितः-तम्,	चिकाशिषितः,	चाकाशितः-तवान् ;
काशः-[3]काशी, प्रकाशी, [4]नीकाशः[B], वीकाशः, अनूकाशः, [5]जितकाशी;			
[6]प्रकाशनः, काशः,	चिकाशिषुः,	चिकाशयिषुः,	चाकाशः ;
काशितव्यम्,	काशयितव्यम्,	चिकाशिषितव्यम्,	चाकाशितव्यम् ;
काशनीयम्,	[7]प्रनिकाशनीयम्,	चिकाशिषणीयम्,	चाकाशनीयम् ;
प्रकाश्यम्,	काश्यम्,	चिकाशिष्यम्,	चाकाश्यम् ;
ईषत्काशः-दुष्काशः-सुकाशः ;		—	—

1. 'संज्ञायाम्' (3-3-109) इति भावे ण्वुल्। ण्वुलन्तात् टाप्। अत इत्वम्। **काशिका**= **वामन-जयादित्य**कृता **पाणिनिसूत्रवृत्तिः**। काश्यां विरचनाद्वा **काशिका**।
2. 'व्रश्चभ्रस्ज–' (8-2-36) इति षत्वम्। जश्त्वचर्त्वे।
3. काशते इति **काशी**। पचाद्यजन्तात् गौरादि (4-1-41) पाठात् ङीष्।
4. 'इकः **काशे**' (6-3-123) इति उपसर्गस्य दीर्घः।
5. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति णिनिः। जितेन=जयेन काशते इति **जितकाशी**=जययुक्तः।
6. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति ताच्छीलिको युच्।
7. 'शेषे विभाषाऽकखादावषान्त उपदेशे' (8-4-18) इति णत्वं न ; 'अकखादा' वित्युक्तेः।

A. 'मनोनिवृत्तिः परमोपशान्तिः सा तीर्थवर्या मणिकर्णिका वै। ज्ञानप्रवाहा विमला हि गङ्गा सा **काशिका**ऽहं निजबोधरूपः॥' इति पारिभाषिक**काशिकायाः** लक्षणमुक्तं **शङ्कराचार्येण**।' इति **शब्दकल्पद्रुमे**।

B. 'तापिञ्छ**नीकाश**रुचि प्रतीचि स्ववैरिमर्मविधि पुंसि रागात्।' वा. वि. 3-21.

काश्यमानः, काश्यमानः, चिकाशिष्यमाणः, चाकाश्यमानः;
प्रकाशः, काशः, चिकाशिषः, चाकाशः;
काशितुम्, काशयितुम्, चिकाशिषितुम्, चाकाशितुम्;
काशा, काशना, चिकाशिषा, चिकाशयिषा, चाकाशा;
[A]प्रकाशनम्, काशनम्, चिकाशिषणम्, चाकाशनम्;
काशित्वा, काशयित्वा, चिकाशिषित्वा, चाकाशित्वा;
प्रकाश्य, संकाश्य, प्रचिकाशिष्य, प्रचाकाश्य;
काशम् २, काशित्वा २, } काशम् २, काशयित्वा २, } चिकाशिषम् २, चिकाशिषित्वा २, } चाकाशम् २; चाकाशित्वा २. }

(187) "**काशृ दीप्तौ**" (IV- दिवादिः-1162. सक.सेट्. आत्म.)

'—काशेः दीप्तौ काश्येत काशते।' (श्लो. 165) इति **देवः**।

काश्यमानः, काशिष्यमाणः, काशयमानः, काशयिष्यमाणः, चिकाशिषमाणः, चिकाशिषिष्यमाणः, चाकाश्यमानः, चाकाशिष्यमाणः, इति शानचि रूपाणि। अन्यानि सर्वाणि रूपाणि भौवादिककाशृधातुवत् (186) ज्ञेयानि।

(188) "**कासृ शब्दकुत्सायाम्**" (I-भ्वादिः-62. सक. सेट्. आत्म.)

'शब्दस्य कुत्सा रोगित्वात्।' इति **क्षीरतरङ्गिणी**।

कासकः-सिका, कासकः-सिका, चिकासिषकः-षिका, चाकासकः-सिका;
कासिता-त्री, कासयिता-त्री, चिकासिषिता-त्री, चाकासिता-त्री;
— कासयन्-न्ती, कासयिष्यन्-न्ती-न्ती; —
कासमानः, कासयमानः, चिकासिषमाणः, चाकास्यमानः;
कासिष्यमाणः, कासयिष्यमाणः, चिकासिषिष्यमाणः, चाकासिष्यमाणः;
[1]प्रकाः-प्रकासौ-प्रकासः; — —
कासितम्-तः, कासितः-तम्, चिकासिषितः, चाकासितः-तवान्;
कासः, कासः, चिकासिषुः, चिकासयिषुः, चाकासः;
कासितव्यम्, कासयितव्यम्, चिकासिषितव्यम्, चाकासितव्यम्;

---

1. 'ससजुषो रुः' (8-2-66) इति रुत्वे 'खरवसानयोर्विसर्जनीयः' (8-3-15) इति विसर्गः।

A. 'द्राहितः शुभपथप्रकाशने सस्वजेऽथ तमनूह्यवैभवः।' धा. का. 1-82.

कासनीयम्, कासनीयम्, चिकासिषणीयम्, चाकासनीयम्;
कास्यम्, कास्यम्, चिकासिष्यम्, चाकास्यम्;
ईषत्कासः-दुष्कासः-सुकासः; — —
कास्यमानः, कास्यमानः, चिकासिष्यमाणः, चाकास्यमानः;
[1]कासः, कासः, चिकासिषः, चाकासः;
कासितुम्, कासयितुम्, चिकासिषितुम्, चाकासितुम्;
कासा, कासना, चिकासिषा, चिकासयिषा, चाकासा;
निष्कासनम्, कासनम्, चिकासिषणम्, चाकासनम्;
कासित्वा, कासयित्वा, चिकासिषित्वा, चाकासित्वा;
विकास्य, विकास्य, विचिकासिष्य, प्रचाकास्य;
कासम् २, कासित्वा २, } कासम् २, कासयित्वा २, } चिकासिषम् २, चिकासिषित्वा २, } चाकासम् २; चाकासित्वा २. }

(189) "**कि ज्ञाने**" (III-जुहोत्यादिः-1101. सक. अनि. पर.)

छान्दसः।

कायकः-यिका, कायकः-यिका, [2]चिकीषकः-षिका, [3]चेकीयकः-यिका;
केता-त्री, काययिता-त्री, चिकीषिता-त्री, चेकीयिता-त्री;
[4]चिक्यत्-ती, काययन्-न्ती, चिकीषन्-न्ती; —
केष्यन्-न्ती-ती, काययिष्यन्-न्ती-ती, चिकीषिष्यन्-न्ती-ती; —
काययमानः, काययिष्यमाणः, चेकीयमानः, चेकीयिष्यमाणः;
[5]कित्-कितौ-कितः; — — —
कितम्-तः, कायितः-तम्, चिकीषितः, चेकीयितः-तवान्;
कयः, कायः, चिकीषुः, चिकाययिषुः, [6]चेक्यः;

---

1. 'हलश्च' (3-3-121) इति संज्ञायां घञ्। **कासः**=कासरोगः।
2. 'इको झल्' (1-2-9) इति सनः कित्वम्। 'अज्झनगमां सनि' (6-4-16) इति दीर्घः।
3. 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः।
4. जुहोत्यादित्वात् 'श्लौ' (6-1-10) इति द्वित्वम्। 'नाभ्यस्ताच्छतुः' (7-1-78) इति नुम्निषेधः। 'एरनेकाचः—' (6-4-82) इति यण्।
5. 'ह्रस्वस्य पिति कृति तुक्' (6-1-71) इति तुक्।
6. यङ्लुगन्तात् पचाद्यच्। 'एरनेकाचः—' (6-4-82) इति यण्।

केतव्यम्, कायथितव्यम्, चिकीषितव्यम्, चेकीयितव्यम्;
कयनीयम्, कायनीयम्, चिकीषणीयम्, चेकीयनीयम्;
केयम्, काय्यम्, चिकीष्यम्, चेकीय्यम्;
ईषत्कयः-दुष्कयः-सुकयः; — —
कीयमानः, काय्यमानः, चिकीष्यमाणः, चेकीय्यमानः;
[1]कयः, कायः, चिकीषः, चेकीयः;
केतुम्, काययितुम्, चिकीषितुम्, चेकीयितुम्;
किति:, कायना, चिकीषा, चिकाययिषा, चेकीया;
कयनम्, कायनम्, चिकीषणम्, चेकीयनम्;
कित्वा, काययित्वा, चिकीषित्वा, चेकीयित्वा;
प्रकित्य, विकाय्य, प्रचिकीष्य, प्रचेकीय्य;
कायम् २, कित्वा २, } कायम् २, काययित्वा २, } चिकीषम् २, चिकीषित्वा २, } चेकीयम् २; चेकीयित्वा २. }

(190) "किट त्रासे" (I-भ्वादिः-301. सक. सेट्. पर.)

त्रासः=भयोत्पादनम्।

केटकः-टिका, केटकः-टिका, [2]चिकिटिषकः-चिकेटिषकः-षिका, चेकिटकः-टिका;
केटिता-त्री, केटयिता-त्री, चिकिटिषिता-चिकेटिषिता-त्री, चेकिटिता-त्री;
केटन्-न्ती, केटयन्-न्ती, चिकिटिषन्-चिकेटिषन्-न्ती; —
केटिष्यन्-न्ती-ती, केटयिष्यन्-न्ती-ती, चिकिटिषिष्यन्-चिकेटिषिष्यन्-न्ती-ती;
— केटयमानः, केटयिष्यमाणः, चेकिट्यमानः, चेकिटिष्यमाणः;
किट्-किटौ-किटः; — — —
किटितम्-[A]तः, केटितः-तम्, चिकिटिषितः-चिकेटिषितः, चेकिटितः-तवान्;
[3]किटः, केटः, चिकिटिषुः-चिकेटिषुः, चिकेटयिषुः, चेकिटः;

1. 'एरच्' (3-3-56) इति भावे अच्।
2. 'रलो व्युपधाद्धलादेः संश्च' (1-2-26) इति सनः कित्वविकल्पात् रूपद्वयम्।
3. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कः।
A. 'लाटाईशाटीवटितैः वटुव्रजैर्वृतान् खलैश्चा**किटितान्** प्रखेटकैः। अशेटनीयैः सुधियामसेटकैः युतान् जटाज्ञाटधरैश्च कैश्चन॥' धा. का 1. 40.

केटितव्यम्, केटयितव्यम्, चिकिटिषितव्यम्-चिकेटिषितव्यम्, चेकिटितव्यम्;
केटनीयम्, केटनीयम्, चिकिटिषणीयम्-चिकेटिषणीयम्, चेकिटनीयम्;
केट्यम्, केट्यम्, चिकिटिष्यम्-चिकेटिष्यम्, चेकिट्यम्; —
ईषत्केटः-दुष्केटः-सुकेटः; — — —
किट्यमानः, केट्यमानः, चिकिटिष्यमाणः-चिकेटिष्यमाणः, चेकिट्यमानः;
केटः, केटः, चिकिटिषः-चिकेटिषः, चेकिटः;
केटितुम्, केटयितुम्, चिकिटिषितुम्-चिकेटिषितुम्, चेकिटितुम्;
[1]किट्टिः, केटना, चिकिटिषा-चिकेटिषा, चिकेटयिषा, चेकिटा;
केटनम्, केटनम्, चिकिटिषणम्-चिकेटिषणम्, चेकिटनम्;
[2]किटित्वा, केटित्वा, } केटयित्वा, चिकिटिषित्वा-चिकेटिषित्वा, चेकिटित्वा;
प्रकिट्य, प्रकेट्य, प्रचिकिटिष्य-प्रचिकेटिष्य, प्रचेकिट्य;
केटम् २, किटित्वा २, केटित्वा २, } केटम् २, केटयित्वा२, } चिकिटिषम् २, चिकिटिषित्वा २, चिकेटिषम् २, चिकेटिषित्वा २, }
चेकिटम् २; चेकिटित्वा २. }

(191) "किट गतौ" (I-भ्वादिः-319. सक. सेट्. पर.)

सर्वाण्यपि रूपाणि पूर्वोक्त 'किट' (190) धातुवत् ज्ञेयानि।

(192) "कित निवासे रोगापनयने च"

(I-भ्वादिः-993. सक. सेट्. पर.) [अ]

[3]चिकित्सकः-त्सिका, चिकित्सकः-त्सिका, [4]चिकित्सिषकः-षिका, [5]केतकः-तिका;

1. 'ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वेन टकारः।
2. 'रलो व्युपधात्—' (1-2-26) इति क्त्वायां कित्त्वविकल्पात् द्वे रूपे।
3. 'गुप्तिज्किद्भ्यस्सन्' (3-1-5) इति स्वार्थे सन् '**कितेर्**व्याधिप्रतीकारे निग्रहे अपनये नाशने संशये च' (वा. 3-1-5) इत्येतेष्वर्थेषु भवति। अन्यस्मिन्नर्थे तु चुरादिर्वेदितव्यः।
4. स्वार्थसन्नन्तादिच्छासनि इदं रूपम्। 'सन्नन्तान्न सनिष्यते—' (भाष्येष्टिः—3-1-7) इति तु इच्छासन्नन्तादिच्छासन् न। स्वार्थसन्नन्तात् स्यादेवेत्यर्थकम्।
5. ण्यन्तात् इमानि रूपाणि।
अ. निवासरूपार्थे '**केतन्**' (**केतति**) इति रूपमिति **क्षीरस्वामी**। 'अर्थान्तरेऽननुबन्धकाश्चुरादयः' इति **सिद्धान्तकौमुद्यामुक्तम्**। तत्तु **काशिकावृत्त्याद्यनुसारेणेति** बोध्यम्।

चिकित्सिता-त्री, [1]चिकित्सयिता-त्री, चिकित्सिषिता-त्री,
केतयिता-त्री ;

[A]चिकित्सन्-न्ती, चिकित्सयन्-न्ती, चिकित्सिषन्-न्ती,
केतयन्-न्ती ;

चिकित्सिष्यन्-न्ती-ती, चिकित्सयिष्यन्-न्ती-ती, चिकित्सिषिष्यन्-न्ती-ती,
केतयिष्यन्-न्ती-ती ;

— चिकित्सयमानः, चिकित्सयिष्यमाणः, केतयमानः,
केतयिष्यमाणः ;

[2]चिकित्-चिकित्सौ-चिकित्सः ; — —

चिकित्सितम्-तः, चिकित्सितः-तम्, चिकित्सिषितः, केतितः-तवान् ;

[3]चिकित्सुः, चिकित्सयिषुः, चिकित्सिषिषुः, केतः ;

चिकित्सितव्यम्, चिकित्सयितव्यम्, चिकित्सिषितव्यम्,
केतयितव्यम् ;

चिकित्सनीयम्, चिकित्सनीयम्, चिकित्सिषणीयम्,
केतनीयम् ;

विचिकित्स्यम्, चिकित्स्यम्, चिकित्सिष्यम्, केत्यम् ;

ईषच्चिकित्सः-दुश्चिकित्सः-सुचिकित्सः ; —

चिकित्स्यमानः, चिकित्स्यमानः, चिकित्सिष्यमाणः,
केतयमानः ;

चिकित्सः, चिकित्सः, चिकित्सिषः, केतः ;

चिकित्सितुम्, चिकित्सयितुम्, चिकित्सिषितुम्,
केतयितुम् ;

---

1. स्वार्थसन्नन्ताण्णिचि तृच्ययादेशे रूपम् । एवमुत्तरत्रापि ।
2. 'संयोगान्तस्य लोपः' (8-2-23) इति सलोपे रूपमिदम् ।
3. 'सनाशंसभिक्ष उः' (3-2-168) इत्युप्रत्ययः ताच्छीलिकः ।
A. 'मोहं **चिकित्सन्** वचसाऽस्य कृष्णः दीदांसुचित्तस्य सुविस्मितस्य ।'
धा. का. 2-41.

[1]विचिकित्सा, चिकित्सना, चिकित्सिषा, केतना ;

चिकित्सनम्, चिकित्सनम्, चिकित्सिषणम्,
केतनम्, [A]निकेतनम् ;

चिकित्सित्वा, चिकित्सयित्वा, चिकित्सिषित्वा,
केतयित्वा ;

विचिकित्स्य, विचिकित्स्य, विचिकित्सिष्य,
विकेत्य ;

चिकित्सम् २, चिकित्सित्वा २, } चिकित्सम् २, चिकित्सयित्वा २, } चिकित्सिषम् २, चिकित्सिषित्वा २, }
केतम् २, केतयित्वा २. }

(193) " किल श्वैत्यक्रीडनयोः " (VI-तुदादिः-1353. सक. सेट्. पर.)

केलकः-लिका, केलकः-लिका, [2]चिकिलिषकः / चिकेलिषकः } षिका, चेकिलकः-लिका;

केलिता-त्री, केलयिता-त्री, चिकिलिषिता-चिकेलिषिता-त्री, चेकिलिता-त्री;

[3]किलन्[B]-न्ती-ती, केलयन्-न्ती, चिकिलिषन्-चिकेलिषन्-न्ती ; —

केलिष्यन्-न्ती-ती, केलयिष्यन्-न्ती-ती, चिकिलिषिष्यन्-चिकेलिषिष्यन्-न्ती-ती;

— केलयमानः, केलयिष्यमाणः, चेकिल्यमानः, चेकिलिष्यमाणः ;

किल्-किलौ-किलः; — — —

किलितम्-तः, केलितः-तम्, चिकिलिषितः-चिकेलिषितः, चेकिलितः-तवान् ;

[4]किलः, केलः, चिकिलिषुः-चिकेलिषुः, चिकेलयिषुः, चेकिलः ;

---

1. विपूर्वक**कित**धातोः संशयार्थकत्वं कोशबलाल्लभ्यते । '**विचिकित्सा** तु संशयः' **इत्यमरः** ।
2. 'रलो व्युपधाद्धलादेः संश्च' (1-2-26) इति सनः क्त्वाप्रत्ययस्य च कित्त्वं वा ।
3. 'तुदादिभ्यः शः' (3-1-77) इति शः । शस्य ङिद्वद्भावाद्गुणो न ।
4. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कः । अचोऽपवादः ।

A 'प्रबोधकाले शतमन्युविद्विषः प्रचक्रमे राज**निकेतनं** प्रति ॥' भ. का. 11-38.
'गृहं गेहोदवसितं वेश्म सद्म **निकेतनम्** ।' **इत्यमरः** ।

B. 'गतनिमेषमुदैक्षि **किलन्** विभुस्सुकृतिभिस्स जगत्तिलकाकृतिः ।
चिलितपीतपटेन चलन् इलन् अविलितोरुकृपां परितो दशम् ॥' धा. का. 2, 78.

केलितव्यम्, केलयितव्यम्, चिकिलिषितव्यम-चिकेलिषितव्यम्, चेकिलितव्यम्;
केलनीयम्, केलनीयम्, चिकिलिषणीयम्-चिकेलिषणीयम्, चेकिलनीयम्;
केल्यम्, केल्यम्, चिकिलिष्यम्-चिकेलिष्यम्, चेकिल्यम्;
ईषत्केलः-दुष्केलः-सुकेलः; — —
किल्यमानः, केल्यमानः, चिकिलिष्यमाणः-चिकेलिष्यमाणः, चेकिल्यमानः;
केलः, केलः, चिकिलिषः-चिकेलिषः, चेकिलः;
केलितुम्, केलयितुम्, चिकिलिषितुम्-चिकेलिषितुम्, चेकिलितुम्;
किलितः, केलना, चिकिलिषा-चिकेलिषा, चिकेलयिषा, चेकिला;
केलनम्, केलनम्, चिकिलिषणम्-चिकेलिषणम्, चेकिलनम्;
किलित्वा / केलित्वा } केलयित्वा, चिकिलिषित्वा-चिकेलिषित्वा, चेकिलित्वा;
संकिल्य, प्रकेल्य, प्रचिकिलिष्य-प्रचिकेलिष्य, प्रचेकिल्य;
केलम् २ / किलित्वा २ / केलित्वा २ } केलम् २ / केलयित्वा २ } चिकिलिषम् २ / चिकिलिषित्वा २ } चिकेलिषम् २ / चिकेलिषित्वा २ }
चेकिलम् २; / चेकिलित्वा २; }
[1]केलिः-[2]केली. — — —

(194) "कीट वर्णे" (X-चुरादिः-1641. अक. सेट्. उभ.)

'कीट वरणे' इति क्षीरस्वामिसम्मतः पाठः।

कीटकः-टिका, चिकीटयिषकः-षिका;
कीटयिता-त्री, चिकीटयिषिता-त्री;
कीटयन्-न्ती, चिकीटयिषन्-न्ती;
कीटयिष्यन्-न्ती-ती, चिकीटयिषिष्यन्-न्ती-ती;
कीटयमानः, चिकीटयिषमाणः;
कीटयिष्यमाणः, चिकीटयिषिष्यमाणः;

1. 'सर्वधातुभ्यः' (द. उ. 1-46.) इत्यौणादिकः इन् प्रत्ययः।
2. स्त्रियां 'कृदिकारादक्तिनः' (ग. सू. 4-1-45) इति ङीष् वा।

कीट्-कीटौ-कीटः; —
कीटितः-तम्, चिकीटयिषितः-तवान्;
[A]कीटः, चिकीटयिषुः;
कीटयितव्यम्, चिकीटयिषितव्यम्;
कीटनीयम्, चिकीटयिषणीयम्;
कीट्यम्, चिकीटयिष्यम्;
ईषत्कीटः-दुष्कीटः-सुकीटः; —
कीट्यमानः, चिकीटयिष्यमाणः;
कीटः, चिकीटयिषः;
कीटयितुम्, चिकीटयिषितुम्;
कीटना, चिकीटयिषा;
कीटनम्, चिकीटयिषणम्;
कीटयित्वा, चिकीटयिषित्वा;
प्रकीट्य, प्रचिकीटयिष्य;
कीटम् २, / कीटयित्वा २, } चिकीटयिषम् २; / चिकीटयिषित्वा २. }

(195) "कील बन्धने" (I-भ्वादिः-524. सक. सेट्. पर.)

कीलकः-लिका, कीलकः-लिका, चिकीलिषकः-षिका, चेकीलकः-लिका;
कीलिता-त्री, कीलयिता-त्री, चिकीलिषिता-त्री, चेकीलिता-त्री;
कीलन्-न्ती, कीलयन्-न्ती, चिकीलिषन्-न्ती; —
कीलिष्यन्-न्ती-ती, कीलयिष्यन्-न्ती-ती, चिकीलिषिष्यन्-न्ती-ती;
— कीलयमानः, कीलयिष्यमाणः, चेकील्यमानः, चेकीलिष्यमाणः;
कील्-कीलौ-कीलः; — — —
[B]कीलितम्-तः, कीलितः-तम्, चिकीलिषितः, चेकीलितः-तवान्;

A. 'सौधे विटङ्कजुषि पश्यति धूसितोऽयं राजारिकीटबलचूर्णनयाऽतिपूज्यः। अक्ष्यैण तेन समरेष्वविशोठितस्त्वं संशुण्ठिताहितमदेन विजोठितोऽसि ॥' धा. का. 3-27.
B. 'उन्मीलनन्मीलनलीलया दृशोरुत्स्मीलितक्ष्मीलितविश्वविष्टपम्। पिच्छस्रजा पीलितनीलकुन्तलं श्रीलेन सङ्कीलितलोकमानसम् ॥' धा. का. 1-67.

[1]कीलः, कीलः, चिकीलिषुः, चिकीलयिषुः, चेकीलः ;
कीलितव्यम्, कीलयितव्यम्, चिकीलिषितव्यम्, चेकीलितव्यम् ;
कीलनीयम्, कीलनीयम्, चिकीलिषणीयम्, चेकीलनीयम् ;
कील्यम्, कील्यम्, चिकीलिष्यम्, चेकील्यम्,
ईषत्कीलः-दुष्कीलः-सुकीलः ; — —
कील्यमानः, कील्यमानः, चिकीलिष्यमाणः, चेकील्यमानः ;
[2]कीलः, कीलः, चिकीलिषः, चेकीलः ;
कीलितुम्, कीलयितुम्, चिकीलिषितुम्, चेकीलितुम् ;
[3]कीला, कीलना, चिकीलिषा, चिकीलयिषा, चेकीला ;
कीलनम्, कीलनम्, चिकीलिषणम्, चेकीलनम् ;
कीलित्वा, कीलयित्वा, चिकीलिषित्वा, चेकीलित्वा ;
विकील्य, सङ्कील्य, प्रचिकीलिष्य, प्रचेकील्य ;
कीलम् २, } कीलम् २, } चिकीलिषम् २, } चेकीलम् २; }
कीलित्वा २, } कीलयित्वा २, } चिकीलिषित्वा २, } चेकीलम् २; }
[4]कीलकम्.

(196) "कु शब्दे" (II-अदादिः-1042. अक. अनि. पर.) [अ]

'अव्यक्तशब्दे कवते, कुवते त्वार्तशब्दने ।
कौतीति शब्दमात्रे स्यात्—' (श्लो. 23) इति देवः ।

---

1. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कः ।
2. 'हलश्च' (3-3-121) इति संज्ञायां घञ् ।
3. 'गुरोश्च हलः' (3-3-103) इति अप्रत्ययः । **कीला**=पशुबन्धनी रज्जुर्यस्यां निबध्यते गौः ।
4. 'क्वुन् शिल्पिसंज्ञयोः' (द. उ. 3-5.) इति संज्ञायां क्वुन् ।

[अ] 'सत्यपि हि शब्दार्थत्वे भिद्यत एवैषामभिधेयम् । तथाहि—
कवतिस्तावत्—अव्यक्ते शब्दे वर्तते—उष्ट्रः **कोकूयते**—इति । **कुवति**-रप्यार्तस्वरे वर्तते-चोकूयते वृषल इति, पीडित इत्यर्थः । **कौति**स्तु शब्दमात्रे ।' इति दैवव्याख्याने **पुरुषकारे** न्यासवचनमुपात्तमिहानुसन्धेयम् ।

कावकः-विका, कावकः-विका, [1]चुकूषकः-षिका, [2]चुकावयिषकः-षिका,
[3]चोकूयकः-यिका ;
कोता-त्री, कावयिता-त्री, चुकूषिता-त्री, चुकावयिषिता-त्री, चोकूयिता-त्री ;
[4]कुवन्-[A]ती, कावयन्-न्ती, चुकूषन्-न्ती, चुकावयिषन्-न्ती ; —
कोष्यन्-न्ती-ती, कावयिष्यन्-न्ती-ती, चुकूषिष्यन्-न्ती-ती,
चुकावयिषिष्यन्-न्ती-ती ;
कावयमानः, कावयिष्यमाणः, चोकूयमानः, चोकूयिष्यमाणः,
— — चुकावयिषमाणः, चुकावयिषिष्यमाणः ;
[5]प्रकुत्-प्रकुतौ-प्रकुतः ; — — —
कुतम्-तः, कावितः-तम्, चुकूषितः, चुकावयिषितः, चोकूयितः-तवान् ;
कवः, कावः, चुकूषुः, चुकावयिषुः, [6]चोकुवः ;
कोतव्यम्, कावयितव्यम्, चुकूषितव्यम्, चुकावयिषितव्यम्, चोकूयितव्यम् ;
कवनीयम्, कावनीयम्, चुकूषणीयम्, चुकावयिषणीयम्, चोकूयनीयम् ;
कव्यम्, काव्यम्, [7]अवश्यकाव्यम्, चुकूष्यम्, चुकावयिष्यम्, चोकूय्यम् ;
ईषत्कवः-दुष्कवः-सुकवः ; — — — —
कूयमानः, काव्यमानः, चुकूष्यमाणः, चुकावयिष्यमाणः, चोकूय्यमानः ;
[8]कवः, कावः, चुकूषः, चुकावयिषः, चोकूयः ;
कोतुम्, कावयितुम्, चुकूषितुम्, चुकावयिषितुम्, चोकूयितुम् ;

---

1. 'इको झल्' (1-2-9) इति सनः कित्त्वम् । 'अज्झनगमां सनि' (6-4-16) इति दीर्घः । अभ्यासकार्यम् ।
2. 'णिच्यच आदेशो न स्यात् द्वित्वे कर्तव्ये' (**भाष्यम्** 1-1-59) इत्यर्थस्य—'ओः पुयण्—' (7-4-80) इत्यत्र ज्ञापितत्वात् प्रथमतो वृद्ध्यावादेशौ न ।
3. 'गुणो यङ्लुकोः' (7-4-82) इति गुणोऽभ्यासस्य । 'अतो लोपः' (6-4-48) इत्यलोपः ।
4. 'अचि श्नुधातु—' (6-4-77) इत्युवङ् ।
5. 'ह्रस्वस्य पिति कृति—' (6-1-71) इति तुक् ।
6. यङन्तात् पचाद्यचि उवङ् ।
7. 'ओरावश्यके' (3-1-125) इति ण्यत् ।
8. 'ऋदोरप्' (3-3-57) इति भावे अप् ।

A. 'सोऽनूर्णुनोऽद्यौत् जनयुतः **कुवन्त्या** काञ्च्येव कामं स्तुवतां ब्रुवाणः ॥' धा. का. 2-47.

कुतिः, कावना, चुकूषा, चुकावयिषा, चोकूया ;

कवनम्, कावनम्, चुकूषणम्, चुकावयिषणम्, चोकूयनम् ;

कुत्वा, कावयित्वा, चुकूषित्वा, चुकावयिषित्वा, चोकूयित्वा ;

प्रकुत्य, प्रकाव्य, प्रचुकूष्य, प्रचुकावयिष्य, प्रचोकूय्य ;

कावम् २, कुत्वा २, } कावम् २, कावयित्वा २, } चुकूषम् २, चुकूषित्वा २, } चुकावयिषम् २, चुकावयिषित्वा २, }

चोकूयम् २ ; चोकूयित्वा २ ; }

[1]कविः

(197) " कुक आदाने " (I-भ्वादिः-91. सक. सेट्. आत्म.)

कोककः-किका, कोककः-किका, [2]चुकुकिषकः-चुकोकिषकः-षिका, चोकुककः-किका ;

कोकिता-त्री, कोकयिता-त्री, चुकुकिषिता-चुकोकिषिता-त्री, चोकुकिता-त्री;

— कोकयन्-न्ती, कोकयिष्यन्-न्ती-ती ; —

कोकमानः, कोकयमानः, चुकुकिषमाणः-चुकोकिषमाणः, चोकुक्यमानः;

कोकिष्यमाणः, कोकयिष्यमाणः, चुकुकिषिष्यमाणः-चुकोकिषिष्यमाणः, चोकुकिष्यमाणः ;

कुक्-कुकौ-कुकः ; — —

[3]कुकितम् कोकितम् } तः, कोकितः-तम्, चुकुकिषितः-चुकोकिषितः, चोकुकितः-तवान् ;

[4]कोकः, कोकः, [5]कोकनः, चुकुकिषुः-चुकोकिषुः, चोकुकः ;

कोकितव्यम्, कोकयितव्यम्, चुकुकिषितव्यम्-चुकोकिषितव्यम्, चोकुकितव्यम्;

कोकनीयम्, कोकनीयम्, चुकुकिषणीयम्-चुकोकिषणीयम्-चोकुकनीयम् ;

कोक्यम्, कोक्यम्, चुकुकिष्यम्-चुकोकिष्यम्, चोकुक्यम् ;

ईषत्कोकः-दुष्कोकः-सुकोकः ; — —

1. औणादिकः 'अच इः' (द. उ. 1-67) इति इः प्रत्ययः ।
2. 'रलो व्युपधात्—' (1-2-26) इति सनः कित्त्वविकल्पः । तेन द्वे रूपे।
3. 'उदुपधात् भावादिकर्मणोरन्यतरस्याम्' (1-2-21) इति निष्ठायाः कित्त्वं वा ।
4. 'देवमेषसेवादयः पचादिषु द्रष्टव्याः' (भाष्यम्. 3 1-135) इत्यत्र आदिपदेन अस्य ग्रहणम् । तेन इगुपधलक्षणं कं बाधित्वा कर्तरि पचाद्यच् । कोकः-चक्रवाकः ।
5. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति युच् ताच्छीलिकः ।

कुक्यमानः, कोक्यमानः, चुकुकिष्यमाणः-चुकोकिष्यमाणः, चोकुक्यमानः ;

कोकः, कोकः, चुकुकिषः-चुकोकिषः, चोकुकः ;

कोकितुम्, कोकयितुम्, चुकुकिषितुम्-चुकोकिषितुम्, चोकुकितुम्;

कुक्तिः, कोकना, चुकुकिषा-चुकोकिषा, चुकोकयिषा, चोकुका ;

[1]प्रकोकनम्-प्रकोकणम्, कोकनम्, चुकुकिषणम्-चुकोकिषणम्, चोकुकनम्;

[2]कुकित्वा-कोकित्वा, कोकयित्वा, चुकुकिषित्वा-चुकोकिषित्वा, चोकुकित्वा;

प्रकुक्य, प्रकोक्य, प्रचुकुकिष्य-प्रचुकोकिष्य, प्रचोकुक्य ;

कोकम् २, कुकित्वा २, कोकित्वा २, } कोकम् २, कोकयित्वा २, } चुकुकिषम् २, चुकुकिषित्वा २, चुकोकिषम् २, चुकोकिषित्वा २, }

चोकुकम् २ ; चोकुकित्वा २; }

[3]कुक्कुरः.

(198) " कुङ् शब्दे " (I-भ्वादिः-951. अक. अनि. आत्म.) [अ]

'अव्यक्तशब्दे कवते, कुवते त्वार्तशब्दने ।

कौतीति शब्दमात्रे स्यात्—' (श्लो. 23) इति देवः ।

कावकः-विका, कावकः-विका, चुकूषकः-षिका, [4]कोकूयकः-यिका ;

कोता-त्री, कावयिता-त्री, चुकूषिता-त्री, कोकूयिता-त्री ;

— कावयन्-न्ती, कावयिष्यन्-न्ती-ती ; —

कवमानः, कावयमानः, चुकूषमाणः, कोकूयमानः ;

1. 'हलश्चेजुपधात्' (8-4-31) इति णत्वं वा भवति ।
2. 'रलो व्युपधात्—' (1-2-26) इति क्त्वाप्रत्ययस्य कित्त्वं वा भवति ।
3. औणादिके उरच् प्रत्यये (द. उ. 8-23) कुगागमो निपात्यते । अतिशयेन शब्दं करोतीति = कुक्कुरः = श्वा ।
4. 'न कवतेर्यङि' (7-4-63) इति अभ्यासे चुत्वनिषेधः । 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः । एवं यङन्ते सर्वत्र बोध्यम् ।

[अ] "सत्यपि हि शब्दार्थत्वे भिद्यत एवैषामभिधेयम् । तथाहि—कवतिस्तावत्—अव्यक्ते शब्दे वर्तते—उष्ट्रः कोकूयते इति । कुवतिरपि—आर्तस्वरे वर्तते—चोकूयते वृषल इति ; पीडित इत्यर्थः । कौतिस्तु शब्दमात्रे ।" इति दैवव्याख्याने पुरुषकारे उपात्तं व्याख्यानमिहानुसन्धेयम् ।

25

कोष्यमाणः,	कावयिष्यमाणः,	चुकूषिष्यमाणः,	कोकूयिष्यमाणः ;
कुत्-कुतौ-कुतः ;	—	—	—
कुतम्-[A]तः,	कावितः-तम्,	चुकूषितः,	कोकूयितः-तवान् ;
कवः,	कावः, चुकूषुः,	चुकावयिषुः,	कोकुवः ;
कोतव्यम्,	कावयितव्यम्,	चुकूषितव्यम्,	कोकूयितव्यम् ;
कवनीयम्,	कावनीयम्,	चुकूषणीयम्,	कोकूयनीयम् ;
कव्यम्, अवश्यकाव्यम्,	काव्यम्,	चुकूष्यम्,	कोकूय्यम् ;
ईषत्कवः-दुष्कवः-सुकवः ;		—	—
[1]कूयमानः,	काव्यमानः,	चुकूष्यमाणः,	कोकूय्यमानः ;
कवः,	कावः,	चुकूषः,	कोकूयः ;
कोतुम्,	कावयितुम्,	चुकूषितुम्,	कोकूयितुम् ;
कुतिः,	कावना, चुकूषा,	चुकावयिषा,	कोकूया ;
कवनम्,	कावनम्,	चुकूषणम्,	कोकूयनम् ;
कुत्वा,	कावयित्वा,	चुकूषित्वा,	कोकूयित्वा ;
प्रकुत्य,	संकाव्य,	प्रचुकूष्य,	प्रकोकूय्य ;
कावम् २, कुत्वा २,	कावम् २, कावयित्वा २,	चुकूषम् २, चुकूषित्वा २,	कोकूयम् २ ; कोकूयित्वा २.

(199) "कुङ् (आर्त) शब्दे" (VI-तुदादिः-1401. अक. अनि. आत्म.)

कुटादिः ।

'अव्यक्तशब्दे कवते, कुवते त्वार्तशब्दने ।

कौतीति शब्दमात्रे स्यात्—' (श्लो. 23) इति देवः ।

कावकः-विका, कावकः-विका, चुकूषकः-षिका, चोकूयकः-यिका; इत्यादिरूपाणि आदादिक (196) कुधातुवत् ण्यन्तात् सन्नन्तात् यङन्ताच्च ज्ञेयानि । शुद्धाद्धातोः कुटादित्वात् रूपाणि लिख्यन्ते—

1. 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः ।

A. 'श्रुत्यन्तवाचा ध्रुवया प्रदूनं घोरद्रवच्चक्रजिताज्ञितारिम् ।
लिप्ताद्रिवक्त्रं [illegible] तत्वां घुताक्षं कुत्वशाङ्कचोषैः ॥' धा. का. 2-35.

[1]कुता-त्री, [2]कुवमानः,[A] कुष्यमाणः, कुत्-कुतौ-कुतः, कुतम्-तः-तवान्, कुवः, कुतव्यम्, कुवनीयम्, [3]कुयम्, [4]अवश्यकाव्यम्, ईषत्कुवः-दुष्कुवः-सुकुवः, कूयमानः, कुवः, कुतुम्, कुतिः, कुवनम्, कुत्वा, अवकुत्य, कावम् २, कुत्वा २, [5]कुररः इति ।

(200) "कुच शब्दे तारे" (I-भ्वादिः-184. सक. सेट्. पर.)

कोचकः-चिका, कोचकः-चिका, चुकुचिषकः-[6]चुकोचिषकः-षिका, चोकुचकः-चिका ;

कोचिता-त्री, कोचयिता-त्री, चुकुचिषिता-चुकोचिषिता-त्री, चोकुचिता-त्री ;

कोचन्-न्ती, कोचयन्-न्ती, चुकुचिषन्-चुकोचिषन्-न्ती ; —

कोचिष्यन्-न्ती-ती, कोचयिष्यन्-न्ती-ती, चुकुचिषिष्यन्-चुकोचिषिष्यन्-न्ती-ती ;

— कोचयमानः, कोचयिष्यमाणः, चोकुच्यमानः, चोकुचिष्यमाणः ;

[7]कुचितम्-कोचितम्, कोचितः-तम्, चुकुचिषितः-चुकोचिषितः, चोकुचितः-तवान् ;

कुचः, कोचः, चुकुचिषुः-चुकोचिषुः, चोकुचः ;

कोचितव्यम्, कोचयितव्यम्, चुकुचिषितव्यम्-चुकोचिषितव्यम्, चोकुचितव्यम् ;

कोचनीयम्, कोचनीयम्, चुकुचिषणीयम्-चुकोचिषणीयम्, चोकुचनीयम् ;

कोच्यम्, कोच्यम्, चुकुचिष्यम्-चुकोचिष्यम्, चोकुच्यम् ;

ईषत्कोचः-दुष्कोचः-सुकोचः ; — —

कुच्यमानः, कोच्यमानः, चुकुचिष्यमाणः-चुकोचिष्यमाणः, चोकुच्यमानः ;

1. 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' (1-2-1) इति ङिद्वद्भावात् गुणो न ।
2. 'तुदादिभ्यः शः' (3-1-77) इति शः । उवङ् ।
3. ङिद्वद्भावात् यति गुणो न ।
4. 'ओरावश्यके' (3-1-125) इति ण्यत् । णित्वात् ङित्वं न ।
5. 'कुवः क्रन्' (द. उ. 8-63) इति क्रन् प्रत्ययः । **कुररः**=पक्षिविशेषः ।
6. 'रलो व्युपधात्—' (1-2-26) इति सनः कित्वविकल्पः ।
7. 'उदुपधात्—' (1-2-21) इति निष्ठायाः कित्वविकल्पः ।

A. 'नूत्या किं भयधूतविद्रुतगुवल्लोकं तदा तद्ध्रुवत्-
कोदण्डं **कुवमान**मैक्षि दलितं भोजेश्वराकूतवत् ॥' धा. का. 2-82.

सङ्कोचः, कोचः, चुकुचिषः-चुकोचिषः, चोकुचः ;
कोचितुम्, कोचयितुम्, चुकुचिषितुम्-चुकोचिषितुम्, चोकुचितुम् ;
कुक्तिः, कोचना, चुकुचिषा-चुकोचिषा, चुकोचयिषा, चोकुचा ;
कोचनम्, कोचनम्, चुकुचिषणम्-चुकोचिषणम्, चोकुचनम् ;
[1]कुचित्वा / कोचित्वा } कोचयित्वा, चुकुचिषित्वा-चुकोचिषित्वा, चोकुचित्वा ;
सङ्कुच्य, सङ्कोच्य, सञ्चुकुचिष्य-सञ्चुकोचिष्य, सञ्चोकुच्य ;
कोचम् २, कुचित्वा २, कोचित्वा २, } कोचम् २, कोचयित्वा २, } चुकुचिषम् २-चुकोचिषम् २, चुकुचिषित्वा २-चुकोचिषित्वा २, } चोकुचम् २ ; चोकुचित्वा २. }

(201) "कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु"

(I-भ्वादिः-857. सक. सेट्. पर.) ज्वलादिः ।

'सङ्कोचे कुचतीति स्यात्, कोचेत् सम्पर्चनादिषु ।' (श्लो-54) इति देवः । ज्वलादित्वात् 'ज्वलितिकसन्तेभ्यो णः' (3-1-140) इति कर्तरि वा णः प्रत्ययः । [A]कोचः-कुचः । अनुपसृष्टादेव । उपसृष्टात्तु उत्कोचः । अन्यानि सर्वाणि रूपाणि कुचधातुवत् (200) ज्ञेयानि ।

(202) "कुच सङ्कोचने" (VI-तुदादिः-1368-अक.सेट्.पर. कुटादिः ।)

'सङ्कोचे कुचतीति स्यात्, कोचेत् सम्पर्चनादिषु ।' (श्लो-54) इति देवः ।

कोचकः-चिका, [2]कुचिता-त्री, [3]कुचन्[B]-न्ती-ती, कुचिष्यन्-न्ती-ती, कुक्-कुचौ-कुचः, कुचितम्-तः-तवान्, कुचितव्यम्, कुचनीयम्, कुच्यम्,

1. 'रलो व्युपधात्–' (1-2-26) इति क्त्वायाः कित्वविकल्पनात् पक्षे गुणः ।
2. 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' (1-2-1) इति ङिद्वद्भावान्न गुणः । एवं तव्यदादिष्वपि ज्ञेयम् ।
3. 'तुदादिभ्यः—' (3-1-77) इति शः विकरणप्रत्ययः । तस्य 'सार्वधातुकमपित्' (1-2-4) इति ङिद्वद्भावान्न गुणः ।

A. 'सेहे च रामाजनखेलनं या कुचोरसीदल्परिशद्रुतोया ।
क्रोशर्जनाः कोचगलान् मरालान बोधन्ति यत्राम्बुरुहां विकासे ॥' धा.का. 2-24.
B. 'ततोऽतिकुटिलाशयैः प्रपुटितैः कुचज्जीवितैः गुजद्भिरपि सैनिकैः सुगुडितां डिपद्भिर्जनान् । सुधाच्छुरितविस्फुटस्मितरुचैव धैर्यं मुटन् धनुस्त्रुटनतो मनाक् प्रतुटनाय शालामगात् ॥' धा. का. 2-80.

ईषत्कुचः-दुष्कुचः-सुकुचः, कुच्यमानः, [1]सङ्कोचः, कुचितुम्, [2]निकुचितिः, [3]कोचनम्-सङ्कोचनम्-कुचनम्, [4]कुचित्वा, सङ्कुच्य, कोचम् २, कुचित्वा २; इति शुद्धाद्धातो रूपाणि । ण्यन्तात्-सन्नन्तात्-यङन्ताच्च पूर्वोक्त [200] कुचधातुवद्रूपाणि ज्ञेयानि ।

(203) "कुजु स्तेयकरणे" (I-भ्वादिः-199. सक. सेट्-पर.)

कोजकः-जिका, कोजकः-जिका, [5]चुकुजिषकः-चुकोजिषकः-षिका, चोकुजकः-जिका ;
कोजिता-त्री, कोजयिता-त्री, चुकुजिषिता-चुकोजिषिता-त्री, चोकुजिता-त्री ;
कोजन्-न्ती, कोजयन्-न्ती, चुकुजिषन्-चुकोजिषन्-न्ती ; —
कोजिष्यन्-न्ती-ती, कोजयिष्यन्-न्ती-ती, चुकुजिषिष्यन्-चुकोजिषिष्यन्-न्ती-ती;
— कोजयमानः, कोजयिष्यमाणः, चोकुज्यमानः, चोकुजिष्यमाणः ;
कुक्-कुजौ-कुजः ; — — —
[6]कुक्तम्-तः, कोजितः-तम्, चुकुजिषितः-चुकोजिषितः, चोकुजितः-तवान् ; }

1. 'निष्ठामामनिट इति वक्तव्यम्' (वा. 7-3-52) इति वचनात्, अस्य निष्ठायां सेट्त्वात् 'चजोः—' (7-3-52) इति कुत्वं न भवति ।
2. 'तितुत्रेष्वग्रहादीनामिति वक्तव्यम्' (वा. 7-2-9) इति वचनात्, अस्य ग्रहादित्वात् इड् भवति —इति प्रक्रियासर्वस्वे ।
3. 'कुच सङ्कोचने' इति निर्देशबलात् कुटादित्वेऽपि ल्युटि परं गुणो भवत्येव इति काश्यपः । 'सम्' इत्युपसर्गपूर्वकात् कुचधातोरेव कुटादित्वेऽपि गुणः, अन्यत्र न—इति केचित् । तेषां मते 'कुचनम्' इत्येव । निरुपसृष्टादपि गुण एव इत्यन्ये । तन्मते 'कोचनम्' इति भवति ।
4. 'रलो व्युपधात् हलादेः संश्च' (1-2-26) इति वैकल्पिककित्त्वं बाधित्वा, पूर्वविप्रतिषेधेन 'गाङ्कुटादिभ्यः–' (1-2-1) इति विहितं नित्यङित्त्वमेव भवति । अत एव, 'अनुदात्तङित आत्मनेपदम्' (1-3-12) इत्यत्र 'उपदेशे' इत्यस्य ङिद्देशेऽन्वयस्य सार्थक्यं भवति ।
5. 'रलो व्युपधात्–' (1-2-26) इति सनः कित्त्वविकल्पः । तेन रूपद्वयम् ।
6. क्त्वायां विकल्पितेट्कत्वात् 'यस्य विभाषा' (7-2-15) इति निष्ठायामनिट् कुत्वम् च ।

[1]कुजः, कोजः, चुकुजिषुः-चुकोजिषुः, चुकोजयिषुः, चोकुजः ;
कोजितव्यम्, कोजयितव्यम्, चुकुजिषितव्यम्-चुकोजिषितव्यम्, चोकुजितव्यम् ;
कोजनीयम्, कोजनीयम्, चुकुजिषणीयम्-चुकोजिषणीयम्, चोकुजनीयम् ;
[2]कोग्यम्, कोज्यम्, चुकुजिष्यम्-चुकोजिष्यम्, चोकुज्यम् ;
ईषत्कोजः-दुष्कोजः-सुकोजः ; — —
कुज्यमानः, कोज्यमानः, चुकुजिष्यमाणः-चुकोजिष्यमाणः, चोकुज्यमानः ;
कोगः, कोजः, चुकुजिषः-चुकोजिषः, चोकुजः,
कोजितुम्, कोजयितुम्, चुकुजिषितुम्-चुकोजिषितुम्, चोकुजितुम् ;
कुक्तिः, कोजना, चुकुजिषा-चुकोजिषा, चोकुजा ;
कोजनम्, कोजनम्, चुकुजिषणम्-चुकोजिषणम्, चोकुजनम् ;
[3]कुजित्वा, कोजित्वा, कुक्त्वा, } कोजयित्वा, चुकुजिषित्वा-चुकोजिषित्वा, चोकुजित्वा ;
सङ्कुज्य, सङ्कोज्य, प्रचुकुजिष्य-प्रचुकोजिष्य, प्रचोकुज्य;
कोजम् २, कुजित्वा २, कोजित्वा, २ कुक्त्वा २, } कोजम् २, कोजयित्वा, } चुकुजिषम् २, चुकुजिषित्वा २,
चुकोजिषम् २, चुकोजिषित्वा २, } चोकुजम् २ ; चोकुजित्वा २. }

(204) "कुट कौटिल्ये" (VI-तुदादिः-1366. अक. सेट्.पर. कुटादिः।)

कोटकः-टिका, कोटकः-टिका, [4]चुकुटिषकः-षिका, चोकुटकः-टिका ;

1. 'इगुपधज्ञाप्रीकिरः कः' (3-1-135) इति कर्तरि कः ।
2. निष्ठायामनिट्त्वात् 'चजोः कु घिण्ण्यतोः' (7-3-52) इति ण्यति घञि च कुत्वम् ।
3. 'रलो व्युपधात्–' (1-2-26) इति क्त्वाप्रत्ययस्य कित्त्वविकल्पः । 'उदितोवा' (7-2-56) इति क्त्वायां वा इट् ।
4. 'रलो व्युपधात्–' (1-2-26) इति विहितं वैकल्पिकं कित्त्वं त्वस्य न भवति । 'गाङ्कुटादिभ्यः–' (1-2-1) इति विहितेन ङिद्भावेन पूर्वविप्रतिषेधेन बाधात् । पूर्वविप्रतिषेधाश्रयणे प्रमाणं तु—'अनुदात्तङित–' (1-3-12) इत्यत्र ङिदंशे उपदेशपदसम्बन्ध एव । एवं कुटादिषु सर्वेष्वपि इदुदुपधेषु ङित्त्वमेवेति बोध्यम् ।

[1]कुटिता-त्री, कोटयिता-त्री, चुकुटिषिता-त्री, चोकुटिता-त्री ;
[2]कुटन्-न्ती-ती, कोटयन्-न्ती, चुकुटिषन्-न्ती ; —
कुटिष्यन्-न्ती-ती, कोटयिष्यन्-न्ती-ती, चुकुटिषिष्यन्-न्ती-ती ; —
— कोटयमानः, कोटयिष्यमाणः, चोकुटयमानः, चोकुटिष्यमाणः ;
कुट्-कुटौ-कुटः ; — — —
कुटितम्-तः, कोटितः-तम्, चुकुटिषितः, चोकुटितः-तवान् ;
कुटः, कोटः, चुकुटिषुः, चुकोटयिषुः, चोकुटः ;
कुटितव्यम्, कोटयितव्यम्, चुकुटिषितव्यम्, चोकुटितव्यम् ;
[3]प्रनिकुटनीयम्, कोटनीयम्, चुकुटिषणीयम्, चोकुटनीयम् ;
कोटयम्, कोटयम्, चुकुटिष्यम्, चोकुटयम् ;
ईषत्कुटः-दुष्कुटः-सुकुटः ; — —
कुटयमानः, कोटयमानः, चुकुटिष्यमाणः, चोकुटयमानः ;
कोटः, कोटः, चुकुटिषः, चोकुटः ;
[A]कुटितुम्, कोटयितुम्, चुकुटिषितुम्, चोकुटितुम् ;
कुट्टिः, कुटिः,[4] कोटना, चुकुटिषा, चुकोटयिषा, चोकुटा;
कुटनम्, कोटनम्, चुकुटिषणम्, चोकुटनम् ;
कुटित्वा, कोटयित्वा, चुकुटिषित्वा, चोकुटित्वा ;
प्रकुटय, प्रकोटय, प्रचुकुटिष्य, प्रचोकुटय ;
कोटम् २, कुटित्वा २, } कोटम् २, कोटयित्वा २, } चुकुटिषम् २, चुकुटिषित्वा २, } चोकुटम् २ ; चोकुटित्वा २; }
[5]कुटिलः.[B]

1. 'गाङ्कुटादिभ्यः–' (1-2-1) इति ङित्त्वम् । तेन गुणो न ।
2. 'तुदादिभ्यः शः' (3-1-77) इति शः । 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम् वा।
3. 'शेषे विभाषाऽकखादावषान्त उपदेशे' (8-4-18) इति सूत्रे 'अकखादौ' इति पर्युदासात् णत्वं न ।
4. 'इक् कृष्यादिभ्यः' (वा. 3-3-108) इति भावेऽकर्तरि च कारके इक् । कौटिल्यमर्थः।
5. बाहुलकादिलच् प्रत्ययः ।
A. 'यूयं संकुटितुं यस्मात् कालेऽस्मिन् अध्यवस्यथ ॥' भ. का. 7·91.
B. 'ततोऽतिकुटिलाशयैः प्रपुटितैः कुचज्जीवितैः गुञ्जद्भिरपि सैनिकैः सुगुडितां डिपद्भिर्जनात् ॥' धा. का. 2·80.

(205) " कुट छेदने " (X-चुरादिः-1699. सक. सेट्. आत्म.)

आकुस्मीयः । '—अवक्षेपणे' इति केचित् । [अ]

कोटकः-टिका,	चुकोटयिषकः-षिका[1] ;
कोटयिता-त्री,	चुकोटयिषिता-त्री ;
[2]कोटयमानः,	चुकोटयिषमाणः,
कोटयिष्यमाणः,	चुकोटयिषिष्यमाणः ;
कोट्-कोटौ-कोटः ; —	—
कोटितः-तम् ,	चुकोटयिषितः-तवान् ;
कोटः,	चुकोटयिषुः ;
कोटयितव्यम् ,	चुकोटयिषितव्यम् ;
[3]कोटनीयम् ,	चुकोटयिषणीयम् ;
कोट्यम् ,	चुकोटयिष्यम् ;
ईषत्कोटः-दुष्कोटः-सुकोटः ;	—
कोट्यमानः,	चुकोटयिष्यमाणः ;
कोटः,	चुकोटयिषः ;
कोटयितुम् ,	चुकोटयिषितुम् ;
कोटना,	चुकोटयिषा ;
कोटनम् ,	चुकोटयिषणम् ;
कोटयित्वा,	चुकोटयिषित्वा ;
प्रकोट्य,	प्रचुकोटयिष्य ;
कोटम् २, }	चुकोटयिषम् २ ; }
कोटयित्वा २, }	चुकोटयिषित्वा २. }

1. धातोः अनेकाच्त्वात् 'धातोरेकाच—' (3-1-22) इति यङ् न ।
2. 'आ कुस्मादात्मनेपदिनः' (गणसूत्रम् चुरादौ) इति वचनात् शानजेव ।
3. 'णेरनिटि' (6-4-51) इति णिलोपः ।

[अ] "क्रुट छेदने' इत्यस्य पाठान्तरमिदम् ।

(206) " कुटुम्ब धारणे " (X-चुरादिः-1679. सक. सेट्. आत्म.)

आकुस्मीयः । [अ]

कुटुम्बकः-म्बिका,	चुकुटुम्बयिषकः-षिका ;[1]
कुटुम्बयिता-त्री,	चुकुटुम्बयिषिता-त्री ;
कुटुम्बयमानः,	चुकुटुम्बयिषमाणः ;
कुटुम्बयिष्यमाणः,	चुकुटुम्बयिषिष्यमाणः ;
[2]कुटुम्बितम्-तः,	चुकुटुम्बयिषितः-तवान् ;
कुटुम्बः,	चुकुटुम्बयिषुः ;
कुटुम्बयितव्यम् ,	चुकुटुम्बयिषितव्यम् ;
कुटुम्बनीयम् ,	चुकुटुम्बयिषणीयम् ;
कुटुम्ब्यम् ,	चुकुटुम्बयिष्यम् ;
ईषत्कुटुम्बः-दुष्कुटुम्बः-सुकुटुम्बः ;	—
कुटुम्ब्यमानः,	चुकुटुम्बयिष्यमाणः ;
[3]कुटुम्बः,	चुकुटुम्बयिषः ;
कुटुम्बयितुम् ,	चुकुटुम्बयिषितुम् ;
कुटुम्बना,	चुकुटुम्बयिषा ;
कुटुम्बनम् ,	चुकुटुम्बयिषणम् ;
कुटुम्बयित्वा,	चुकुटुम्बयिषित्वा ;
प्रकुटुम्ब्य,	प्रचुकुटुम्बयिष्य ;
कुटुम्बम् २, }	चुकुटुम्बयिषम् २ ; }
कुटुम्बयित्वा २, }	चुकुटुम्बयिषित्वा २. }

(207) " कुट्ट छेदनभर्त्सनयोः "

(X-चुरादिः-1558. सक. सेट्. उभ.) 'पूरणे' इत्येके ।

कुट्टकः-ट्टिका,	चुकुट्टयिषकः-षिका ;

[अ] 'तत्रि कुटुम्बधारणे' इत्यत्र 'कुटुम्ब' इति पृथग् धातुरिति चान्द्राणां मतेन लिख्यते ।

1. अनेकाच्त्वात् यङ् न ।
2. 'निष्ठायां सेटि' (6-4-52) इति णिलोपः ।
3. कुटुम्ब्यते=धार्यते पोष्यते इति कुटुम्बः=पोष्यवर्गः । कर्मणि घञ् ।

कुट्टयिता-त्री, चुकुट्टयिषिता-त्री ;
कुट्टयन्-न्ती, चुकुट्टयिषन्-न्ती ;
कुट्टयिष्यन्-न्ती-ती, चुकुट्टयिषिष्यन्-न्ती-ती ;
कुट्टयमानः, चुकुट्टयिषमाणः ;
कुट्टयिष्यमाणः, चुकुट्टयिषिष्यमाणः ;
कुट्-कुट्टौ-कुट्टः ; —
कुट्टितम्-तः, चुकुट्टयिषितः-तवान् ;
कुट्टः, [1]कुट्टाकः[A]-कुट्टाकी,[2] चुकुट्टयिषुः ;
कुट्टयितव्यम्, चुकुट्टयिषितव्यम् ;
कुट्टनीयम्, चुकुट्टयिषणीयम् ;
कुट्यम्, चुकुट्टयिष्यम् ;
ईषत्कुट्टः-दुष्कुट्टः-सुकुट्टः ; —
कुट्टयमानः, चुकुट्टयिष्यमाणः ;
कुट्टः, चुकुट्टयिषः ;
कुट्टयितुम्, चुकुट्टयिषितुम् ;
कुट्टना, चुकुट्टयिषा ;
[B]कुट्टनम्, चुकुट्टयिषणम् ;
कुट्टयित्वा, चुकुट्टयिषित्वा ;
सङ्कुट्टय, सञ्चुकुट्टयिष्य ;
कुट्टम् २, } चुकुट्टयिषम् २ ; }
कुट्टयित्वा २, } चुकुट्टयिषित्वा २. }

(208) " कुट्ट प्रतापने " (X-चुरादिः-1703. सक. सेट्. आत्म.)

आकुस्मीयः ।

शत्रादेशं विना धातोरस्य अन्यानि सर्वाण्यपि रूपाणि पूर्वोक्त (207) **कुट्टयति**वद्बोध्यानि ।

---

1. 'जल्पभिक्षकुट्टलुण्ठवृङः षाकन्' (3-2-155) इति ताच्छीलिकः षाकन् प्रत्ययः ।
2. स्त्रियां षित्त्वात् 'षिद्गौरादिभ्यश्च' (4-1-41) इति ङीष् भवति ।

A. 'पट्टाभिषेकमभिलष्यति फालदेशे **कुट्टा**कभावकुतुकं कुरुते स्म भीमः ॥'
भारतचम्पूः 1-83.

B. 'सा पूतना च शिशुभक्षण**कुट्टनो**त्का जघ्ने प्रपुट्टितकृपेण विचुट्टिताघा ।' धा.का.3-16.

(209) " कुठि प्रतीघाते " (I-भ्वादिः-342. सक. सेट्. पर.)

[1]कुण्ठकः-ण्ठिका, कुण्ठकः-ण्ठिका, चुकुण्ठिषकः-षिका, चोकुण्ठकः-ण्ठिका ;
कुण्ठिता-त्री, कुण्ठयिता-त्री, चुकुण्ठिषिता-त्री, चोकुण्ठिता-त्री ;
कुण्ठन्-न्ती, कुण्ठयन्-न्ती, चुकुण्ठिषन्-न्ती ; —
कुण्ठिष्यन्-न्ती-ती, कुण्ठयिष्यन्-न्ती-ती, चुकुण्ठिषिष्यन्-न्ती-ती ;
[2]व्यतिकुण्ठमानः, कुण्ठयमानः, चोकुण्ठ्यमानः ;
व्यतिकुण्ठिष्यमाणः, कुण्ठयिष्यमाणः, चोकुण्ठिष्यमाणः ;
कुन्-कुण्ठौ-कुण्ठः ; — —
कुण्ठितम्-[A]तः, कुण्ठितः-तम्, चुकुण्ठिषितः, चोकुण्ठितः-तवान् ;
कुण्ठः, [3]वैकुण्ठः, कुण्ठः, चुकुण्ठिषुः, चुकुण्ठयिषुः, चोकुण्ठः ;
कुण्ठितव्यम्, कुण्ठयितव्यम्, चुकुण्ठिषितव्यम्, चोकुण्ठितव्यम् ;
कुण्ठनीयम्, कुण्ठनीयम्, चुकुण्ठिषणीयम्, चोकुण्ठनीयम् ;
कुण्ठ्यम्, कुण्ठ्यम्, चुकुण्ठिष्यम्, चोकुण्ठ्यम् ;
ईषत्कुण्ठः-दुष्कुण्ठः-सुकुण्ठः ; — —
कुण्ठ्यमानः, कुण्ठ्यमानः, चुकुण्ठिष्यमाणः, चोकुण्ठ्यमानः ;
कुण्ठः, कुण्ठः, चुकुण्ठिषः, चोकुण्ठः ;
कुण्ठितुम्, कुण्ठयितुम्, चुकुण्ठिषितुम्, चोकुण्ठितुम् ;
कुण्ठा, कुण्ठना, चुकुण्ठिषा, चुकुण्ठयिषा, चोकुण्ठा ;
कुण्ठनम्, कुण्ठनम्, चुकुण्ठिषणम्, चोकुण्ठनम् ;
कुण्ठित्वा, कुण्ठयित्वा, चुकुण्ठिषित्वा, चोकुण्ठित्वा ;
प्रकुण्ठ्य, विकुण्ठ्य, प्रचुकुण्ठिष्य, प्रचोकुण्ठ्य ;
कुण्ठम् २, } कुण्ठम् २, } चुकुण्ठिषम् २, } चोकुण्ठम् २ ; }
कुण्ठित्वा २, } कुण्ठयित्वा २, } चुकुण्ठिषित्वा २, } चोकुण्ठित्वा २. }

---

1. 'इदितो नुम् धातोः' (7-1-58) इति नुम् । ष्टुत्वेन णकारः ।
2. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति कर्मव्यतीहारे आत्मनेपदम् ।
3. विगतः कुण्ठः यस्याः सा **विकुण्ठा** । तस्या अपत्यं **वैकुण्ठः**, शिवाद्यण् । कर्तरि अच् । यद्वा, विकुण्ठ एव **वैकुण्ठः** अप्रतिहतशक्तिक इत्यर्थः । विविधा कुण्ठा माया अस्यास्तीति वा **वैकुण्ठः** ।

A. 'शठत्वमार्गे शुठितैरकुण्ठितैर्लुण्ठिताशुण्ठितसौहृदान्वितैः ।' धा. का. 1-45,

(210) "कुठि वेष्टने" (X-चुरादिः-1584. अक. सेट्. उभ.)

इदित्करणात् णिचो वैकल्पिकत्वम्। प्रायेणायं 'अव' पूर्वकः। [A]अवकुण्ठयन्। 'गुडि वेष्टने' (X-1584) इति धातोः पाठान्तरमिदम्। णिजभावपक्षे पूर्वलिखित (209) कुठिधातुवत्-केवलात् ण्यन्तात् सन्नन्तात् यङन्ताच्च रूपाणि ज्ञेयानि। णिजभावपक्षे 'शेषात् कर्तरि—' (1-3-78) इति परस्मैपदमेव। ण्यन्तात्तु सनि इमानि रूपाणि—

चुकुण्ठयिषकः-षिका, चुकुण्ठयिषिता-त्री, चुकुण्ठयिषन्-न्ती,
चुकुण्ठयिषिष्यन्-न्ती-ती, चुकुण्ठयिषमाणः, चुकुण्ठयिषिष्यमाणः,
चुकुण्ठयिषितः-तवान्, चुकुण्ठयिषुः, चुकुण्ठयिषितव्यम्,
चुकुण्ठयिषणीयम्, चुकुण्ठयिष्यम्, ईषच्चुकुण्ठयिषः —
दुष्चुकुण्ठयिषः-सुचुकुण्ठयिषः, चुकुण्ठयिष्यमाणः, चुकुण्ठयिषः;
चुकुण्ठयिषितुम्, चुकुण्ठयिषा, चुकुण्ठयिषणम्, चुकुण्ठयिषित्वा;
सञ्चुकुण्ठयिष्य, चुकुण्ठयिषम् २, चुकुण्ठयिषित्वा २. इति विशेषः।

(211) "कुड बाल्ये" (VI-तुदादिः–1383.अक. सेट्. पर.) कुटादिः।

'कुट कौटिल्ये' (204) इति धातुवत् सर्वाणि रूपाणि ज्ञेयानि।

(212) "कुडि वैकल्ये" (I-भ्वादिः-322. अक. सेट्. पर.)

'वैकल्यदाहरक्षासु कुण्डेत् कुण्डेत कुण्डयेत्।' (श्लो. 88) इति देवः। 'कुठि प्रतिघाते' (209) इति भौवादिकधातुवत् सर्वाणि रूपाणि ज्ञेयानि।

(213) "कुडि दाहे" (I-भ्वादिः-270. सक. सेट्. आत्म.)

"वैकल्यदाहरक्षासु कुण्डेत् कुण्डेत कुण्डयेत्।' (श्लो. 88) इति देवः। कुण्डमानः, कुण्डयमानः, चुकुण्डिषमाणः, कुण्डिष्यमाणः, कुण्डयिष्यमाणः, चुकुण्डिषिष्यमाणः, चोकुण्ड्यमानः, चोकुण्डिष्यमाणः, इति शानचि रूपाणि- इति विशेषः। अन्यानि रूपाणि सर्वाण्यपि भौवादिककुण्ठतिवत् (209) ज्ञेयानि।

A. 'किञ्च स्वगात्रमवकुण्ठयतो महाहेः दर्पं चुखुण्ड विषमेष मुखाद्विवण्टन्॥' धा. का. 3, 19.

(214) "कुडि रक्षणे" (X-चुरादिः-1583. सक. सेट्. उभ.)

"वैकल्यदाहरक्षासु कुण्डेत् कुण्डेत कुण्डयेत्।' (श्लो-88) इति देवः। सर्वाण्यपि रूपाणि 'कुठि वेष्टने' (210) इति धातुवत् ज्ञेयानि।

(215) "कुण शब्दोपकरणयोः" (VI-तुदादिः-1335. सक. सेट्. पर.)

कुटादिः।

'आमन्त्रणे तु कुणयेत्, शब्दे चोपकृतौ कुणेत्।' (श्लो-93) इति देवः।

'कुट कौटिल्ये' (204) इति तौदादिकधातुवत् शुद्धात् ण्यन्तात् सन्नन्तात् यङन्ताच्च सर्वाणि रूपाणि ज्ञेयानि।

(216) "कुण आमन्त्रणे" (X-चुरादिः-1894. सक. सेट्. उभ.)

अदन्तः।

'आमन्त्रणे तु कुणयेत्, शब्दे चोपकृतौ कुणेत्।' (श्लो-93) इति देवः।

[1]कुणकः-णिका, चुकुणयिषकः-षिका;
कुणयिता-त्री, चुकुणयिषिता-त्री;
[A]कुणयन्-न्ती, चुकुणयिषन्-न्ती;
कुणयिष्यन्-न्ती-ती, चुकुणयिषिष्यन्-न्ती-ती;
कुणयमानः, चुकुणयिषमाणः;
कुणयिष्यमाणः, चुकुणयिषिष्यमाणः;
कुण्-कुणौ-कुणः; —
[2]कुणितम्-तः, चुकुणयिषितः-तवान्;
कुणः, चुकुणयिषुः;
कुणयितव्यम्, चुकुणयिषितव्यम्;
[3]कुणनीयम्, चुकुणयिषणीयम्;
कुण्यम्, चुकुणयिष्यम्;
ईषत्कुणः-दुष्कुणः-सुकुणः; —

1. अतो लोपस्य स्थानिवद्भावात् लघूपधगुणो न।
2. 'निष्ठायां सेटि' (6-4-52) इति णिलोपः।
3. 'णेरनिटि' (6-4-51) इति णिलोपः।
A. 'इत्यूचे स हि केतयन् परिजनान्, सेनापतीन् ग्रामयन्, स्वामात्यान् कुणयन् भटांश्च गुणयन् नृणां मुदं स्तेनयन्॥' धा. का. 3-57.

कुण्यमानः, चुकुणयिष्यमाणः ;
कुणः, चुकुणयिषः ;
कुणयितुम्, चुकुणयिषितुम् ;
कुणना, चुकुणयिषा ;
कुणनम्, चुकुणयिषणम् ;
कुणयित्वा, चुकुणयिषित्वा ;
[1]प्रकुण्य, प्रचुकुणयिष्य ;
कुणम् २, कुणयित्वा २, } चुकुणयिषम् २ ; चुकुणयिषित्वा २. }

(217) "कुत्स अवक्षेपणे" (X-चुरादिः-1698. सक. सेट्. आत्म.)

आकुत्सीयः ।

कुत्सकः-त्सिका, चुकुत्सयिषकः-षिका ;[2]
कुत्सयिता-त्री, चुकुत्सयिषिता-त्री ;
कुत्सयमानः, चुकुत्सयिषमाणः ;
कुत्सयिष्यमाणः, चुकुत्सयिषिष्यमाणः ;
[3]कुत्-कुत्सौ-कुत्सः ; —
[4]कुत्सितम्-तः, चुकुत्सयिषितः-तवान् ;
कुत्सः, [5]कुत्सनः, [6]कौत्सः ; चुकुत्सयिषुः,
कुत्सयितव्यम्, चुकुत्सयिषितव्यम् ;
कुत्सनीयम्, चुकुत्सयिषणीयम् ;
[A]कुत्स्यम्, चुकुत्सयिष्यम् ;
ईषत्कुत्सः-दुष्कुत्सः-सुकुत्सः ; —

---

1. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः ।
2. अनेकाच्त्वाद्धातोः, 'धातोरेकाच—' (3-1-22) इति यङ् न ।
3. 'संयोगान्तस्य लोपः' (8-2-23) इति सकारलोपः ।
4. 'निष्ठायां सेटि' (6-4-52) इति णेर्लोपः ।
5. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति युच् ताच्छीलिकः ।
6. **कुत्सः**=तन्नामा ऋषिः । तस्यापत्यमित्यर्थे ऋष्यण् ।

A. '**कुत्स्या** हि गालनपटा इव कष्टमेते दुष्कीर्तिभालनपराः खलु कूटवृत्त्या ।' धा. का. 3. 36.

कुत्स्यमानः, चुकुत्सयिष्यमाणः ;
कुत्सः, चुकुत्सयिषः ;
कुत्सयितुम्, चुकुत्सयिषितुम् ;
कुत्सना, [1]कुत्सा, चुकुत्सयिषा ;
कुत्सनम्, चुकुत्सयिषणम् ;
कुत्सयित्वा, चुकुत्सयिषित्वा ;
प्रकुत्स्य, प्रचुकुत्सयिष्य ;
कुत्सम् २, कुत्सयित्वा २, } चुकुत्सयिषम् २ ; चुकुत्सयिषित्वा २. }

(218) "कुथ पूतीभावे" (IV-दिवादिः-1118. अक. सेट्. पर.)

पूतीभावः=दौर्गन्ध्यम् इति **सिद्धान्तकौमुदी** । पवित्रीकरणमिति **तत्त्वबोधिनी** ।

'कुथ्नाति कुन्थेत् संक्लेशे, पूतीभावे तु कुथ्यति ॥' (श्लो-38) इति **देवः** ।

कोथकः-थिका, कोथकः-थिका, [2]चुकुथिषकः-चुकोथिषकः-षिका, चोकुथकः-थिका ;

कोथिता-त्री, कोथयिता-त्री, चुकुथिषिता-त्री, चुकोथिषिता-त्री, चोकुथिता-त्री;
[3]कुथ्यन्[A]-[4]न्ती, कोथयन्-न्ती, चुकुथिषन्-चुकोथिषन्-न्ती ; —

---

1. 'यूनश्च **कुत्सायाम्**' (वा. 4-1-165) इत्यत्र निर्देशबलात् ण्यन्तादपि बाहुलकात् भावे स्त्रियामङ् । केचित्तु—'अनित्यण्यन्ताश्चुरादयः' इत्याश्रित्य **कुत्सा**—'**कुत्सितव्यमिदं** ज्ञेयम्—' इत्यादिप्रयोगाणां साधुत्वमाचक्षते । 'चिन्तिपूजिकथिकुम्बिचर्चश्च' (3-3-105) इत्यत्र चकारस्यानुक्तसमुच्चयार्थकत्वात् युजपवादोऽङ्—इति **क्षीरस्वामी** ।
2. 'रलो व्युपधात्—' (1-2-26) इति सनि कित्त्वविकल्पः ।
3. 'दिवादिभ्यः श्यन्' (3-1-69) इति श्यन् । श्यनः शित्त्वात् 'सार्वधातुकमपित्' (1-2-4) इति ङित्त्वम् । तेनाङ्गस्य गुणो न ।
4. 'शप्श्यनोर्नित्यम्' (7-1-81) इति नुम् ।

A. 'तं प्लुष्यद्दृष्टिनृत्यद्रुषमपि च गतत्रासमुत्**कुथ्यद**ङ्गं पोथ्यं प्रोचे स्वरेण स्वजनविगुधितं क्षिप्यता पुष्पमाध्वीम् ॥' धा. का. 2-56.

कोथिष्यन्-न्ती-ती, कोथयिष्यन्-न्ती-ती, चुकुथिषिष्यन्-चुकोथिषिष्यन्-न्ती-ती ;

— कोथयमानः, कोथयिष्यमाणः, चोकुथ्यमानः, चोकुथिष्यमाणः ;

कुत्-कुथ्-कुथौ-कुथः ; — — —

कुथितम्-तः, कोथितः-तम्, चुकुथिषितः-चुकोथिषितः, चोकुथितः-तवान् ;

[1]कुथः, कोथः, चुकुथिषुः-चुकोथिषुः, चोकुथः ;

कोथितव्यम्, कोथयितव्यम्, चुकुथिषितव्यम्-चुकोथिषितव्यम्, चोकुथितव्यम् ;

कोथनीयम्, कोथनीयम्, चुकुथिषणीयम्-चुकोथिषणीयम्, चोकुथनीयम् ;

कोथ्यम्, कोथ्यम्, चुकुथिष्यम्-चुकोथिष्यम्, चोकुथ्यम् ;

ईषत्कोथः-दुष्कोथः-सुकोथः ; — — —

कुथ्यमानः, कोथ्यमानः, चुकुथिष्यमाणः-चुकोथिष्यमाणः, चोकुथ्यमानः ;

कोथः, कोथः, चुकुथिषः-चुकोथिषः, चोकुथः ;

कोथितुम्, कोथयितुम्, चुकुथिषितुम्-चुकोथिषितुम्, चोकुथितुम् ;

कुत्तिः, कोथना, चुकुथिषा-चुकोथिषा, चोकुथा ;

कोथनम् ; कोथनम्, चुकुथिषणम्-चुकोथिषणम्, चोकुथनम् ;

[2]कुथित्वा-कोथित्वा, कोथयित्वा, चुकुथिषित्वा-चुकोथिषित्वा, चोकुथित्वा;

प्रकुथ्य, प्रकोथ्य, प्रचुकुथिष्य-प्रचुकोथिष्य, प्रचोकुथ्य ;

कोथम् २, कुथित्वा २, कोथित्वा २ } कोथम् २, कोथयित्वा २, }

चुकुथिषम् २-चुकोथिषम् २, चुकुथिषित्वा २-चुकोथिषित्वा २, } चोकुथम् २, चोकुथित्वा २. }

(219) "कुथ संश्लेषणे" (IX-क्र्यादिः-1514. अक. सेट्. पर.) [अ]

संक्लेशे—इत्येके । 'कुथ्नाति कुन्थेत् संक्लेशे, पूतीभावे तु कुथ्यति ॥' (श्लो-98) इति देवः ।

कोथकः-थिका, कोथकः-थिका, चुकुथिषकः-चुकोथिषकः-षिका, चोकुथकः-थिका ;

---

1. 'इगुपध—' (3-1-135) इति कर्तरि कः प्रत्ययः । गजपृष्ठस्थितरत्नकम्बलस्य नाम । कुशतृणम् । 'कुथास्तरणतल्पेषु किं स्यात् सुखतरं ततः ।' रामा. 2-30-14.
2. 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पः ।

अ. 'कुन्थ संश्लेषणे' इत्यस्य दुर्गसम्मतः पाठ एवम् ।

इत्यादीनि सर्वाण्यपि रूपाणि पूर्वलिखित (217) कुथधातुवत् ज्ञेयानि । शतरि परं [1]कुथ्नन्-कुथ्नती, इति रूपम् इति विशेषः । विकुथ्य[A] ।

(220) "कुथि हिंसासंक्लेशनयोः" (I-भ्वादिः-43. सक. सेट्. पर.)

'कुथ्नाति कुन्थेत् संक्लेशे, पूतीभावे तु कुथ्यति ।' (श्लो-98) इति देवः ।

[2]कुन्थकः[B]-न्थिका, कुन्थकः-न्थिका, चुकुन्थिषकः-षिका, चोकुन्थकः-न्थिका ;

कुन्थिता-श्री, कुन्थयिता-त्री, चुकुन्थिषिता-त्री, चोकुन्थिता-त्री ;

[3]व्यतिकुन्थन्-न्ती, कुन्थयन्-न्ती, चुकुन्थिषन्-न्ती ; —

कुन्थिष्यन्-न्ती-ती, कुन्थयिष्यन्-न्ती-ती, चुकुन्थिषिष्यन्-न्ती-ती ; —

— कुन्थयमानः, कुन्थयिष्यमाणः, [4]चोकुन्थ्यमानः, चोकुन्थिष्यमाणः ;

[5]कुन्-कुन्थौ-कुन्थः ; — — —

कुन्थितम्-तः, कुन्थितः, चुकुन्थिषितः, चोकुन्थितः-तवान् ;

कुन्थः, कुन्थः, चुकुन्थिषुः, चोकुन्थः ;

कुन्थितव्यम्, कुन्थयितव्यम्, चुकुन्थिषितव्यम्, चोकुन्थितव्यम् ;

कुन्थनीयम्, कुन्थनीयम्, चुकुन्थिषणीयम्, चोकुन्थनीयम् ;

कुन्थ्यम्, कुन्थ्यम्, चुकुन्थिष्यम्, चोकुन्थ्यम् ;

ईषत्कुन्थः-दुष्कुन्थः-सुकुन्थः ; — —

कुन्थ्यमानः, कुन्थ्यमानः, चुकुन्थिष्यमाणः, चोकुन्थ्यमानः ;

कुन्थः, कुन्थः, चुकुन्थिषः, चोकुन्थः ;

---

1. 'क्र्यादिभ्यः श्ना' (3-1-81) इति श्नाप्रत्ययः । 'श्नाभ्यस्तयोरातः' (6-4-112) इत्याकारलोपः । श्नः शित्त्वात् अपित्त्वाच्च 'सार्वधातुकमपित्' (1-2-4) इति ङिद्भावात् अङ्गस्य गुणो न ।
2. 'इदितो नुम् धातोः' (7-1-58) इति नुम् ।
3. 'न गतिहिंसार्थेभ्यः' (1-3-15) इति कर्मव्यतीहारे तङ्निषेधः ।
4. इदित्वात् 'अनिदिताम्—' (6-4-24) इति नलोपो न ।
5. 'संयोगान्तस्य लोपः' (8-2-23) इति थकारलोपः ।

A. 'तद्ग्रन्थनं परिहरन् गतिभिर्विकुथ्य पृष्ठे करोन्मृदितपुच्छमकर्षदेनम् ।' धा. का. 3-10.

B. 'ममन्थ विश्वं सुजनानकुन्थकान् प्रपुन्थ्य बन्धूनपि लुन्थति स्म यः ।' धा. का. 1-7.

कुन्थितुम्, कुन्थयितुम्, चुकुन्थिषितुम्, चोकुन्थितुम् ;
[1]कुन्था, कुन्थना, चुकुन्थिषा, चोकुन्था ;
कुन्थनम्, कुन्थनम्, चुकुन्थिषणम्, चोकुन्थनम् ;
कुन्थित्वा, कुन्थयित्वा, चुकुन्थिषित्वा, चोकुन्थित्वा ;
प्रकुन्थ्य, प्रकुन्थ्य, विचुकुन्थिष्य, सञ्चोकुन्थ्य ;
[2]खड्गोपकुन्थं, खड्गेनोपकुन्थं, खड्गेनोपकुन्थ्य [वा शत्रुं मारयति] ;
कुन्थम् २, कुन्थित्वा २, } कुन्थम् २, कुन्थयित्वा २, } चुकुन्थिषम् २, चुकुन्थिषित्वा २, } चोकुन्थम् २ ; चोकुन्थित्वा २. }

(221) **"कुद्रि अनृतभाषणे"** (X-चुरादिः-1539. सक. सेट्. उभ.)

इदित्त्वाण्णिचो वैकल्पिकत्वम् ।

कुन्द्रकः-न्द्रिका, चुकुन्द्रयिषकः-षिका, [3]कुन्द्रकः-न्द्रिका, चुकुन्द्रिषकः-षिका, चोकुन्द्रकः-न्द्रिका, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक-कुण्ठयतिवत् (210) बोध्यानि ।

(222) **"कुन्च कौटिल्याल्पीभावयोः"**

(I-भ्वादिः-185. सक. सेट्. पर.)

'गतेः कौटिल्ये, द्रव्यस्याल्पत्वे च–' इति **क्षीरस्वामी** । नोपधोऽयं धातुः ।
कुञ्चकः-ञ्चिका, कुञ्चकः-ञ्चिका, चुकुञ्चिषकः-षिका, चोकुञ्चकः-ञ्चिका ;
कुञ्चिता-त्री, कुञ्चयिता-त्री, चुकुञ्चिषिता-त्री, चोकुञ्चिता-त्री ;
कुञ्चन्-न्ती, कुञ्चयन्-न्ती, चुकुञ्चिषन्-न्ती ; —
कुञ्चिष्यन्-न्ती-ती, कुञ्चयिष्यन्-न्ती-ती, चुकुञ्चिषिष्यन्-न्ती-ती ; —
–– कुञ्चयमानः, कुञ्चयिष्यमाणः, चोकुच्यमानः, चोकुञ्चिष्यमाणः ;
कुक्-कुञ्चौ-कुञ्चः ; — — —

1. 'गुरोश्च हलः' (3-3-103) इत्यप्रत्ययः ।
2. 'हिंसार्थानां च समानकर्मकाणाम्' (3-4-48) इति णमुल् । 'तृतीयाप्रभृतीनि—' (2-2-21) इति समासविकल्पः ।
3. णिजभावपक्षे शुद्धाद्धातोः, सनि यङि च क्रमेण रूपाणि ।

[1]निकुचितम्-तः,[A] कुञ्चितः, चुकुञ्चिषितः, चोकुञ्चितः-तवान् ;
कुञ्चः, कुञ्चः, चुकुञ्चिषुः, चोकुञ्चः ;
कुञ्चितव्यम्, कुञ्चयितव्यम्, चुकुञ्चिषितव्यम्, चोकुञ्चितव्यम् ;
कुञ्चनीयम्, कुञ्चनीयम्, चुकुञ्चिषणीयम्, चोकुञ्चनीयम् ;
[2]कुञ्च्यम्, कुञ्च्यम्, चुकुञ्चिष्यम्, चोकुञ्च्यम् ;
ईषत्कुञ्चः-दुष्कुञ्चः-सुकुञ्चः ; — —
[3]कुच्यमानः, कुञ्च्यमानः, चुकुञ्चिष्यमाणः, चोकुञ्च्यमानः ;
कुञ्चः, कुञ्चः, चुकुञ्चिषः, चोकुञ्चः ;
कुञ्चितुम्, कुञ्चयितुम्, चुकुञ्चिषितुम्, चोकुञ्चितुम् ;
कुञ्चा, [4]निकुचितिः, कुञ्चना, चुकुञ्चिषा, चोकुञ्चा ;
कुञ्चनम्, कुञ्चनम्, चुकुञ्चिषणम्, चोकुञ्चनम् ;
[5]कुञ्चित्वा, कुञ्चयित्वा, चुकुञ्चिषित्वा, चोकुञ्चित्वा ;
सङ्कुच्य, सङ्कुञ्च्य, सञ्चुकुञ्चिष्य, सञ्चोकुञ्च्य ;
कुञ्चम् २, कुञ्चित्वा २, } कुञ्चम् २, कुञ्चयित्वा २, } चुकुञ्चिषम् २, चुकुञ्चिषित्वा २, } चोकुञ्चम् २ ; चोकुञ्चित्वा २. }

(223) **"कुन्थ संश्लेषणे"** (IX-क्र्यादिः-1514. सक. सेट्. पर.)

'सङ्क्लेशने' इत्येके । 'कुथ्नाति कुन्थेत् संक्लेशे, पूतीभावे तु कुथ्यति ॥' (श्लो. 98) इति **देवः** ।

1. 'अनिदितां हल—' (6-4-24) इति नलोपः ।
   'नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
   सकारजश्शकारश्चेषाट्टवर्गस्तवर्गजः ॥'
   इति **भाष्योक्त्या** अत्र ञकारः नकारस्थानिकः । तेन नलोपः । सन्निपातपरिभाषाविरोधात् गुणो न, उदुपधत्वसम्पादनद्वारा कित्त्वमुपजीव्य प्रवृत्तो नलोपः अकित्त्वस्य प्रयोजको न भवति ।
2. 'न क्वादेः' (7-3-59) इति, 'निष्ठायामनिट-' (वा-7-3-52) इति वा कुत्वं न ।
3. 'अनिदितां—' (6-4-24) इति नलोपः ।
4. बाहुलकात् 'क्तिन् आबादिभ्यः' (वा. 3-3-94) इति क्तिन्नपि । यद्वा क्तिच् । 'तितुत्रेष्वग्रहादीनामिति वक्तव्यम्' (वा. 7-2-9) इति इण्णिषेधपर्युदासात् इट् भवति । नलोपः ।
5. 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् नलोपो न ।

A. 'चुकोच यत्रोत्कुचिताङ्गमुन्मुदः क्रौञ्चोऽपि लुञ्चन् हृदि सम्यगार्तताम् ॥'
धा. का. 1-25.

कुन्थकः-न्थिका, कुन्थकः-न्थिका, चुकुन्थिषकः-षिका, चोकुन्थकः-न्थिका ;
कुन्थिता-त्री, कुन्थयिता-त्री, चुकुन्थिषिता-त्री, चोकुन्थिता-त्री ;
[1]कुथ्नन्-ती, कुन्थयन्-न्ती, चुकुन्थिषन्-न्ती ; —
कुन्थिष्यन्-न्ती-ती, कुन्थयिष्यन्-न्ती-ती, चुकुन्थिषिष्यन्-न्ती-ती ; —
[2]व्यतिकुथ्नानः, व्यतिकुन्थिष्यमाणः, कुन्थयमानः, कुन्थयिष्यमाणः,
चोकुथ्यमानः, चोकुन्थिष्यमाणः ;
कुत्-कुन्थौ-कुन्थः ; — — —
[3]कुथितम्-तः, कुन्थितः, चुकुन्थिषितः, चोकुन्थितः-तवान् ;
कुन्थः, कुन्थः, चुकुन्थिषुः, चोकुन्थः ;
कुन्थितव्यम्, कुन्थयितव्यम्, चुकुन्थिषितव्यम्, चोकुन्थितव्यम् ;
कुन्थनीयम्, कुन्थनीयम्, चुकुन्थिषणीयम्, चोकुन्थनीयम् ;
कुन्थ्यम्, कुन्थ्यम्, चुकुन्थिष्यम्, चोकुन्थ्यम् ;
ईषत्कुन्थः-दुष्कुन्थः-सुकुन्थः ; — —
कुथ्यमानः, कुन्थ्यमानः, चुकुन्थिष्यमाणः, चोकुन्थ्यमानः ;
कुन्थः, कुन्थः, चुकुन्थिषः, चोकुन्थः ;
कुन्थितुम्, कुन्थयितुम्, चुकुन्थिषितुम्, चोकुन्थितुम् ;
कुन्था, कुन्थना, चुकुन्थिषा, चोकुन्था ;
कुन्थनम्, कुन्थनम्, चुकुन्थिषणम्, चोकुन्थनम् ;
[4]कुथित्वा-कुन्थित्वा, कुन्थयित्वा, चुकुन्थिषित्वा, चोकुन्थित्वा ;
प्रकुथ्य-[A]विकुथ्य, प्रकुन्थ्य, प्रचुकुन्थिष्य, प्रचोकुन्थ्य ;
कुन्थम् २, कुथित्वा २, कुन्थित्वा २, } कुन्थम् २, कुन्थयित्वा २, } चुकुन्थिषम् २, चुकुन्थिषित्वा २, } चोकुन्थम् २ ; चोकुन्थित्वा २.

1. ‘क्र्यादिभ्यः श्ना’ (3-1-81) इति श्ना विकरणप्रत्ययः। श्नः शित्त्वात् अपित्त्वाच्च ङित्त्वात् नलोपः। ‘श्नाभ्यस्तयोः—’ (6-4-112) इत्याकारलोपः।
2. ‘कर्तरि कर्मव्यतीहारे’ (1-3-14) इति आत्मनेपदम्।
3. ‘अनिदितां—’ (6-4-24) इति नलोपः।
4. ‘नोपधात् थफान्ताद्वा’ (1-2-23) इति क्त्वाप्रत्ययस्य कित्त्वविकल्पः।
A. ‘तद्ग्रन्थनं परिहरन् गतिभि**र्विकुथ्य** पृष्ठेऽकरोन्मृदितपुच्छमकर्षदेनम्।’ धा. का. 3-10.

(224) “कुप क्रोधे” (IV-दिवादिः-1233. अक. सेट्. पर.)

‘दिवादेः कुप्यति क्रोधे, भाषायां कोपयेत् कुपेः॥’ (श्लो-136) इति देवः।

कोपकः-पिका, कोपकः-पिका, [1]चुकुपिषकः-चुकोपिषकः-षिका, चोकुपकः-पिका ;
कोपिता-त्री, कोपयिता-त्री, चुकुपिषिता-चुकोपिषिता-त्री, चोकुपिता-त्री ;
[2]कुप्यन्-न्ती, कोपयन्-न्ती, चुकुपिषन्-चुकोपिषन्-न्ती ; —
कोपिष्यन्-न्ती-ती, कोपयिष्यन्-न्ती-ती, चुकु[को]पिषिष्यन्-न्ती-ती ; —
[3]व्यतिकुप्यमानः, कोपयमानः, चोकुप्यमानः;
व्यतिकोपिष्यमाणः, कोपयिष्यमाणः, चोकुपिष्यमाणः ;
कुप्-कुपौ-कुपः ; — — —
कुपितम्-तः कोपितः, चुकुपिषितः-चुकोपिषितः, चोकुपितः-तवान् ;
[4]कुपः, [5]कोपनः[A], प्रकोपी[6], चुकुपिषुः-चुकोपिषुः, चोकुपः,
कोपितव्यम्, कोपयितव्यम्, चुकुपिषितव्यम्-चुकोपिषितव्यम्, चोकुपितव्यम् ;
[7]प्रकोपणीयम् / प्रकोपनीयम् } कोपनीयम्, चुकुपिषणीयम्-चुकोपिषणीयम्, चोकुपनीयम् ;
कोप्यम्, कोप्यम्, चुकुपिष्यम्-चुकोपिष्यम्, चोकुप्यम् ;
ईषत्कोपः-दुष्कोपः-सुकोपः ; — —
कुप्यमानः, कोप्यमानः, चुकुपिष्यमाणः-चुकोपिष्यमाणः, चोकुप्यमानः ;
[B]कोपः, कोपः, चुकुपिषः-चुकोपिषः, चोकुपः ;
कुप्तिः, कोपना, चुकुपिषा-चुकोपिषा, चोकुपा ;

1. ‘रलो व्युपधात्—’ (1-2-26) इति कित्त्वविकल्पः। एवं सन्नन्ते सर्वत्र ज्ञेयम्।
2. ‘दिवादिभ्यः श्यन्’ (3-1-69) इति श्यन्। श्यनः ङित्त्वादङ्गस्य गुणो न।
3. ‘कर्तरि कर्मव्यतीहारे’ (1-3-14) इति कर्मव्यतीहारे शानच्।
4. ‘इगुपधज्ञा—’ (3-1-135) इति कर्तरि कः प्रत्ययः।
5. ‘**क्रुधम**ण्डार्थेभ्यश्च’ (3-2-151) इति ताच्छीलिको युच्।
6. ‘सुप्यजातौ णिनिः—’ (3-2-78) इति ताच्छीलिको णिनिः।
7. हलश्चेजुपधात्’ (8-4-31) इति विभाषा णत्वम्।
A. ‘कुर्वन्ति **कोपनं** तारा मण्डना गगनस्य माम्॥’ भ. का. 7-16.
B. ‘रुष्यद्रिष्यदरातिडेपक विभो **कोपा**दिगोपो न ते
किं चायोप्यविरोपिलोपक न वा लोभादिसंक्षोभिता॥’ धा. का. 2-67.

कोपितुम्, कोपयितुम्, चुकुपिषितुम्-चुकोपिषितुम्, चोकुपितुम् ;
[A] प्रकोपणम्
प्रकोपनम्
} कोपनम्, चुकुपिषणम्-चुकोपिषणम्, चोकुपनम् ;
कुपित्वा-कोपित्वा, कोपयित्वा, चुकुपिषित्वा-चुकोपिषित्वा, चोकुपित्वा ;
प्रकुप्य, प्रकोप्य, प्रचुकुपिष्य-प्रचोकुपिष्य, प्रचोकुप्य ;
कोपम् २
कुपित्वा २ कोपित्वा २ } कोपम् २
कोपयित्वा २ } चुकुपिषम् २-चुकोपिषम् २,
चुकुपिषित्वा २-चुकोपिषित्वा २, }
चोकुपम् २ ;
चोकुपित्वा २. }

(225) "कुप भाषार्थः" (X-चुरादिः-1780. सक. सेट्. उभ.) आस्वदीयः ।

' दिवादेः कुप्यति क्रोधे, भाषार्थे कोपयेत् कुपेः ॥' (श्लो-136) इति देवः । कोपकः-पिका, चुकोपयिषकः-षिका, कोपकः-पिका, चुकुपिषकः-षिका, चोकुपकः-पिका, इति रूपाणि सर्वत्र ज्ञेयानि । 'आ स्वदः सकर्मकात्' (गणसूत्रं चुरादौ) इति वचनेन कर्मान्वयसम्भवे ण्यन्तात्-सनि परे विशेषः । अन्यत्र अकर्मकात् शुद्धाद्धातोः सन्नन्तात् यङन्ताच्च पूर्वलिखित (224) दैवादिककुप्यतिवत् ज्ञेयानि । णिजभावपक्षे 'शेषात् कर्तरि—' (1-3-78) इति परस्मैपदमेव । शतरि कोपन्-न्ती इति रूपम् । ण्यन्तात् सनि तु— चुकोपयिषकः-षिका, चुकोपयिषिता-त्री, चुकोपयिषन्-न्ती, चुकोपयिषिष्यन्-न्ती-ती, चुकोपयिषमाणः, चुकोपयिषिष्यमाणः, चुकोपयिषितः-तवान्, चुकोपयिषुः, चुकोपयिषितव्यम्, चुकोपयिषणीयम्, चुकोपयिष्यम्, ईषच्चुकोपयिषः-दुश्चुकोपयिषः-सुचुकोपयिषः, चुकोपयिष्यमाणः, चुकोपयिषः, चुकोपयिषितुम्, चुकोपयिषा, चुकोपयिषणम्, चुकोपयिषित्वा, प्रचुकोपयिष्य, चुकोपयिषम् २, चुकोपयिषित्वा २, इति रूपाणीति विशेषः ।

(226) "कुबि आच्छादने" (I-भ्वादिः-426. सक. सेट्. पर.)

' णिचि कुंबयतीति स्याच्छादने शपि कुम्बति ॥' (श्लो-140) इति देवः । कुम्बकः-म्बिका, कुम्बकः-म्बिका, चुकुम्बिषकः-षिका, चोकुम्बकः-म्बिका,

A. 'कः कृत्वा रावणामर्षप्रकोपणमवयधीः । ' भ. का. 9-105.

कुम्बिता-त्री, कुम्बयिता-त्री, चुकुम्बिषिता-त्री, चोकुम्बिता-त्री, [A]कुम्बितः ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुठि (209) धातुवज्ज्ञेयानि ।

(227) "कुबि आच्छादने" (X-चुरादिः-1656-सक. सेट्. उभ.)

' णिचि कुम्बयतीति स्यात, छादने शपि कुम्बति ॥' (श्लो. 140) इति देवः ।
' कुभि ' इत्येके ।

स्त्रियां 'चिन्तिपूजिकथिकुम्बिचर्चश्च' (3-3-105) इति युजपवादो अङ्, कुम्बा-इति रूपम् । कुम्बकः-म्बिका, चुकुम्बयिषकः-षिका, कुम्बकः-म्बिका, चुकुम्बिषकः-षिका, चोकुम्बकः-म्बिका, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुण्ठयतिवत् (210) ज्ञेयानि । इदित्करणात् णिचो वैकल्पिकत्वम् ।

(228) "कुमार क्रीडायाम्" (X-चुरादिः-1878. अक. सेट्. उभ. अदन्तः ।)

कुमारकः-रिका, चुकुमारयिषकः-षिका ;
कुमारयिता-त्री, चुकुमारयिषिता-त्री ;
[B]कुमारयन्-न्ती, चुकुमारयिषन्-न्ती ;
कुमारयिष्यन्-न्ती-ती, चुकुमारयिषिष्यन्-न्ती-ती ;
कुमारयमाणः, चुकुमारयिषमाणः ;
कुमारयिष्यमाणः, चुकुमारयिषिष्यमाणः ;
[1]कुमाः-कुमारौ-कुमारः ; —
कुमारितम् - तः, चुकुमारयिषितः-तवान् ;
कुमारः, चुकुमारयिषुः ;
कुमारयितव्यम्, चुकुमारयिषितव्यम् ;
कुमारणीयम्, चुकुमारयिषणीयम् ;
कुमार्यम्, चुकुमारयिष्यम् ;
ईषत्कुमारः - दुष्कुमारः - सुकुमारः ; —
कुमार्यमाणः, चुकुमारयिष्यमाणः ;

1. पदान्तत्वात् 'खरवसानयोर्विसर्जनीयः' (8-3-15) इति विसर्गः ।
A. ' ऊर्ध्वप्रसर्पन्ति तु चर्बिता मही दिक्कुंबितेऽर्के परिलुम्बितुताम्बुजे ॥' धा. का. 1-55.
B. 'यो मत्क्षयं स्पृहयते मयि भामितेऽपि संसूचयत्यरिगुणांश्च मदङ्गखेटी ।
तं क्षोटितौजसमगोमितभूमिबद्धं शत्रौ **कुमारयति** मारयतोग्रसेनम् ॥'
धा. का. 3-55.

कुमारः, चुकुमारयिषः ;
कुमारयितुम्, चुकुमारयिषितुम् ;
कुमारणा, चुकुमारयिषा ;
कुमारयित्वा, चुकुमारयिषित्वा ;
सङ्कुमार्य, सञ्चुकुमारयिष्य ;
कुमारम् २, कुमारयित्वा २, } चुकुमारयिषम् २ ; चुकुमारयिषित्वा २. }

(229) "कुर शब्दे" (VI-तुदादिः-1341. अक. सेट्. पर.)

कोरकः-रिका, कोरकः-रिका, [1]चुकुरिषकः-चुकोरिषकः-षिका, चोकूरकः-रिका ;
कोरिता-त्री, कोरयिता-त्री, चुकुरिषिता-चुकोरिषिता-त्री, चोकुरिता-त्री ;
[2]कुरन्-न्ती-ती, कोरयन्-न्ती, चुकुरिषन्-चुकोरिषन्-न्ती ; —
कोरिष्यन्-न्ती-ती, कोरयिष्यन्-न्ती-ती, चुकुरिषिष्यन्-चुकोरिषिष्यन्-न्ती-ती ;
[3]व्यतिकुरमाणः, कोरयमाणः, — [4]चोकूर्यमाणः ;
व्यतिकोरिष्यमाणः, कोरयिष्यमाणः, — चोकुरिष्यमाणः ;
[5]कूः-कुरौ-कुरः ; — — —
कुरितम्-तः[A], कोरितः, चुकुरिषितः-चुकोरिषितः, चोकुरितः-तवान् ;
[6]कुरः, [7]कोरणः, कोरः, चुकुरिषुः-चुकोरिषुः, चोकुरः ;

---

1. 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पः। एवं क्त्वाप्रत्ययेऽपि।
2. 'तुदादिभ्यः शः' (3-1-77) इति शः। 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम् वा।
3. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानच्।
4. 'हलि च' (8-2-77) इति दीर्घः।
5. 'र्वोरुपधाया दीर्घ इकः' (8-2-76) इति दीर्घे विसर्गः।
6. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कः।
7. 'चलनशब्दार्थादकर्मकाद्युच्' (3-2-148) इति ताच्छीलिकः युच्।

A. 'विघ्नोणनेष्वघुणिता मदघूर्णदक्षाः युद्धे क्षुरानपि खरोत्कुरिताः खुरन्तः ॥' धा. का. 2-76.

कोरितव्यम्, कोरयितव्यम्, चुकुरिषितव्यम्-चुकोरिषितव्यम्, चोकुरितव्यम् ;
कोरणीयम्, कोरणीयम्, चुकुरिषणीयम्-चुकोरिषणीयम्, चोकुरणीयम् ;
कूर्यम्, कोर्यम्, चुकुरिष्यम्-चुकोरिष्यम्, चोकूर्यम् ;
ईषत्कोरः-दुष्कोरः-सुकोरः ; — —
कूर्यमाणः, कोर्यमाणः, चुकुरिष्यमाणः-चुकोरिष्यमाणः, चोकूर्यमाणः ;
कोरः, कोरः, चुकुरिषः-चुकोरिषः, चोकुरः ;
कोरितुम्, कोरयितुम्, चुकुरिषितुम्-चुकोरिषितुम्, चोकुरितुम् ;
कूर्तिः, कोरणा, चुकुरिषा-चुकोरिषा, चोकुरा ;
कोरणम्, कोरणम्, चुकुरिषणम्-चुकोरिषणम्, चोकुरणम् ;
कुरित्वा-कोरित्वा, कोरयित्वा, चुकुरिषित्वा-चुकोरिषित्वा, चोकुरित्वा ;
विकूर्य, विकोर्य, विचुकुरिष्य-विचुकोरिष्य, विचोकूर्य ;
कोरम् २, कुरित्वा २, कोरित्वा २, } कोरम् २, कोरयित्वा २, } चुकुरिषम् २-चुकोरिषम् २, चुकुरिषित्वा २-चुकोरिषित्वा२, }
चोकुरम् २; चोकुरित्वा २. }

(230) "कुर्द क्रीडायामेव" (I-भ्वादिः-21. अक. सेट्. आत्म.) [अ]

[1]कूर्दकः-र्दिका, कूर्दकः-र्दिका, चुकूर्दिषकः-षिका, चोकूर्दकः-र्दिका ;
कूर्दिता-त्री, कूर्दयिता-त्री, चुकूर्दिषिता-त्री, चोकूर्दिता-त्री ;
— कूर्दयन्-न्ती, कूर्दयिष्यन्-न्ती-ती ; —
कूर्दमानः, कूर्दयमानः, चुकूर्दिषमाणः, चोकूर्द्यमानः ;
कूर्दिष्यमाणः, कूर्दयिष्यमाणः, चुकूर्दिषिष्यमाणः, चोकूर्दिष्यमाणः ;
[2]कूर्त्-कूर्द्-कूर्दौ-कूर्दः ; — — —

[अ] एवकारेण धातूनामनेकार्थत्वं प्रतीयते—इति भाष्ये।

1. 'उपधायां च' (8-2-78) इति दीर्घः। 'टु ओ स्फूर्जा वज्रनिर्घोषे' (1-भ्वादिः 235) इत्यत्र, 'स्फुर्जा' इति ह्रस्वनिर्देशेऽपि, 'र्वोरुपधाया दीर्घ इकः' (8-2-76) इति दीर्घे सिद्धे, दीर्घघटितपाठः, 'र्वोरुपधायाः–' (8-2-76) इत्यस्य पाक्षिकत्वे ज्ञापकः। अतः कुर्दकः-कूर्दकः इत्युभयपि रूपं साधु। एवं गुर्दादि (414) धातुष्वपि बोध्यम्, इति केचित्।
2. 'रात् सस्य' (8-2-24) इति नियमात् दकारस्य संयोगान्तलोपो न।

कूर्दितम्-तः, कूर्दितः, चुकूर्दिषितः, चोकूर्दितः-तवान् ;
कूर्दः, [1]कूर्दनः, कूर्दः, चुकूर्दिषुः, चोकूर्दः ;
कूर्दितव्यम्, कूर्दयितव्यम्, चुकूर्दिषितव्यम्, चोकूर्दितव्यम् ;
कूर्दनीयम्, कूर्दनीयम्, चुकूर्दिषणीयम्, चोकूर्दनीयम् ;
कूर्द्यम्, कूर्द्यम्, चुकूर्दिष्यम्, चोकूर्द्यम् ;
ईषत्कूर्दः-दुष्कूर्दः-सुकूर्दः ; — —
कूर्द्यमानः, कूर्द्यमानः, चुकूर्दिष्यमाणः, चोकूर्द्यमान ;
कूर्दः, कूर्दः, चुकूर्दिषः, चोकूर्दः ;
कूर्दितुम्, कूर्दयितुम्, चुकूर्दिषितुम्, चोकूर्दितुम् ;
कूर्दा, कूर्दना, चुकूर्दिषा, चोकूर्दा ;
कूर्दनम्, कूर्दनम्, चुकूर्दिषणम्, चोकूर्दनम् ;
कूर्दित्वा, कूर्दयित्वा, चुकूर्दिषित्वा, चोकूर्दित्वा ;
प्रकूर्द्य, प्रकूर्द्य, प्रचुकूर्दिष्य, प्रचोकूर्दिष्य ;
कूर्दम् २, कूर्दित्वा २, } कूर्दम् २, कूर्दयित्वा २, } चुकूर्दिषम् २, चुकूर्दिषित्वा २, } चोकूर्दम् २; चोकूर्दित्वा २. }

(231) "कुल संस्त्याने बन्धुषु च"

(I-भ्वादिः-842. अक. सेट्. पर.) ज्वलादिः । 'सन्ताने' इत्येके ।

संस्त्यानम्=सङ्घातः । बन्धुशब्देन तद्व्यापारो विवाहादिः लक्ष्यते ।

कोलकः-लिका, कोलकः-लिका, [2]चुकुलिषकः-चुकोलिषकः-षिका, चोकुलकः-लिका ;
कोलिता-त्री, कोलयिता-त्री, चुकुलिषिता-चुकोलिषिता-त्री, चोकुलिता-त्री ;
कोलन्-न्ती, कोलयन्-न्ती, चुकुलिषन्-चुकोलिषन्-न्ती ; —
कोलिष्यन्-न्ती-ती, कोलयिष्यन्-न्ती-ती, चुकुलिषिष्यन्-चुकोलिषिष्यन्-न्ती-ती ;
[3]व्यतिकोलमानः, कोलयमानः, — चोकुल्यमानः ;

1. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति युच् ताच्छीलिकः ।
2. 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पः । एवं क्त्वाप्रत्ययेऽपि ।
3. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानच् ।

व्यतिकोलिष्यमाणः, कोलयिष्यमाणः, — चोकुलिष्यमाणः ;
कुल्-कुलौ-कुलः ; — — —
[1]कुलितम् / कोलितम् } तः, कोलितः, चुकुलिषितः-चुकोलिषितः, चोकुलितः-तवान् ;
[2]कुलः-कोलः, कुलम्, चुकुलिषुः-चुकोलिषुः, चोकुलः ;
कोलितव्यम्, कोलयितव्यम्, चुकुलिषितव्यम्-चुकोलिषितव्यम्, चोकुलितव्यम्,
कोलनीयम्, [3]कोलनीयम्, चुकुलिषणीयम्-चुकोलिषणीयम्, चोकुलनीयम् ;
कोल्यम्, कोल्यम्, चुकुलिष्यम्-चुकोलिष्यम्, चोकुल्यम् ;
ईषत्कोलः-दुष्कोलः-सुकोलः ; — —
कुल्यमानः, कोल्यमानः, चुकुलिष्यमाणः-चुकोलिष्यमाणः, चोकुल्यमानः ;
[4]कोलः, कोलः, चुकुलिषः-चुकोलिषः, चोकुलः ;
कोलितुम्, कोलयितुम्, चुकुलिषितुम्-चुकोलिषितुम्, चोकुलितुम् ;
कुलिः, कोलना, चुकुलिषा-चुकोलिषा, चोकुला ;
कोलनम्, कोलनम्, चुकुलिषणम्-चुकोलिषणम्, चोकुलनम् ;
कुलित्वा / कोलित्वा } कोलयित्वा, चुकुलिषित्वा-चुकोलिषित्वा, चोकुलित्वा ;
प्रकुल्य, प्रकोल्य, प्रचुकुलिष्य-प्रचुकोलिष्य, प्रचोकुल्य ;
कोलम् २, कुलित्वा २-कोलित्वा २, } कोलम् २, कोलयित्वा २, } चुकुलिषम् २, चुकुलिषित्वा २,
[5]कुलालः. {चुकोलिषम् २, चुकोलिषित्वा २, } चोकुलम् २; चोकुलित्वा २ ; }

1. 'उदुपधात् भावादिकर्मणोरन्यतरस्याम्' (1-2-21) इति कित्त्वविकल्पः ।
2. '**ज्वलिति**कसन्तेभ्यो णः' (3-1-140) इति णो वा । णप्रत्ययाभावपक्षे 'इगुपधज्ञा—' (3-1-135) इति कः प्रत्ययः । पचाद्यचोऽपवादः ।
3. 'णेरनिटि' (6-4-51) इति णिलोपः ।
4. 'पुंसि संज्ञायां घः प्रायेण' (3-3-118) इति घः संज्ञायाम् । **कोलो** वराहः ।
5. औणादिके (द. उ. 8-115) कालच् प्रत्यये रूपम् । **कुलालः**=कुम्भकारः ।

(232) "कुशि भाषार्थः" (X-चुरादिः-1766. सक. सेट्. उभ.)

आस्वदीयः[1]।

कुंशकः-शिका, चुकुंशयिषकः-षिका, [1]कुंशकः-शिका, चुकुंशिषकः-षिका, चोकुंशकः-शिका ;

कुंशयिता-त्री, चुकुंशयिषिता-त्री, कुंशिता-त्री, चुकुंशिषिता-त्री, चोकुंशिता-त्री ;

कुंशयन्-न्ती, चुकुंशयिषन्-न्ती, [2]कुंशन्-न्ती, [3]चुकुंशिषन्-न्ती ; —

कुंशयिष्यन्-न्ती-ती, चुकुंशयिषिष्यन्-न्ती-ती, कुंशिष्यन्-न्ती-ती, चुकुंशिषिष्यन्-न्ती-ती ;

कुंशयमानः, चुकुंशयिषमाणः, — चोकुंश्यमानः ;

कुंशयिष्यमाणः, चुकुंशयिषिष्यमाणः, — चोकुंशिष्यमाणः ;

[4]कुन्-कुंशौ-कुंशः ; — — —

कुंशितः, चुकुंशयिषितः-तम्, कुंशितम्-तः, चुकुंशिषितः, चोकुंशितः-तवान् ;

कुंशः, चुकुंशयिषुः, कुंशः, चुकुंशिषुः, चोकुंशः ;

कुंशयितव्यम्, चुकुंशयिषितव्यम्, कुंशितव्यम्, चुकुंशिषितव्यम्, चोकुंशितव्यम् ;

कुंशनीयम्, चुकुंशयिषणीयम्, कुंशनीयम्, चुकुंशिषणीयम्, चोकुंशनीयम् ;

[A]कुंश्यम्, चुकुंशयिष्यम्, कुंश्यम्, चुकुंशिष्यम्, चोकुंश्यम् ;

ईषत्कुंशः-दुष्कुंशः-सुकुंशः ; — — —

कुंश्यमानः, चुकुंशयिष्यमाणः, कुंश्यमानः, चुकुंशिष्यमाणः, चोकुंश्यमानः ;

कुंशः, चुकुंशयिषः, कुंशः, चुकुंशिषः, चोकुंशः ;

---

1. 'आस्वदः सकर्मकात्' (गणसूत्रं चुरादौ) इति, इदित्करणसामर्थ्यात् वा णिचो वैकल्पिकत्वम्। णिजभावपक्षे शुद्धात्-सन्नन्तात्-यङन्ताच्च क्रमेण रूपाणि विलिखितानीति ज्ञेयम्।
2. णिजभावपक्षे 'शेषात् कर्तरि—' (1-3-78) इति परस्मैपदमेव।
3. 'पूर्ववत् सनः' (1-3-62) इति परस्मैपदमेव। तेन सन्नन्तात् शानच् न।
4. 'संयोगान्तस्य—' (8-2-23) इति शकारस्य लोपः।

A. 'कश्चित् कष्टमविंसयत् रणमिमं कुंस्यं त्वया दंश्यतां
नाकुंश्यं परिघाटयेति च परेणोद्घण्टितोऽबृंहयत्।' धा. का. 3-44.

कुंशयितुम्, चुकुंशयिषितुम्, कुंशितुम्, चुकुंशिषितुम्, चोकुंशितुम् ;

कुंशना, चुकुंशयिषा, कुंशा, चुकुंशिषा, चोकुंशा ;

कुंशनम्, चुकुंशयिषणम्, कुंशनम्, चुकुंशिषणम्, चोकुंशनम् ;

कुंशयित्वा, चुकुंशयिषित्वा, कुंशित्वा, चुकुंशिषित्वा, चोकुंशित्वा ;

प्रकुंश्य, प्रचुकुंशयिष्य, प्रकुंश्य, प्रचुकुंशिष्य, प्रचोकुंश्य ;

कुंशम् २, कुंशयित्वा २, } चुकुंशयिषम् २, चुकुंशयिषित्वा २, } कुंशम् २, कुंशित्वा २, } चुकुंशिषम् २, चुकुंशिषित्वा २, } चोकुंशम् २; चोकुंशित्वा २. }

(233) "कुष निष्कर्षे" (IX-क्र्यादिः-1518. सक. सेट्. पर.)

निष्कर्षः=बहिर्निस्सारणम्।

कोषकः-षिका, कोषकः-षिका, [1]चुकुषिषकः-चुकोषिषकः-षिका, [2]निश्चुकुषिषकः-निश्चुकोषिषकः-षिका, निश्चुकुक्षकः-क्षिका, चोकुषकः-षिका;

कोषिता, [3]निष्कोषिता, निष्कोष्टा-ष्ट्री, } त्री, कोषयिता-त्री, चुकुषिषिता-चुकोषिषिता-त्री, निश्चुकुषिषिता-निश्चुकोषिषिता-निश्चुकुक्षिता-त्री, चोकुषिता-त्री ;

[4]कुष्णन्-ती, कोषयन्-न्ती, चुकुषिषन्-चुकोषिषन्-न्ती ;
निश्चुकुषिषन्-निश्चुकोषिषन्-निश्चुकुक्षन्-न्ती ; —

---

1. 'रलो व्युपधात्—' (1-2-26) इति सनः कित्त्वविकल्पः। तेन गुणः कदाचित्, कदाचिन्न भवति। एवं सन्नन्ते सर्वत्र ज्ञेयम्।
2. 'निरः कुषः' (7-2-46) इति '**निर्**' पूर्वकात् कुषेः परस्य वलादेरार्धधातुकस्य इड्विकल्पः। इट्पक्षे कित्त्वं वैकल्पिकम्। तेन रूपद्वयम्। इडभावपक्षे 'हलन्ताच्च' (1-2-10) इत्यनेन कित्त्वात् गुणाभावे '**निश्चुकुक्षकः**' इति रूपम्। एवं निर्पूर्वके सर्वत्र सन्नन्ते रूपत्रयस्योपपत्तिः।
3. 'निरः कुषः' (7-2-46) इति '**निर्**' पूर्वकात् कुषेरार्धधातुकस्येड्विकल्पः। एवं तव्यदादिष्वपि ज्ञेयम्।
4. 'क्र्यादिभ्यः श्ना' (3-1-81) इति श्ना विकरणप्रत्ययः। 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपः। श्नाप्रत्ययस्य सार्वधातुकत्वेन ङिद्वद्भावादङ्गस्य गुणो न। 'रषाभ्यां—' (8-4-1) इति णत्वम्।

कोषिष्यन्, निष्कोषिष्यन्, निष्कोक्ष्यन्-न्ती-ती, कोषयिष्यन्-न्ती-ती, चुकुषिषिष्यन्-चुकोषिषिष्यन्-न्ती-ती; निश्चुकुषिषिष्यन्-निश्चुकोषिषिष्यन्-निश्चुकुक्षिष्यन्-न्ती-ती;

— कोषयमाणः, कोषयिष्यमाणः, चोकुष्यमाणः, चोकुषिष्यमाणः;

कुड्-कुट् कुषौ-कुषः; — — —

कुषितम्-तः, [1]निष्कुषितम्-[A]तः, कोषितः, चुकुषिषितः-चुकोषिषितः, निश्चुकुषिषितः-निश्चुकोषिषितः निश्चुकुक्षितः, चोकुषितः-तवान्;

कुषः, कोषः, चुकुषिषुः, चुकोषिषुः, निश्चुकुषिषुः निश्चुकोषिषुः निश्चुकुक्षुः चोकुषः;

कोषितव्यम्, निष्कोषितव्यम्, निष्कोष्टव्यम्, कोषयितव्यम्, चुकुषिषितव्यम्-चुकोषिषितव्यम्-निश्चुकुषिषितव्यम्-निश्चुकोषिषितव्यम्, निश्चुकुक्षितव्यम्, चोकुषितव्यम्;

कोषणीयम्-कोषणीयम्, चुकुषिषणीयम्-चुकोषिषणीयम्, निश्चुकुषिषणीयम्, निश्चुकोषिषणीयम्, निश्चुकुक्षणीयम्, चोकुषणीयम्;

कोष्यम्, कोष्यम्, चुकुषिष्यम्-चुकोषिष्यम्, निश्चुकुषिष्यम्-निश्चुकोषिष्यम्, निश्चुकुक्ष्यम्, चोकुष्यम्;

ईषत्कोषः-दुष्कोषः-सुकोषः; — —

कुष्यमाणः, कोष्यमाणः, चुकुषिष्यमाणः-चुकोषिष्यमाणः-निश्चुकुषिष्यमाणः-निश्चुकोषिष्यमाणः-निश्चुकुक्ष्यमाणः, चोकुष्यमाणः;

कोषः, कोषः, चुकुषिषः-चुकोषिषः-निश्चुकुषिषः-निश्चुकोषिषः-निश्चुकुक्षः, चोकुषः;

कोषितुम्, निष्कोष्टुम्, निष्कोषितुम्, कोषयितुम्, चुकुषिषितुम्-चुकोषिषितुम्-निश्चुकुषिषितुम्-निश्चुकोषिषितुम्-निश्चुकुक्षितुम्, चोकुषितुम्;

---

1. 'यस्य विभाषा' (7-2-15) इति इण्णिषेधे प्राप्ते 'इण्णिष्ठायाम्' (7-2-47) इति नित्यमिट्।

A. '**निष्कोषितव्यान् निष्कोष्टुं** प्राणान् दशमुखात्मजात्।
आदाय परिघं तस्थौ बनान्निष्**कुषित**द्रुमः ॥' भ. का. 9-30.

कुष्टिः, कोषणा, चुकुषिषा-चुकोषिषा-निश्चुकुषिषा-निश्चुकोषिषा-निश्चुकुक्षा, चोकुषा;

कोषणम्, कोषणम्, चुकुषिषणम्-चुकोषिषणम्-निश्चुकुषिषणम्-निश्चुकोषिषणम्-निश्चुकुक्षणम्, चोकुषणम्;

[1]कुषित्वा[A], कोषयित्वा, चुकुषिषित्वा-चुकोषिषित्वा, चोकुषित्वा;

निकुष्य, [B]विकुष्य, निष्कोष्य, संचुकुषिष्य-संचुकोषिष्य-निश्चुकुषिष्य-निश्चुकोषिष्य-निश्चुकुक्ष्य, निश्चोकुष्य;

कोषम् २, कुषित्वा २, कोषम् २, कोषयित्वा २, चुकुषिषम् २, चुकोषिषम् २, चुकुषिषित्वा २, चुकोषिषित्वा २, निश्चुकुषिषम् २, निश्चुकोषिषम् २, निश्चुकुक्षम् २, — चोकुषम् २; चोकुषित्वा २.

(234) "कुस संश्लेषणे" (IV-दिवादिः-1218. अक. सेट्. पर.)

'कुश—' इति दुर्गः।

कोसकः-सिका, कोसकः-सिका, [2]चुकुसिषकः-चुकोसिषकः-षिका, चोकुसकः-सिका;

कोसिता-त्री, कोसयिता-त्री, चुकुसिषिता-चुकोसिषिता-त्री, चोकुसिता-त्री;

[3]कुस्यन्[C]-न्ती, कोसयन्-न्ती, चुकुसिषन्-चुकोसिषन्-न्ती; —

कोसिष्यन्-न्ती-ती, कोसयिष्यन्-न्ती-ती, चुकुसिषिष्यन्-चुकोसिषिष्यन्-न्ती-ती;

---

1. क्त्वायां 'रलो व्युपधात्—' (1-2-26) इति प्राप्तं वैकल्पिकं कित्वं बाधित्वा, 'मृडमृदगुधकुष—' (1-2-7) इति नित्यं कित्त्वम्।
2. 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पः। एवं क्त्वायामपि।
3. 'दिवादिभ्यः श्यन्' (3-1-69) इति श्यन्।

A. 'बभूव याऽधिशैलेन्द्रं मृदित्वेवेन्द्रगोचरम्।
कुषित्वा जगतां सारं सैका शङ्के कृता भुवि ॥' भ. का. 7-95.

B. 'तद्ग्रन्थनं परिहरन् गतिभिर्विकुथ्य पृष्ठे करोन्मृदितपुच्छमकर्षदेनम्।
भूयो निपात्य मृडितस्वजनः स गुध्नन् दन्तौ **विकुष्य** गजमुत्क्षुभितं व्यनभ्नात् ॥' धा. का. 3-10.

C. 'अस्तायासविजस्तविश्वतसनो निर्दस्तवासैर्नुतः
वेदव्योषकृदप्लुषः विसितधी**कुस्यज्ज**नांहोबुसम्।' धा. का. 2-66.

[1]व्यतिकुस्यमानः, कोसयमानः, — चोकुस्यमानः ;
व्यतिकोसिष्यमाणः, कोसयिष्यमाणः, — चोकुसिष्यमाणः ;
[2]कूः-कुसौ-कुसः ; — —
कुसितम्-तः, [3]कुसितायी, कोसितः, चुकुसिषितः-चुकोसिषितः, चोकुसितः-तवान् ;
कुसः, [4]कुशः, कोसः, चुकुसिषुः-चुकोसिषुः, चोकुसः ;
कोसितव्यम्, कोसयितव्यम्, चुकुसिषितव्यम्-चुकोसिषितव्यम्, चोकुसितव्यम् ;
कोसनीयम्, कोसनीयम्, चुकुसिषणीयम्-चुकोसिषणीयम्, चोकुसनीयम् ;
कोस्यम्, कोस्यम्, चुकुसिष्यम्-चुकोसिष्यम्, चोकुस्यम् ;
ईषत्कोसः-दुष्कोसः-सुकोसः ; — —
कुस्यमानः, कोस्यमानः, चुकुसिष्यमाणः-चुकोसिष्यमाणः-चोकुस्यमानः ;
कोसः, कोसः, चुकुसिषः-चुकोसिषः, चोकुसः ;
कोसितुम्, कोसयितुम्, चुकुसिषितुम्-चुकोसिषितुम्, चोकुसितुम् ;
कुसितिः, कोसना, चुकुसिषा-चुकोसिषा, चोकुसा ;
कोसनम्, कोसनम्, चुकुसिषणम्-चुकोसिषणम्, चोकुसनम् ;
कुसित्वा / कोसित्वा } कोसयित्वा, चुकुसिषित्वा-चुकोसिषित्वा, चोकुसित्वा ;
प्रकुस्य, प्रकोस्य, प्रचुकुसिष्य-प्रचुकोसिष्य, प्रचोकुस्य ;
कोसम् २, कुसित्वा-कोसित्वा २, } कोसम् २, कोसयित्वा २, } चुकुसिषिम् २-चुकोसिषम् २, चुकुसिषित्वा २-चुकोसिषित्वा २, } चोकुसम् २; चोकुसित्वा २. }

---

1. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानच् ।
2. 'ससजुषो रुः' (8-2-66) इति रुत्वे, 'र्वोरुपधाया दीर्घ इकः' (8-2-76) इति दीर्घः ।
3. 'वृषाकप्यग्निकुसितकुसिदानामुदात्तः' (4-1-37) इति प्रकृतेः ऐकारः ङीप् च पुंयोगे । **कुसितः**=वृद्धयाजीवी, तत्पत्नी **कुसितायी** ।
4. तालव्यान्तपाठे पचाद्यच् (3-1-134) । **कुशः**=दर्भः ।

(235) **"कुसि भाषार्थः"** (X-चुरादिः-1764. सक. सेट्. उभ.)

आस्वदीयः ।

'कुशि भाषार्थः' (232) इति पूर्वलिखितचौरादिकधातुवत्सर्वाण्यपि रूपाणि ज्ञेयानि । पचाद्यचि-भ्रुकुंसः-भ्रकुंसः-इति रूपे । 'भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः' **इत्यमरः** । भ्रुवा कुंसयति=भाषयतीति **भ्रुकुंसः** । स्त्रीवेषधारी नर्तकः ।

(236) **"कुस्म कुत्सितस्मयने"** (X-चुरादिः-1712. अक. सेट्. आत्म.)

आकुस्मीयः ।

[1]कुस्मकः-स्मिका, चुकुस्मयिषकः-षिका ;
कुस्मयिता-त्री, चुकुस्मयिषिता-त्री ;
[2]कुस्मयमानः[A], [3]चुकुस्मयिषमाणः ;
कुस्मयिष्यमाणः, चुकुस्मयिषिष्यमाणः ;
[4]कूः-कुस्मौ-कुस्मः ; —
[5]कुस्मितम्-तः-तवान्, चुकुस्मयिषितः-तवान् ;
कुस्मः, [6]कुस्मनः, चुकुस्मयिषुः ;
कुस्मयितव्यम्, चुकुस्मयिषितव्यम् ;
कुस्मनीयम्, चुकुस्मयिषणीयम् ;
कुस्म्यम्, चुकुस्मयिष्यम् ;
ईषत्कुस्मः-दुष्कुस्मः-सुकुस्मः ; —
कुस्म्यमानः, चुकुस्मयिष्यमाणः ;

---

1. 'णेरनिटि' (6-4-51) इति णिलोपः ।
2. 'आकुस्मादात्मनेपदिनः' (गणसूत्रं चुरादौ) इति आत्मनेपदमेव ।
3. 'पूर्ववत् सनः' (1-3-62) इति आत्मनेपदम् ।
4. णिलोपे मकारस्य संयोगान्तलोपे, सकारस्य रुत्वे, 'र्वोरुपधायाः'—(8-2-76) इति दीर्घे विसर्गे च रूपम् । प्रातिपदिकाण्णिजुत्पत्तौ तु णिलोपटिलोपयोः सतोः मकारस्य संयोगान्तलोपः, दीर्घविसर्गौ च ।
5. 'निष्ठायां सेटि' (6-4-52) इति णिलोपः ।
6. 'अनुदात्तेतश्च हलादेः (3-2-149) इति युच् ताच्छीलिकः ।

A. 'इत्यादि वाग्शतदेवनमध्य एव लोकः समालपद्गारितकृष्णवीर्यः ।
कंसस्त्ववेदयमतिर्भयमानितोऽपि निर्यविनः कुयुधि **कुस्मयमान** आस्त ॥'
धा. का. 3-37.

कुस्मः,	चुकुस्मयिषः ;
कुस्मयितुम्,	चुकुस्मयिषितुम् ;
कुस्मना,	चुकुस्मयिषा ;
कुस्मनम्,	चुकुस्मयिषणम् ;
कुस्मयित्वा,	चुकुस्मयिषित्वा ;
प्रकुस्म्य,	प्रचुकुस्मयिष्य ;
कुस्मम् २, कुस्मयित्वा २,	चुकुस्मयिषम् २ ; चुकुस्मयिषित्वा २.

'कुस्म नाम्नो वा' (गणसूत्रं चुरादौ) इति पठ्यते। '—'कुस्म' इति धातुः कुत्सितस्मये वर्तते।' इति दुर्गमैत्रेयौ। तदनुसारेण ण्यन्तात्, ण्यन्तप्रकृतिकसन्नन्ताच्च सर्वाणि रूपाणि प्रदर्शितानि। गणसूत्रस्य एवमर्थाभ्युपगमे 'नाम्नः' इत्यस्य वैयर्थ्यमापतति। तदर्थं—"अथ वा, 'कुस्म' इति प्रातिपदिकात् धात्वर्थे णिज्भवति।" इति बहुभिर्व्याख्यातम्। तत्र पक्षे णिचः प्रातिपदिकप्रकृतिकत्वेन, आर्धधातुकत्वं नास्ति। अतः 'अतो लोपः' (6-4-48) इति लोपो न भवति। किन्तु—'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च' (गणसूत्रं चुरादौ) इति इष्ठवद्भावातिदेशेन प्रातिपदिकान्त्यस्य अकारस्य लोपो वक्तव्यः। एवं सति, कुस्मकः-स्मिका, चुकुस्मयिषकः-षिका, इत्यादीनि सर्वाण्यपि रूपाणि पुरस्तात् लिखितदिशा ज्ञेयानि। अर्थभेदः परमुभयोर्विद्यते—'कुस्म' धातोः कुत्सितस्मयनमात्रस्य प्रतीतिः। प्रातिपदिकप्रकृतिकण्यन्तस्य तु कुत्सितस्मयनकर्मककरणप्रतीतिः—इति विशेषः। न चैवं सति 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च' (ग. सू. चुरादौ) इत्येव णिचि सिद्धे सति, अत्र पाठस्य वैयर्थ्यमाशङ्क्यम्। 'प्रातिपदिकाद् धात्वर्थे—' (ग. सू. चुरादौ) इति णिजुत्पत्तौ पदद्वयं स्यात्। अत्र पाठात् तु आकुस्मीयत्वेन आत्मनेपदमेवेति विशेषः।

(237) "कुह विस्मापने" (X-चुरादिः-1901. सक. सेट्. आत्म.)

अदन्तः, आगर्वीयः।

[1]कुहकः[A]-हिका,	चुकुहयिषकः-षिका ;

1. अदन्तत्वात 'अतो लोपः' (6-4-48) इति अलोपस्य स्थानिवद्भावाल्लघूपधगुणो न। एवं सर्वत्रापि।

A. 'द्रष्टॄणां कुहकोऽथ स्मरयितृभिः स्तुत्योऽसिना वीरयां-
चक्रे स्थूलितभीतिरर्थितवधः सत्राशनैर्गर्वितैः॥' धा. का. 3-58.

कुहयिता-त्री,	चुकुहयिषिता-त्री ;
[1]कुहयमानः,	चुकुहयिषमाणः ;
कुहयिष्यमाणः,	चुकुहयिषिष्यमाणः ;
[2]कुट्-कुड्-कुहौ-कुहः ;	—
[3]कुहितम्-तः,	चुकुहयिषितः-तवान् ;
कुहः,	चुकुहयिषुः ;
कुहयितव्यम्,	चुकुहयिषितव्यम् ;
[4]कुहनीयम्,	चुकुहयिषणीयम् ;
कुह्यम्,	चुकुहयिष्यम् ;
ईषत्कुहः-दुष्कुहः-सुकुहः ;	—
कुह्यमानः,	चुकुहयिष्यमाणः ;
कुहः,	चुकुहयिषः ;
कुहयितुम्,	चुकुहयिषितुम् ;
कुहना,	चुकुहयिषा ;
कुहनम्,	चुकुहयिषणम् ;
कुहयित्वा,	चुकुहयिषित्वा ;
[5]सङ्कुहय्य,	सञ्चुकुहयिष्य ;
कुहम् २, कुहयित्वा २,	चुकुहयिषम् २ ; चुकुहयिषित्वा २;
[6]कुहूः.	

1. 'आगर्वादात्मनेपदिनः' (गणसूत्रं चुरादौ) इत्यात्मनेपदम्।
2. 'हो ढः' (8-2-31) इति ढत्वे जश्त्वचर्त्वयोश्च रूपम्।
3. 'निष्ठायां सेटि' (6-4-52) इति णिलोपः।
4. 'णेरनिटि' (6-4-51) इति णिलोपः।
5. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः।
6. 'नृतिशृध्योः कूः' (द. उ. 1-174) इत्यत्र बाहुलकादस्मादपि धातोः कूप्रत्यये कुहूः='—सा नष्टेन्दुकला कुहूः।' इत्यमरः। 'कुहूः स्त्री कोकिलालापनष्टेन्दुकलदर्शयोः।' इति अमरसुधायाम्।

(238) "कूङ् शब्दे" (VI-तुदादिः-1401. अक.सेट्. आत्म.) कुटादिः । [अ]

'अव्यक्तशब्दे कवते, कुवते त्वार्तशब्दने । कौतीति शब्दमात्रे स्यात्—' (श्लो-23) इति देवः ।

कावकः-विका, कावकः-विका, [1]चूकूषकः-षिका, चोकूयकः-यिका ;
[2]कुविता-त्री, कावयिता-त्री, चुकूषिता-त्री, चोकूयिता-त्री ;
—, कावयन्-न्ती, कावयिष्यन्-न्ती-ती ; —
[3]कुवमानः,[A] कावयमानः, चुकूषमाणः, चोकूयमानः ;
कुविष्यमाणः, कावयिष्यमाणः, चुकूषिष्यमाणः, [4]चुकावयिषिष्यमाणः, चोकूयिष्यमाणः ;
[5]कूः-कुवौ-कुवः ; — — —
[A]आकूतम्-[6]कूनम्-तः, कावितम्, चुकूषितः, चुकावयिषितः, चोकूयितः-तवान् ;
कुवः, [7]कुवनः, कावः, चुकूषुः, चुकावयिषुः, चोकुवः ;
कुवितव्यम्, कावयितव्यम्, चुकूषितव्यम्, चोकूयितव्यम् ;
कुवनीयम्, कावनीयम्, चुकूषणीयम्, चोकूयनीयम् ;
[8]कूयम्, [9]अवश्यकाव्यम्, काव्यम्, चुकूष्यम्, चोकूय्यम् ;
ईषत्कुवः दुष्कुवः-सुकुवः ; — —

[अ] 'कुङ् शब्दे' (199) इति धातोः कैयटहरदत्तादिमतानुसारेण पाठभेदोऽयम् ।
1. 'इको झल्' (1-2-9) इति सनः कित्वम् । 'सनि ग्रहगुहोश्च' (7-2-12) इति इण्णिषेधः ।
2. 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' (1-2-1) इति ङित्वाद्गुणाभावः । 'अचि श्नु—' (6-4-77) इत्युवङ् ।
3. 'तुदादिभ्यः शः' (3-1-77) इति शः । शस्य ङित्वादङ्गस्योवङ् ।
4. णिच्यच आदेशो न स्यात् द्वित्वे कर्तव्ये—'पुयण्जि—' इति ज्ञापकात् ; तस्मादभ्यासे उकारश्रवणम् ।
5. प्रथमैकवचने सुप्रत्ययस्य रुत्वे विसर्गः ।
6. 'श्र्युकः किति' (7-2-11) इतीण्णिषेधः । एवं क्त्वायामपि । क्तिन्यप्येवमेव ।
7. 'चलनशब्दार्थादकर्मकाद्युच्' (3-2-148) इति ताच्छीलिको युच् ।
8. कुटादित्वप्रयुक्तङिद्वद्भावाद्गुणो न ।
9. 'ओरावश्यके' (3-1-125) इति ण्यत् ।
A. 'नूत्या किं भयधूतविद्रुतगुवल्लोकं तदा तद्ध्रुव-
स्कोदण्डं कुवमानमैक्षि दलितं भोजेश्वराकूतवत् ॥' धा. का. 2-82.

कूयमानः, काव्यमानः, चुकूष्यमाणः, चोकूय्यमानः ;
[1]कुवः, कावः, चुकूषः, चुकावयिषः, चोकूयः ;
कुवितुम्, कावयितुम्, चुकूषितुम्, चोकूयितुम् ;
आकूतिः, कावना, चुकूषा, चुकावयिषा, चोकूया ;
कुवनम्, कावनम्, चुकूषणम्, चोकूयनम् ;
कूत्वा, कावयित्वा, चुकूषित्वा, चोकूयित्वा ;
प्रकूय, प्रकाव्य, प्रचुकूष्य, प्रचोकूय्य ;
कावम् २, कूत्वा २, } कावम् २, कावयित्वा २, } चुकूषम् २, चुकूषित्वा २, } चोकूयम् २ ; चोकूयित्वा २. }

(239) "कूज अव्यक्ते शब्दे" (I-भ्वादिः-223. अक. सेट्. पर.)

कूजकः-जिका, कूजकः-जिका, चुकूजिषकः-षिका, चोकूजकः-जिका ;
कूजिता-त्री, कूजयिता-त्री, चुकूजिषिता-त्री, चोकूजिता-त्री ;
[A]कूजन्-न्ती, कूजयन्-न्ती, चुकूजिषन्-न्ती ; —
कूजिष्यन्-न्ती-ती, कूजयिष्यन्-न्ती-ती, चुकूजिषिष्यन्-न्ती-ती ; —
[2]व्यतिकूजमानः, कूजयमानः, —, चोकूज्यमानः ;
व्यतिकूजिष्यमाणः, कूजयिष्यमाणः, —, चोकूजिष्यमाणः ;
[3]कूक्-कूग्-कूजौ-कूजः ; — —
कूजितम्-तः, कूजितः, चुकूजिषितः, चोकूजितः-तवान् ;
कूजः, [4]कूजनः, कूजः, चुकूजिषुः, चोकूजः ;
कूजितव्यम्, कूजयितव्यम्, चुकूजिषितव्यम्, चोकूजितव्यम् ;
कूजनीयम्, कूजनीयम्, चुकूजिषणीयम्, चोकूजनीयम् ;
[5]कूज्यम्, कूज्यम्, चुकूजिष्यम्, चोकूज्यम् ;
ईषत्कूजः-दुष्कूजः-सुकूजः ; — —

1. 'ऋदोरप्' (3-3-57) इत्यप् भावे ।
2. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति आत्मनेपदम् । तेन शानच् ।
3. 'चोः कुः' (8-2-30) इति पदान्ते कुत्वम् ।
4. 'चलनशब्दार्थादकर्मकाद्युच्' (3-2-148) इति ताच्छीलिको युच् ।
5. निष्ठायां सेट्त्वात् कुत्वं न ।
A. 'प्रध्रज्य मोदं स दधूज तद्गनं ध्वजोद्गतिध्वजितकूजनदण्डजम् ।' धा. का. 1-30.

कूज्यमानः, कूज्यमानः, चुकूजिष्यमाणः, चोकूज्यमानः ;
कूजः, कूजः, चुकूजिषः, चोकूजः ;
कूजितुम् , कूजयितुम् , चुकूजिषितुम् , चोकूजितुम् ;
कूजा, कूजना, चुकूजिषा, चुकूजयिषा, चोकूजा ;
कूजनम् , कूजनम् , चुकूजिषणम् , चोकूजनम् ;
कूजित्वा, कूजयित्वा, चुकूजिषित्वा, चोकूजित्वा ;
सङ्कूज्य, प्रकूज्य, प्रचुकूजिष्य, प्रचोकूज्य ;
कूजम् २, कूजित्वा २, } कूजम् २, कूजयित्वा २, } चुकूजिषम् २, चुकूजिषित्वा २, } चोकूजम् २ ; चोकूजित्वा २. }

(240) **"कूट आप्रदाने"** (X-चुरादिः-1702. अक. सेट्. आत्म.)

आकुस्मीयः । 'अवसादने'—इत्येके ।

'कूटयेताप्रसादे णौ कूटेः, दाहे तु कूटयेत् ।' (श्लो-75) इति **देवः** ।

कूटकः-टिका, चुकूटयिषकः-षिका ;
कूटयिता-त्री, चुकूटयिषिता-त्री ;
[1]कूटयमानः, [2]चुकूटयिषमाणः ;
कूटयिष्यमाणः, चुकूटयिषिष्यमाणः ;
कूट्-कूटौ-कूटः ; —
कूटितम्-तः, चुकूटयिषितः-तवान् ;
कूटः, चुकूटयिषुः ;
कूटयितव्यम् , चुकूटयिषितव्यम् ;
कूटनीयम् , चुकूटयिषणीयम् ;
कूट्यम् , चुकूटयिष्यम् ;
ईषत्कूटः-दुष्कूटः-सुकूटः ; —
कूट्यमानः, चुकूटयिष्यमाणः ;
[A]कूटः, [3]साङ्कूटिनम् , चुकूटयिषः ;

---

1. '**आ कुस्मा**दात्मनेपदिनः' इति गणसूत्रं चुरादौ । तेन शानजेव ।
2. 'पूर्ववत् सनः' (1-3-62) इत्यात्मनेपदम् ।
3. 'अभिविधौ भाव इनुण्' (3-3-44) इतीनुण् । 'अण् इनुणः' (5-4-15) इति नित्यमण् तद्धितः । 'इनण्यनपत्ये' (6-4-164) इत्यनेन प्रकृतिभावः ।

A. 'कुत्स्या हि गालनपदा इव कष्टमेते दुष्कीर्तिभालनपराः खलु **कूट**वृत्त्या ।' धा. का. 3-36.

कूटयितुम् , चुकूटयिषितुम् ;
कूटना, चुकूटयिषा ;
कूटनम् , चुकूटयिषणम् ;
कूटयित्वा, चुकूटयिषित्वा ;
सङ्कूट्य, सञ्चुकूटयिष्य ;
कूटम् २, कूटयित्वा २, } चुकूटयिषम् २ ; चुकूटयिषित्वा २. }

(241) **"कूट परितापे"** (X-चुरादिः-1891. अक. सेट्-उभ.)

'कूड' इति हरदत्तः । '**परिदाहे**–' इत्यन्ये । **अदन्तः कथादिः ।**

'कूटयेताप्रसादे णौ, कूटेर्दाहे तु कूटयेत् ।' (श्लो-75) इति **देवः** ।

कूटयन्-न्ती, चुकूटयिषन्-न्ती, कूटयिष्यन्-न्ती-ती, चुकूटयिषिष्यन्-न्ती-ती, इति शतृप्रत्ययेऽधिकोऽत्रेति विशेषः । अन्यानि सर्वाण्यपि रूपाणि पूर्वलिखित (240) **चौरादिककूटयतिवज्ज्ञेयानि** ।

संकूटिनं वर्तते । समन्ताद् दाह इत्यर्थः । **'अभिविधौ भाव इनुण्'** (3-3-44) इति इनुणि, इनुणन्तात् 'अण् इनुणः' (5-4-15) इति अण् तद्धितप्रत्ययः । आदिवृद्धिः । '**सङ्कूटनम्** इत्यपि ल्युटा समावेश इष्यते, 'भावे' इति वर्तमाने पुनर्भावग्रहणात् ।' इति **भाष्यम्** । इनुणन्तः स्वभावात् नपुंसके वर्तते इति **काशिका** ।

(242) **"कूण सङ्कोचे"** (X-चुरादिः-1689. सक. सेट्. आत्म.) **आकुस्मीयः ।**

कूणकः-णिका, चुकूणयिषकः-षिका, इत्यादीनि सर्वाण्यपि रूपाणि 'कूट आप्रदाने' (240) इति धातुवत् ज्ञेयानि ।

(243) **"कूण सङ्कोचने"** (X-चुरादिः-1896-अक. सेट् उभ.)

कूणयन्-न्ती, कूणयिष्यन्-न्ती-ती, चुकूणयिषन्-न्ती-ती, चुकूणयिषिष्यन्-न्ती-ती, इति शतृप्रत्ययेऽधिकोऽत्रेति विशेषः । अन्यानि सर्वाण्यपि रूपाणि 'कूट आप्रदाने' (240) इति **चौरादिकधातुवज्ज्ञेयानि** ।

(244) **"कूल आवरणे"** (I.भ्वादिः-525. सक. सेट्. पर.)

कूलकः-लिका, कूलकः-लिका, चुकूलिषकः-षिका, चोकूलकः-लिका ;

कूलिता-त्री	कूलयिता त्री,	चुकूलिषिता-त्री,	चोकूलिता-त्री ;
कूलन्-न्ती,	कूलयन्-न्ती,	चुकूलिषन्-न्ती ;	—
कूलिष्यन्-न्ती-ती,	कूलयिष्यन्-न्ती-ती,	चुकूलिषिष्यन्-न्ती-ती ;	—
[1]व्यतिकूलमानः,	कूलयमानः,	—	चोकूल्यमानः ;
व्यतिकूलिष्यमाणः,	कूलयिष्यमाणः,	—	चोकूलिष्यमाणः ;
कूल्-कूलौ-कूलः ;	—	—	—
कूलितम्-तः,	कूलितः,	चुकूलिषितः,	चोकूलितः-तवान् ;
[2]कूलः, [3]सन्मार्गसङ्कूली,[A]	कूलः,	चुकूलिषुः,	चोकूलः ;
कूलितव्यम्,	कूलयितव्यम्,	चुकूलिषितव्यम्,	चोकूलितव्यम् ;
कूलनीयम्,	कूलनीयम्,	चुकूलिषणीयम्,	चोकूलनीयम् ;
कूल्यम्,	अनुकूल्यम्,	चुकूलिष्यम्,	चोकूल्यम् ;
ईषत्कूलः-दुष्कूलः-सुकूलः ;		—	—
कूल्यमानः,	कूल्यमानः,	चुकूलिष्यमाणः,	चोकूल्यमानः ;
कूलः,	[4] कुकूलम्, (तुषाग्निः)	कूलः, चुकूलिषः,	चोकूलः ;
कूलितुम्,	कूलयितुम्,	चुकूलिषितुम्,	चोकूलितुम् ;
कूला,	कूलना,	चुकूलिषा,	चोकूला ;
कूलनम्,	कूलनम्,	चुकूलिषणम्,	चोकूलनम् ;
कूलित्वा,	कूलयित्वा,	चुकूलिषित्वा,	चोकूलित्वा ;
अनुकूल्य,	प्रतिकूल्य,	सञ्चुकूलिष्य,	प्रचोकूल्य ;
कूलम् २, कूलित्वा २,	कूलम् २, कूलयित्वा २,	चुकूलिषम् २, चुकूलिषित्वा २,	चोकूलम् २ ; चोकूलित्वा २.

1. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति आत्मनेपदम्। शानच्।
2. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कः। यद्वा 'हलश्च' (3-3-121) इति संज्ञायां घञ्।
3. 'सुप्यजातौ णिनिस्ताच्छील्ये' (3-2-78) इति णिनिः।
4. 'कृञादीनां द्वे च' (वा. 6-1-12) इति वार्तिके चकारात् घञर्थे कप्रत्यये, द्वित्वे च रूपम्। **कुकूलम्** = तुषाग्निः। —इति **क्षीरतरङ्गिणी**।

A. 'सन्मार्गसङ्कूलिषु शूलदायिनं दहन्तमेनांसि च तूलपूलवत्।' धा. का. 1-68.

(245) "कृञ् हिंसायाम्" (V-स्वादिः-1253. सक. अनि. उभ.)

'हिंसाकरणयोः श्नावौ कृणोति कृणुते कृञः।
करोति कुरुते द्वे द्वे सम्पद्येते पदे क्रमात्॥' (श्लो-31) इति देवः।

कारकः-रिका,	कारकः-रिका,	[1]चिकीर्षकः-र्षिका,	[2]चेक्रीयकः-यिका ;
कर्ता-त्री,	कारयिता-त्री,	चिकीर्षिता-त्री,	चेक्रीयिता-त्री ;
[3]कृण्वन्-ती,	कारयन्-न्ती,	चिकीर्षन्-न्ती ;	—
[4]करिष्यन्-न्ती-ती,	कारयिष्यन्-न्ती-ती,	चिकीर्षिष्यन्-न्ती-ती ;	—
कृण्वानः,	कारयमाणः,	चिकीर्षमाणः,	चेक्रीयमाणः ;
करिष्यमाणः,	कारयिष्यमाणः,	चिकीर्षिष्यमाणः,	चेक्रीयिष्यमाणः ;
[5]कृत्-कृतौ-कृतः ;	—	—	—
[A]कृतम्-तः-तवान्,	कारितः,	चिकीर्षितः,	चेक्रीयितः-तवान् ;
करः,	कारः,	चिकीर्षुः,	चेक्रियः ;
कर्तव्यम्,	कारयितव्यम्,	चिकीर्षितव्यम्,	चेक्रीयितव्यम् ;
करणीयम्,	कारणीयम्,	चिकीर्षणीयम्,	चेक्रीयणीयम् ;
कार्यम्,	कार्यम्,	चिकीर्ष्यम्,	चेक्रीय्यम् ;
ईषत्करः-दुष्करः-सुकरः ;		—	—
[6]क्रियमाणः,	कार्यमाणः,	चिकीर्ष्यमाणः,	चेक्रीय्यमाणः ;
कारः,	कारः,	चिकीर्षः,	चेक्रीयः ;
कर्तुम्,	कारयितुम्,	चिकीर्षितुम्,	चेक्रीयितुम् ;
कृतिः, [7]कारा,	कारणा,	चिकीर्षा,	चेक्रिया ;

1. 'इको झल्' (1-2-9) इति कित्त्वम्। 'अज्झनगमां सनि' (6-4-16) इति दीर्घः। 'ऋत इद्धातोः' (7-1-100) इतीत्त्वम्। रपरत्वम्।
2. 'रीङृतः' (7-4-27) इति रीङ्। गुणोऽभ्यासस्य।
3. 'स्वादिभ्यः श्नुः' (3-1-73) इति श्नुः विकरणप्रत्ययः। 'हुश्नुवोः सार्वधातुके' (6-4-87) इति यण्। णत्वम्।
4. 'ऋद्धनोः स्ये' (7-2-70) इतीट्।
5. 'ह्रस्वस्य पिति कृति तुक्' (6-1-71) इति तुक्।
6. 'रिङ् शयग्लिङ्क्षु' (7-4-28) इति रिङ्।
7. 'कारा बन्धने' (ग. सू. 3-3-104) इति भिदादिपाठादङ्।

A. 'कुब्जा कृतारिबलमैक्षत वृण्वती सा पात्रं समीरधुतसौरभधूतभृङ्गम्॥' धा. का. 2-68.

करणम्, कारणम्, चिकीर्षणम्, चेक्रीयणम् ;
कृत्वा, कारयित्वा, चिकीर्षित्वा, चेक्रीयित्वा ;
विकृत्य, विकार्य, प्रचिकीर्ष्य, प्रचेक्रीय्य ;
कारम् २, } कारम् २, } चिकीर्षम् २, } चेक्रीयम् २ ; }
कृत्वा २, } कारयित्वा २, } चिकीर्षित्वा २, } चेक्रीयित्वा २. }

(246) **"डु कृञ् करणे"** (VIII-तनादिः-1472-सक. अनि. उभ.)

'हिंसाकरणयोः श्नावौ कृणोति कृणुते कृञः ।
करोति कुरुते द्वे द्वे सम्पद्येते पदे क्रमात् ॥' (श्लो-31) इति **देवः** ।

अयं धातुः भ्वादिगणेऽपि पठ्यते । तेन करति, करते इति रूपद्वयमपि साधु—इति **क्षीरस्वामी** मन्यते । अत एव, कस्याञ्चिदुणादिवृत्तौ 'करति, कृणोति, करोतीति वा **कारुः**' इति कारुशब्दव्युत्पादनं कृतं सङ्गच्छते । **पुरुषकारो**ऽप्यस्यानुकूलः । अन्ये तु बहवः भ्वादिपाठं नाभ्युपगच्छन्ति । अत एव, **न्यासग्रन्थे** 'कः करत्**करति**—' (8-3-50) इत्यत्र, 'करतिरिति छान्दसत्वात् व्यत्ययेन शप् ।' इति प्रोक्तम् । यदि भ्वादिपाठोऽभिमतः स्यात्, तदा शपो व्यत्ययकल्पनमसङ्गतं भवेत् । अत एव, **देवः** श्नुप्रत्यये, उप्रत्यये च साधुत्वमभ्युपैति ।

कारकः-रिका, कारकः-रिका, [1]चिकीर्षकः-र्षिका, [2]चेक्रीयकः-यिका ;
कर्ता-र्त्री, कारयिता-त्री, चिकीर्षिता-त्री, चेक्रीयिता-त्री ;
[3]कुर्वन्, [A]उपकुर्वन्, (चित्तं)[4] विकुर्वन्, [5]अनुकुर्वन्,

---

1. 'अज्झनगमां सनि' (6-4-16) इति दीर्घे, 'इको झल्' (1-2-9) इति सनः कित्त्वे, 'ऋत इद् धातोः' (7-1-100) इति इत्त्वे रपरत्वे, 'सन्यङोः' (6-1-9) इति द्वित्वादिकम् ।
2. 'रिङ् शयग्लिङ्क्षु' (7-4-28) इति रिङादेशे, द्वित्वे, 'गुणो यङ्लुकोः' (7-4-82) इत्यभ्यासस्य गुणे, 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः ।
3. '**तनादिकृञ्भ्य** उः' (3-1-79) इत्युप्रत्यये, गुणे, 'अत उत् सार्वधातुके' (6-4-110) इत्युत्वे, उप्रत्ययस्य यणादेशः ।
4. 'वेः शब्दकर्मणः' (1-3-34) इत्यत्र 'शब्दकर्मणः' इत्युक्तत्वादत्र न शानच् ।
5. 'अनुपराभ्यां **कृञः**' (1-3-79) इति शतृप्रत्ययः ।

A. '**उपकुर्वन्तमत्यर्थं प्रकुर्वाणो**ऽनुजीविवत् ॥' भ. का.8-18.

[A]पराकुर्वन्-ती, कारयन्-न्ती, चिकीर्षन्-न्ती ;
[1]करिष्यन्-न्ती-ती, कारयिष्यन्-न्ती-ती, चिकीर्षिष्यन्-न्ती-ती ;
कुर्वाणः, ([2]दोषम्) उत्कुर्वाणः, (श्येनो वर्तिकाम्) उदाकुर्वाणः, (हरिम्) उपकुर्वाणः, (परदारान्) प्रकुर्वाणः, (एधो दकस्य) [3]उपस्कुर्वाणः, (गाथाः) प्रकुर्वाणः, (शतं) प्रकुर्वाणः, ([4]शत्रुम्) अधिकुर्वाणः, ([5]स्वरान्) [B]विकुर्वाणः, ([6]सैन्धवः) विकुर्वाणः, कारयमाणः, चिकीर्षमाणः, चेक्रीयमाणः, [7]संचेस्क्रीयमाणः ; [C]करिष्यमाणः, कारयिष्यमाणः, चिकीर्षिष्यमाणः, चेक्रीयिष्यमाणः ; [D]सुकृत्-[8] कर्मकृत्- [E]पापकृत्-मन्त्रकृत्-पुण्यकृत्, [9]शास्त्रकृत्-भाष्यकृत्- कृतौ-कृतः ; — —

---

1. '**ऋद्धनोः** स्ये' (7-2-70) इतीडागमः स्यप्रत्ययस्य ।
2. 'गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु **कृञः**' (1-3-32) इत्यनेन सूचनादिषु सप्तस्वर्थेषु गम्यमानेषु शानज् विधीयते । **गन्धनम्**=सूचनम् । **अवक्षेपणम्**=भर्त्सनम् । **सेवनम्**=भजनम् । **साहसिक्यम्**=बलात्कारेण प्रवर्तनम् । **प्रतियत्नः**=गुणाधानम् । **प्रकथनम्**=प्रकर्षेण कथनम् । **उपयोगः**=धर्मार्थं विनियोगः । '**दोषमुत्कुर्वाणः**' इत्यारभ्य, '**शतं प्रकुर्वाणः**' इत्यन्तानि क्रमेणोदाहरणानि बोध्यानि ।
3. 'उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु च' (6-1-139) इति सुट् । '**कृञः** प्रतियत्ने' (2-3-53) इत्यनेन '**एधोदकस्य**' इत्यत्र षष्ठी ।
4. 'अधेः प्रसहने' (1-3-33) इति शानच् । **प्रसहनम्**=क्षमा, अभिभवश्च ।
5. 'वेः शब्दकर्मणः' (1-3-34) इति शानच् ।
6. 'अकर्मकाच्च' (1-3-35) इति शानच् । [इति कात् पूर्वः सुट् ।
7. 'संपरिभ्यां **करोतौ** भूषणे' (6-1-137) इति सुट् । 'सुट् कात् पूर्वः' (6-1-135)
8. 'सुकर्मपापमन्त्रपुण्येषु **कृञः**' (3-2-89) इति स्वादिषु भूते कर्तरि क्विप् । तुक् ।
9. 'सुकर्म–' (3-2-89) इति सूत्रे उपपदनियमाभावात्, 'क्विप् च' (3-2-76) इति क्विपि '**शास्त्रकृत्**' इत्यादेस्सिद्धिः ।

A. 'ता हनूमान् **पराकुर्वन्** अगमत् पुष्पकं प्रति ।
विमानं मन्दरस्याद्रे**रनुकुर्वदिव** श्रियम् ॥' भ. का. 8-50.

B. 'योऽपचक्रे वनात् सीताम् अधिचक्रे न यं हरिः ।
विकुर्वाणः स्वरानद्य बलं तस्य निहन्म्यहम् ॥' भ. का. 8-20.

C. '**करिष्यमाणं** विज्ञेयं **कार्यं** किं नु कृतं परैः ।' भ. का-5-9.

D. '**सुकृतं प्रियकारी** त्वं कं रहस्युपतिष्ठसे ।
पुण्यकृद्याटुकारस्ते किङ्करः सुरतेषु कः ॥' भ. का. 5. 68.

E. '**पापकृत् सुकृतां** मध्ये राज्ञः **पुण्यकृतः** सुतः ।
मामपापं दुराचार ! **किं निहत्या**भिधास्यसि ॥' भ. का. 6-127.

कृतम्-कृतः-कृतवान्, [1]ओजसाकृतम्-सहसाकृतम्-अम्भसाकृतम्-तमसाकृतम् , [2]अञ्जसाकृतम् , [3]उपस्कृताः (ब्राह्मणाः), [4]परिष्कृता (कन्या), [5]उपस्कृतं (भुङ्क्ते), उपस्कृतं (ब्रूते), कारितम्, [A]चिकीर्षितः, चेक्रीयितः-तवान्, [6]करः, [7]क्षेमकरः, [8]किङ्करः-किङ्करा-किङ्करी-यत्करः-यत्करा-तत्करः-तत्करा-[9]तस्करः-तस्करा-बहुकरः-बहुकरा, [10]कुम्भकारः, अन्धकारः, [11]सत्यङ्कारः, [B]अगदङ्कारः, [12]अस्तुङ्कारः, [13]शङ्करः[C]-शङ्करा-शङ्करी,

---

1. 'ओजस्सहोऽम्भस्तमसः तृतीयायाः' (6-3-3) इति तृतीयायाः अलुक् भवति ।
2. 'अञ्जस उपसंख्यानम्' (वा. 6-3-3) इति तृतीयाया अलुक् ।
3. 'समवाये च' (6-1-138) इति सुट् । **उपस्कृताः**=सङ्घीभूताः इत्यर्थः ।
4. सुटः, '**परि**निविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्' (8-3-70) इति षत्वम् ।
5. विकृतं भुङ्क्ते, वाक्याध्याहारेण ब्रवीति, इति क्रमेणार्थः । 'उपात् **प्रतियत्न-वैकृतवाक्याध्याहारेषु** च' (6-1-139) इति सुट् ।
6. 'शिवशमरिष्टस्य **करे**' (4-4-143), 'कर्मणि **घटो**ऽठच्' (5-2-35) इति निर्देशाभ्यां, पचादेः (3-1-134) आकृतिगणत्वं बोध्यते । तेन सर्वेभ्यो धातुभ्योऽच् प्रत्ययो भवति ।
7. पचाद्यचि (3-1-134) **गङ्गाधरभूधरा**दिवत् षष्ठीसमासे साधुः । अत एव, 'अल्पारम्भः **क्षेमकरः**' इति प्रयोग उपपद्यते ।
8. 'किंयत्तद्बहुषु **कृञो**ऽज्विधानम्' (वा. 3-2-21) इति अच् । 'दिवा-विभा—' (3-2-21) इति प्राप्तस्य टप्रत्ययस्यापवादः । तेन स्त्रियां टाप् । **किङ्करी** इति प्रयोगस्तु पुंयोगे बोध्यः ।
9. 'तद्बृहतोः **करप**त्योः चोरदेवतयोः सुट् तलोपश्च' (गणसूत्रम् 6-1-157) इत्यनेन सुट् तलोपश्च चोरे वाच्ये । अन्यत्र **तत्कर** इत्येव । बहुप्रवृत्तिकृत् **बहुकरः** । बहुशब्दः वैपुल्यवाची, न तु संख्यावाची, अत्रैव सूत्रे (3-2-21) **संख्या**ग्रहणात् ।
10. 'कर्मण्यण्' (3-2-1) इत्यण् ।
11. 'कर्मण्यण्' (3-2-1) इत्यणि, '**कारे सत्यागदस्य**' (6-3-70) इति पूर्वपदस्य मुम् । **अगदङ्कारः**=चिकित्सकः ।
12. कर्मण्यणि 'अस्तोश्च' (वा. 6-3-70) इति मुम् ।
13. '**शमि** धातोः संज्ञायाम्' (3-2-14) इति अच् । स्त्रियां टाप् । '**शङ्करा**' नाम परिव्राजिका । पुंयोगे ङीषि '**शङ्करी**' इत्यपि साधु ।

A. '**चिकीर्षिते** पूर्वतरं स तस्मिन् **क्षेमङ्करे**ऽर्थे मुहुरीर्यमाणः ।' भ. का. 12-6.
B. '**अगदङ्कार**मादध्वं प्रज्ञामृतमनुत्तमम् ॥' **यादवाभ्युदये**—22-22.
C. 'बलिनावमुमद्रीन्द्रं युवां स्तम्बेरमाविव ।
   आचक्षाथामिथः कस्मात् **शङ्करेणा**पि दुर्गमम् ॥' भ. का. 6-92.

[1]यशस्करः[A] यशस्करी (विद्या) शोककरः-दर्वीकरः-[B]त्रासकरी, ज्योतिष्करः-क्रीडाकरः-श्राद्धकरः,वचनकरः-कार्यकरः, [2]पारस्करः (देशः), [3]मस्करः (वेणुः), [4]दिवाकरः[C]-विभाकरः-[D]निशाकरः-[E]प्रभाकरः-[5]भास्करः[F]-कारकरः-कारस्करः (वृक्षः), अन्तकरः-अनन्तकरः-आदिकरः-नान्दीकरः-लिपिकरः -लिबिकरः-बलिकरः-भक्तिकरः-कर्तृकरः-चित्रकरः-क्षेत्रकरः-[6]एककरः- [द्विकरः-त्रिकरः-]

---

1. '**कृञो** हेतुताच्छील्यानुलोम्येषु' (3-2-20) इति टप्रत्ययः । टित्वात् स्त्रियां ङीप् । 'अतः **कृकमि**—' (8-3-46) इति विसर्गस्य सत्वम् । 'हेतौ **यशस्करी** विद्या-शीले **क्रीडाकरो** हरिः । आनुलोम्ये **कार्यकरः** सचिवो भूपतेरिति ॥' इति **प्रक्रियासर्वस्वे** । **आनुलोम्यम्**=आराध्यचित्तानुवर्तनम् ।
2. '**पारस्कर**प्रभृतीनि च संज्ञायाम्' (6-1-157) इति सुट् । **पारस्करः**=देश-विशेषः ।
3. **मकर**शब्दोऽव्युत्पन्नं प्रातिपदिकम् । वेणौ वाच्ये '**मस्करमस्करिणौ** वेणु-परिव्राजकयोः' (6-1-154) इति सुट् निपात्यते । केचित्तु—माङ्युपपदे **करोतेः** करणेऽच् प्रत्ययं निपातयन्ति । माङो ह्रस्वत्वं सुट् च ; मा क्रियते—येन प्रतिषिध्यते स **मस्करो** वेणुः ।—इति **काशिका** ।
4. 'दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्र-क्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुःषु' (3-2-21) इति टः प्रत्ययः । '**दिवाकरः**' इत्यारभ्य, '**अरुष्कर**' इति यावदेवं ज्ञेयम् । दिवा=दिवसे प्राणिनः चेष्टायुक्तान् करोतीति **दिवाकरः** ।
5. 'कस्कादिषु च' (8-3-48) इति सूत्रे गणपाठात् सत्वम् ।
6. 'दिवाविभा—' (3-2-21) इति सूत्रे **संख्या**शब्देन संख्यावाचिनाम् **एकद्वि**त्रा-दीनां ग्रहणम् ।

A. 'अस्यन् **अरुष्करान्** बाणान् **ज्योतिष्कर**समद्युतिः ।
   यशस्करो यशस्कामं कपिं बाणैरताडयत् ॥' भ. का. 9. 65.
B. 'स्थितां क्षितौ शान्तशिखाप्रतानां तारामिव **त्रासकरीं** जनस्य ॥' भ-का-12.3.
C. 'अहम**न्तकरो** नूनं ध्वान्तस्येव **दिवाकरः** ।
   तव राक्षस ! रामस्य नेयः **कर्मकरो**पमः ॥' भ. का. 5. 99.
D. 'भुजगेशि **निशाकरा**भिरामे
   द्विषतां **शोककरे** तदाऽवतीर्णे ॥' वा. वि. 2. 67.
E. 'कृशानुरपधूमत्वात् प्रसन्नत्वात् **प्रभाकरः** ।
   रक्षो**विप्रकृता**वास्तामपविद्धशुचाविव॥' **रघुवंशे**-10-74.
F. 'सलिलार्द्रवराहदेहनीलो विदध**द्भास्करमर्थ**शून्यसंज्ञम् ।
   प्रचलायतलोचनारविन्दं विदधे तद्वलमन्ध**मन्धकारः** ॥'
   शिशुपालवधे 20-33.

[1]जङ्घाकर:- [2]बाहुकर:- [3]अहस्कर:- [4]धनुष्कर:-अरुष्कर:, [5]कर्मकर:-कर्मकार:, [6]शब्दकार:-श्लोककार:· कलहकार:-गाथाकार:-[A]वैरकार:-चाटुकार:-सूत्रकार: -मन्त्रकार: पदकार:, [7]स्तम्बकरि: (व्रीहि:)-शकृत्करि: (वत्स:), स्तम्बकार:-शकृत्कार:, [8]मेघङ्कर:[B]-ऋतिङ्कर:-भयङ्कर:, अभयङ्कर:, [9]शिवङ्कर:, [10]क्षेमङ्कर: [C]प्रिय-

---

1. ' **जङ्घाकर:** ' इत्यत्र जङ्घाशब्देन लक्षणया तत्साध्यवेगो लक्ष्यते ।
2. ' **बाहुकर:** ' इत्यत्र बाहुशब्देन बाहुसाध्या गति:, प्रवृत्तिर्वा बोध्यते ।
3. 'कस्कादिषु च' (8-3-48) इति सूत्रे गणपाठात् सत्वम् । तेन जिह्वामूलीयो न भवति ।
4. ' **धनुष्कर: अरुष्कर:** ' इत्यत्र 'नित्यं समासेऽनुत्तरपदस्थस्य' (8-3-45) इति षत्वम् ।
5. ' कर्मणि भृतौ ' (3-2-22) इति ट: । भृतिं य: सेवते स **कर्मकर:** ; अन्यत्र **कर्मकार:** ।
6. ' न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु ' (3-2-23) इति हेत्वादिषु प्राप्तस्य टप्रत्ययस्य निषेधात् औत्सर्गिक: अण् । एवं ' **पदकार** ' इति पर्यन्तं ज्ञेयम् ।
7. ' स्तम्बशकृतोरिन् ' (3-2-24) इति इन् प्रत्यय: । ' व्रीहिवत्सयोरिति वक्तव्यम् ' (वा. 3-2-24) इति वार्तिकात् **स्तम्बकरि:** व्रीहि:—**शकृत्करि:** वत्स: । अन्यत्र **स्तम्बकार: शकृत्कार:** इति ।
8. ' मेघर्तिभयेषु कृञ: ' (3-2-43) इति खच् । खित्वात् ' अरुर्द्विषदजन्तस्य—' (6-3-67) इति पूर्वपदस्य मुम् । ' भयाढ्यादिषु तदन्तविधि: ' (**भाष्यम्**— (1-1-72) इति **भाष्यात्** ' **अभयङ्कर:** ' इत्यपि साधु: ।
9. ' शिव एको ध्येय: **शिवङ्कर:** '—इत्याथर्वणोपनिषदि श्रूयते । छान्दसत्वात् बहुलग्रहणेन खचि रूपनिष्पत्तिरिति **पदमञ्जरी** । ' **क्षेमङ्करो**ऽरिष्टताति: शिवताति: **शिवङ्कर:** । ' **इत्यभिधानरत्नमाला** (2-185) ।
10. ' क्षेमप्रियमद्रेऽण् च ' (3-2-44) इति खजणौ ।

A. ' यो **वैरकार:** स्वयमेव गोष्वभूत् तृणेढि नो स स्म **शकृत्करी**नपि ।
नासीदकालेऽप्यफलेग्रहिर्द्रुमस्तदर्तव: **कर्मकरा** इवाभवन् ॥ ' वा. वि. 2-68.

B. ' **मेघङ्कर**मिवायान्तमृतुं रामं क्लमान्वित: ।
दृष्ट्वा मेने न सुग्रीवो वालिभानुं **भयङ्करम्** ॥ ' भ. का. 6. 104.

C. ' महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम ।
पितु: **प्रियङ्करो** भर्ता **क्षेमकारस्त**पस्विनाम् ॥
निहन्ता **वैरकाराणां** सतां **बहुकर:** सदा ।
पारश्वधिकरामस्य शक्तेरन्**तकरो** रणे ॥ ' भ. का. 5-77-78.

ङ्कर:-मद्रङ्कर:, क्षेमकार:-प्रियकार:-मद्रकार:, [1]कडङ्कर:,[A] [2]मस्करी, [3]अकारी, [4]अपकारी-प्रियकारी-[B]अनपकारी-उपकारी, [5]राजकृत्वा,[C] राजकृत्वरी, [6]सहकृत्वा, सहकृत्वरी, [7]विश्वकर्मा, [8]अलङ्करिष्णु:[D] निराकरिष्णु:, [9]चक्रि:, [10]कारक:-[E]कारिका, कार:, चिकीर्षु:, चिकारयिषु:, चेक्रिय: ;
कर्तव्यम्, कारयितव्यम्, चिकीर्षितव्यम्, चेक्रीयितव्यम् ;
करणीयम्, कारणीयम्, चिकीर्षणीयम्, चेक्रीयणीयम् ;

---

1. ' **कडङ्करदक्षिणाच्छ च** ' (5-1-69) इति सूत्रे निपातनात् मुम् ।
2. माङि उपपदे करोतेस्ताच्छील्ये इनिर्निपात्यते । माङो ह्रस्वत्वं सुट् च । माकरणशीलो **मस्करी** । कर्मापवादित्वात् परिव्राजक उच्यते । स त्वेवमाह— ' मा कुरुत कर्माणि, शान्तिर्व: श्रेयसी ' इति ' **मस्करमस्करिणौ** वेणुपरिव्राजकयो: ' (6-1-154) इत्यत्र **काशिका** ।
3. ग्रह्यादि (3-1-134) गणे पाठात् अताच्छीलिको णिनि: नञ्युपपदे ।
4. ' सुप्यजातौ णिनिस्ताच्छील्ये ' (3-2-78) इति ताच्छीलिको णिनि: ; **एव-मुपकारी** इति पर्यन्तम् ।
5. ' राजनि युधिकृञ: ' (3-2-95) इति भूते क्वनिप् । राजानं कृतवान् **राजकृत्वा** । तुक् । ' प्रागसत्कल्पं, स्वशक्त्या नृपं कृतवान् इत्यर्थ: ' इति **प्रक्रियासर्वस्वे** ।
6. ' सहे च ' (3-2-96) इति क्वनिपि तुक् । **सहकृत्वा**=सहकारी । स्त्रियां ' वनो र च ' (4-1-7) इति ङीपि रेफादेशे च **सहकृत्वरी** इति रूपम् ।
7. ' अन्येभ्योऽपि दृश्यन्ते ' (3-2-75) इति मनिन्प्रत्यये, ' नेड् वशि कृति ' (7-2-8) इति इण्णिषेधे च रूपम् । विश्वं कर्म अस्मात्, अस्य वा इति **विश्वकर्मा**= देवशिल्पि: ।
8. ' **अलङ्कृञ्निराकृञ्**—' (3-2-136) इत्यादिना ताच्छीलिक इष्णुच् प्रत्यय: ।
9. ' भाषायां धाञ्कृ—' (वा. 3-2-171) इत्यनेन कि:, किन् वा प्रत्यय: । तस्य लिड्वद्भावातिदेशाद्द्विर्वचनम् । कर्तर्येष प्रत्यय: । **चक्रि:**= कर्ता ।
10. ' तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ' (3-3-10) इति भविष्यति कर्तरि ण्वुल् ।

A. ' **कटङ्करी**यरोधो हि कलमोत्सेध**कारणम्** ॥ ' **यादवाभ्युदये**-22-9.

B. ' पीडयन्ति जनं धारा: पतन्त्यो**ऽनपकारिणम्** ॥ ' भ. का. 7. 9.

C. ' बुद्धिपूर्वं ध्रुवन् न त्वा **राजकृत्वा** पिता खलम् । ' भ. का. 6. 130.

D. ' **निराकरिष्णवो** भानुं दिवं वर्तिष्णवोऽभित: ।
अलङ्करिष्णवो भान्तस्तडित्वन्तश्चरिष्णव: ॥ ' भ. का. 7. 3.

E. ' **कारका** मित्र**कार्याणि** सीतालाभाय सोऽब्रवीत् ॥ ' भ. का. 7. 29.

[1]कृत्यम्-[A]कार्यम्, कार्यम्, चिकीर्ष्यम्, चेक्रीय्यम् ;
ईषत्कर:-[B]दुष्कर:-सुकर:, [2]ईषदाढ्यङ्कर:[C]-दुराढ्यङ्कर:-स्वाढ्यङ्कर: ;
[3]क्रियमाण:-संस्क्रियमाण:, कार्यमाण:, चिकीर्ष्यमाण:, चेक्रीय्यमाण: ;
कार:-उपकार:-[D]अपकार:- [4]प्राकार:, [5]चक्रम्, [6]कृत्रिमम्-[E]असंस्कृत्रिमम्,
कार:, चिकीर्ष:, चेक्रीय: ;
कर्तुम्-[F]व्याकर्तुम्,

---

1. 'विभाषा कृवृषो:' (3-1-120) इति क्यप् वा भवति। पक्षे, 'ऋहलो:—' (3-1-124) इति ण्यत्। क्यपि तुक्।
2. 'कर्तृकर्मणोश्च **भूकृञो:**' (3-3-125) इति खल्। 'कर्तृकर्मणोश्च्व्यर्थयोरिति वक्तव्यम्' (वा. 3-3-127) इति वार्तिकात् च्व्यर्थे। '**ईषन्मालङ्करं** पुष्पं **सुपिण्डङ्कर** ओदन:। **दुस्सेनानिङ्करो** भीरु:, खित्वाद्ध्रस्वमुमागमौ॥' इति **प्रक्रियासर्वस्वे**।
3. यकि, 'रिङ् शयग्लिङ्क्षु' (7-4-28) इति रिङादेश:। 'रीङि प्रकृते रिङादेशविधानसामर्थ्यात् 'अकृत्सार्वधातुकयो:—' (7-4-25) इति दीर्घो न।' इति **सिद्धान्तकौमुदी**।
4. 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (6-3-122) इति उपसर्गस्य दीर्घ:। प्रक्रियते इति **प्राकार:**=साल:। कर्मणि घञ्।
5. 'घञर्थे कविधानम्—' (वा. 3-3-19) इति वार्तिकात् घञर्थे क: प्रत्यय:। 'द्वित्वप्रकरणे के **कृञादीना**मिति वक्तव्यम्' (वा. 6-1-12) इति द्वित्वम्। यण्।
6. '**ड्वित:** क्त्रि:' (3-3-88) इति भावे क्त्रि:। 'क्त्रेर्मम्नित्यम्' (4-4-20) इति सूत्रेण, 'निर्वृत्ते—' (4-4-19) इत्यस्मिन्नर्थे मप्प्रत्यय:। 'नित्यम्' इत्युक्ते: मप्प्रत्ययान्त एव प्रयोज्य:।

A. 'धर्म**कृत्य**रतां नित्यम् अकृष्यफलभोजनाम्।' भ. का. 6-62.
B. 'अरण्ययाने **सुकरे** पिता मां
प्रायुङ्क्त राज्ये बत **दुष्करे** त्वाम्।' भ. का. 3. 51.
C. '**ईषदाढ्यङ्करो**ऽप्येष न परत्राशु**भक्रिय:**।' भ. का. 7-84.
D. '**अपकारे कृते**ऽप्यज्ञो विजिगीषुर्न वा भवान्॥' भ. का. 5-9.
E. '**असंस्कृत्रिम**संख्यानौ अनुप्त्रिमफलाशिनौ।' भ. का. 4-37.
F. 'ग्रन्थानधीत्य **व्याकर्तु**मिति दुर्मेधसोऽप्यलम्॥' शिशुपालवधे 2-26.

—[A]कारयितुम्, चिकीर्षितुम्, चेक्रीयितुम् ;
कृति:, [1]क्रिया, कृत्या, [2]कारि:[B]-कारिका, कारणा, चिकीर्षा, चिकारयिषा,
चेक्रीया ;
करणम्, [3]आढ्यङ्करणम्-सुभगङ्करणम्-स्थूलङ्करणम्-पलितङ्करणम्-नग्नङ्करणम्-अन्धङ्करणम्-[C]अन्धङ्करणी, प्रियङ्करणम्, [4]उष्णङ्करणम्-भद्रङ्करणम्,
[5]स्वाढ्यङ्करणम्, कारणम्, चिकीर्षणम्, चेक्रीयणम् ;
कृत्वा, [6]तिरस्कृत्वा-तिर:कृत्वा, [7]उपाजेकृत्वा-अन्वाजेकृत्वा,
[8]साक्षात्कृत्वा, [9]उरसिकृत्वा, मनसिकृत्वा, [10]मध्येकृत्वा-पदेकृत्वा-निवचने-

---

1. '**कृञ:** श च' (3-3-100) इति स्त्रियां भावादौ शप्रत्यये, रिङादेशे च **क्रिया** इति सिद्ध्यति। सूत्रे चकारात् क्यपि तुकि, **कृत्या** इत्यपि भवति।
2. 'विभाषाऽऽख्यानपरिप्रश्नयोरिञ् च' (3-3-110) इति इञ् प्रत्यये **कारि:** इति भवति। चकारात ण्वुलि **कारिका** इति रूपमपि भवति।
3. 'आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ **कृञ:** करणे ख्युन्' (3-2-56) इति ख्युन् प्रत्यय:। खित्वान्मुम्। एवं **प्रियङ्करण**मिति पर्यन्तम्।
4. 'उष्णभद्रयो: **करणे**' (वा. 6-3-70) इति ल्युडन्ते पदे परत:, मुम्।
5. 'भयाढ्यादिषु तदन्तग्रहणम्' (**भाष्यम्** 1-1-72) इति वचनात् तदन्तविधि:।
6. 'विभाषा **कृञि**' (1-4-72) इति गतिसंज्ञाविकल्प:। यदा गतिसंज्ञा, तदानीं 'तिरसोऽन्यतरस्याम्' (8-3-42) इति विसर्जनीयस्य सत्वविकल्प:। यदा गतिसंज्ञा न, तदानीं विसर्जनीय:, समासोऽपि न। एवं ल्यप्यपि।
7. 'उपाजेऽन्वाजे' (1-4-73) इति गतिसंज्ञायां समासविकल्प:। यदा समास:, तदानीं ल्यबपि।
8. 'साक्षात्प्रभृतीनि च' (1-4-74) इति गतिसंज्ञा। 'साक्षात्प्रभृतिषु च्व्यर्थवचनम्' (वा. 1-4-74) इति वचनात् च्व्यर्थे एव गतिसंज्ञा। समासे तु ल्यप्।
9. 'अनत्याधान उरसिमनसी' (1-4-75) इति गतिसंज्ञायां समासविकल्प:। एवं ल्यप्यपि। **अत्याधानम्**=उपश्लेषणम्। तदभावोऽनत्याधानम्।
10. 'मध्ये पदे निवचने च' (1-4-76) इति गतिसंज्ञायां समासविकल्प:। अत्रापि चकारात् 'अनत्याधाने' इत्यनुवर्तते। **निवचनम्**=वचनाभाव:। **निवचनेकृत्वा**=वाचं नियम्येत्यर्थ:।

A. 'ऐहिष्ट तं **कारयितुं कृता**त्मा **क्रतुं** नृप: पुत्रफलं मुनीन्द्रम्।' भ. का. 1-11.
B. 'यां **कारिं** राजपुत्रोऽयमनुतिष्ठति तां **क्रियाम्**।' भ. का. 7-75.
C. 'पुराऽयमेति श्रुतसम्भवस्ते क्रुधं धियोऽन्ध**ङ्करणीं** दधान:॥' वा. वि. 3-30.

कृत्वा [1]नीचैःकृत्वा-उच्चैःकृत्वा, [2]तिर्यक्कृत्वा, [3]मुखतःकृत्वा, [4]नाना-कृत्वा-विनाकृत्वा-द्विधाकृत्वा-द्वैधंकृत्वा-द्वेधाकृत्वा, कारयित्वा, चिकीर्षित्वा, चेक्रीयित्वा ;

उपकृत्य, नीचैःकृत्य-उच्चैःकृत्य, तिर्यक्कृत्य, [A]गलतःकृत्य, नानाकृत्य-विनाकृत्य-द्विधाकृत्य-द्वैधंकृत्य-द्वेधाकृत्य, [5]कारिकाकृत्य, [6]ऊरीकृत्य-उररीकृत्य-शुक्लीकृत्य-वषट्कृत्य-पटपटाकृत्य, [7]खाट्कृत्य, [8]सत्कृत्य-असत्कृत्य, [9]अलङ्कृत्य, [10]पुरस्कृत्य, नमस्कृत्य [11]हस्तेकृत्य[B]-पाणौकृत्य,

1. 'अव्ययेऽयथाभिप्रेताख्याने **कृञः** क्त्वाणमुलौ' (3-4-59) इति क्त्वाणमुलौ। 'तृतीयाप्रभृतीन्यन्यतरस्याम्' (2-2-21) इति समासविकल्पः। ततश्च ल्यबपि। **अयथाभिप्रेताख्यानं** नाम=अप्रियस्योच्चैः, प्रियस्य च नीचैः कथनम्।
2. 'तिर्यच्यपवर्गे' (3-4-60) इति कृञः क्त्वाणमुलौ। **अपवर्गः**=समाप्तिः। ल्यबप्येवम्।
3. 'स्वाङ्गे तस्प्रत्यये **कृभ्वोः**' (3-4-61) इति **कृञः** क्त्वाणमुलौ, ल्यबपि। सूत्रे यथासंख्यं नेष्यते।
4. 'नाधार्थप्रत्यये च्व्यर्थे' (3-4-62) इति **कृञः** क्त्वाणमुलौ, ल्यबपि। धार्थत्वेन 'द्वित्र्योश्च-' (5-3-45) इति धमुञः, 'एधाच्च' (5-3-46) इति एधाचश्च ग्रहणम्।
5. 'कारिकाशब्दस्योपसंख्यानम्—' (वा. 1-4-60) इति गतिसंज्ञायां समासे ल्यप्।
6. 'ऊर्यादिच्विडाचश्च' (1-4-61) इति, **ऊरी उररी** इत्यादीनां गतिसंज्ञायां, 'कुगतिप्रादयः' (2-2-18) इति समासे, ल्यप्। तुक्। **ऊरी उररी** शब्दौ, अङ्गीकरणे, विस्तारे च वर्तेते। **शुक्लीकृत्ये**त्येतत् च्विप्रत्ययान्तस्य, **पटपटाकृत्ये**त्येतत् डाजन्तस्य चोदाहरणम्। 'डाचि बहुलं द्वे भवतः—' (वा. 8-1-12) इति डाजन्ते द्वित्वम्।
7. '**अनुकरणं** चानितिपरम्' (1-4-62) इति गतिसंज्ञायां समासे ल्यपि रूपम्।
8. 'आदरानादरयोः सदसती' (1-4-63) इति गतिसंज्ञायां समासे ल्यपि रूपम्। प्रीत्यतिशयः=**आदरः**। परिभवः, औदासीन्यं वा **अनादरः**।
9. अनेकार्थक**स्यालं**शब्दस्य '**भूषणेऽलम्**' (1-4-64) इति भूषणेऽर्थे गतिसंज्ञायां समासे ल्यप्।
10. 'पुरोऽव्ययम्' (1-4-67) इति गतिसंज्ञायां, 'नमस्पुरसोर्गत्योः' (8-3-40) इति विसर्जनीयस्य सत्वे च रूपम्।
11. 'नित्यं हस्ते पाणावुपयमने' (1-4-77) इति नित्यं गतिसंज्ञायां समासे ल्यप्। **उपयमनम्**=दारकर्म।

A. 'सा माला **करतःकारं** मुखतोभावमागता।
तां पत्यु**र्गलतःकृत्य** पार्श्वतोभूय च स्थिता॥' इति **प्रक्रियासर्वस्वे**।

B. 'श्रियमाशासते लोलां तां **हस्तेकृत्य** मा श्वसीः॥' भ. का. 5-16.

[1]प्राध्वंकृत्य, [2]जीविकाकृत्य-उपनिषत्कृत्य, तिरस्कृत्य-तिरःकृत्य, उपाजेकृत्य-अन्वाजेकृत्य, [A]साक्षात्कृत्य, उरसिकृत्य-मनसिकृत्य, मध्येकृत्य-पदेकृत्य-निवचनेकृत्य, [3]लवणङ्कृत्य, विकार्य, प्रचिकीर्ष्य, प्रचेक्रीय्य ;

[4B]भीतङ्कारं-[C]चोरङ्कारं (आक्रोशति), [5]स्वादुङ्कारं[D] (भुङ्क्ते), सम्पन्नङ्कारम्-लवणङ्कारम्, [6]अन्यथाकारं-एवङ्कारं-[E]कथङ्कारं-इत्थङ्कारं (भुङ्क्ते), [7]यथाकारं[F] (अहं भोक्ष्ये) तथाकारं (भोक्ष्ये, किं तवानेन ?), [8]अकृतकारं (करोति), नीचैःकारं-[G]उच्चैःकारं, तिर्यक्कारम्, करतः-

1. 'प्राध्वं बन्धने' (1-4-78) इति नित्यं गतिसंज्ञायां समासे ल्यप्। **प्राध्वंकृत्य**=बन्धनेनाकूलं कृत्वेत्यर्थः।
2. 'जीविकोपनिषदावौपम्ये' (1-4-79) इति नित्यगतिसंज्ञायां समासे ल्यप्।
3. साक्षात्प्रभृतिषु (1-4-74) लवणशब्दस्य गतिसंज्ञासन्नियोगेन मान्तत्वं निपात्यते, तेन **लवणंकृत्ये**ति भवति।
4. 'कर्मण्याक्रोशे **कृञः** खमुञ्' (3-4-25) इति खमुञ् खित्वात् पूर्वपदस्य मुम्।
5. 'स्वादुमि णमुल्' (3-4-26) इति णमुल्। '**स्वादुमि**' इति स्वादुपर्यायाणामपि ग्रहणम्; तेन **लवणङ्कारं, सम्पन्नङ्कारम्** इत्यपि सिध्यति। उपपदस्य मान्तत्वं निपातनात्।
6. 'अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्' (3-4-27) इति णमुल्। अन्यथा भुङ्क्ते इत्यर्थः।
7. 'यथातथयोरसूयाप्रतिवचने' (3-4-28) इति णमुल्।
8. 'समूलाकृतजीवेषु हन्कृञ्ग्रहः' (3-4-36) इति णमुल्। 'कषादिषु यथाविध्यनुप्रयोगः' (3–4–46) इत्यनुप्रयोगः।

A. '**साक्षात्कृत्या**भिमन्येऽहं त्वां हरन्तीं श्रियं श्रियः॥' भ. का. 5-71.

B. 'तं **भीतङ्कार**माक्रुश्य रावणः प्रत्यभाषत।' भ. का. 5-39.

C. 'भुजविटपमदेन व्यर्थमन्धम्भविष्णुः धिगपसरसि **चोरङ्कार**माक्रुश्यमानः।
त्वदुरसि विदधातु स्वामपस्कारकेलिं कुटिल**करज**कोटिक्रूर**कर्मा** जटायुः॥'
अनर्घराघवे 5.11.

D. '**स्वादुङ्कारं** कालखण्डोपदंशं क्रोष्टा डिम्भं व्यष्वणत् व्यस्वनच्च॥'
शिशुपालवधे-18-77.

E. 'अकृत्वा हेलया पादम् उच्चैर्मूर्धसु विद्विषाम्।
कथङ्कारमनालम्बा कीर्तिर्द्यामधिरोहति॥' **शिशुपालवधे** 2-52.

F. 'किं त्वमेवं ब्रवीषीति पृष्टेऽन्यो वक्त्यमर्षतः।
यथाकारमहं जाने **तथाकारं** वदाम्यहम्॥' इति **प्रक्रियासर्वस्वे**।

G. 'समूलकाषं चकषु रुदन्तो रामान्तिकं बृंहितमन्युवेगाः।
आवेदयन्तः क्षितिपाल**मुच्चैःकारं** मृतं रामवियोगशोकात्॥' भ. का. 3-49.

कारम्, मुखतःकारम्, नानाकारं-विनाकारं-द्विधाकारं-द्वैधंकारं-द्वेधाकारम्;
कारम् २, कृत्वा २, } कारम् २, कारयित्वा २, } चिकीर्षम् २, चिकीर्षित्वा २, } चेक्रीयम् २; चेक्रीयित्वा २; }
[1]कारुः, [2]क्रतुः, [3]करेणुः, [4]कर्म.

(247) "कुड घनत्वे" (VI-तुदादिः-1382.अक. सेट्. पर. कुटादिः।)

'घसने'—इत्येके। **घनत्वम्**=सान्द्रता।

कर्डकः-र्डिका, कर्डकः-र्डिका, [5]चिकुडिषकः-षिका, [6]चरीकुडकः-डिका;
कुडिता-त्री, कर्डयिता-त्री चिकुडिषिता-त्री, चरीकुडिता-त्री;
कुडन्-न्ती-ती, कर्डयन्-न्ती, चिकुडिषन्-न्ती; —
कुडिष्यन्-न्ती-ती, कर्डयिष्यन्-न्ती-नी, चिकुडिषिष्यन्-न्ती-ती; —
[7]व्यतिकुडमानः, कर्डयमानः, — चरीकुडयमानः;
व्यतिकुडिष्यमाणः, कर्डयिष्यमाणः, — चरीकुडिष्यमाणः;
कुट्-कुड्-कुडौ-कुडः; — — —
कुडितम्-तः, कर्डितः, चिकुडिषितः, चरीकुडितः-तवान्;
[8]कुडः,[A] कडः, चिकुडिषुः, चिकर्डयिषुः, चरीकुडः;
कुडितव्यम्, कर्डयितव्यम्, चिकुडिषितव्यम्, चरीकुडितव्यम्;
कुडनीयम्, कर्डनीयम्, चिकुडिषणीयम्, चरीकुडनीयम्,

1. करोतीति **कारुः**=शिल्पी। औणादिके [द. उ. 1-86] उण् प्रत्यये रूपम्।
2. क्रियतेऽसौ धर्मार्थिभिरिति **क्रतुः**=यज्ञः। औणादिकः [द. उ. 1-130] कतुः प्रत्ययः।
3. 'कृहृभ्यामेणुः' [द. उ. 1-133] इति एणुः प्रत्ययः। **करेणुः**=इभी। 'के=मस्तके रेणुर्यस्य **करेणुः**' इति व्युत्पत्त्याऽपि साधयन्ति।
4. 'मनिन्' [द. उ. 6-73] इति मनिनि रूपम्। क्रियते यत् फलार्थिभिस्तत् **कर्म**।
5. 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' (1-2-1) इति ञ्णिद्भिन्नस्य प्रत्ययस्य ङिद्भावातिदेशात् लघूपधगुणो न।
6. 'रीगृदुपधस्य च' (7-4-90) इत्यभ्यासस्य रीगागमः।
7. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानच्।
8. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कप्रत्ययः।

A. 'पोडयोऽयं चुडतेति केऽपि, जुडतेत्यन्ये कडन्तोऽलुठन्
देवे स्वैर्लुलिते कुडत्विषि कुडद्गात्रे पुडित्वाऽऽदरम्।' धा. का. 2-81.

[1]कुड्यम्, कड्यम्, चिकुडिष्यम्, चरीकुड्यम्;
ईषत्कुडः-दुष्कुडः-सुकुडः; — —
कुड्यमानः, कड्यमानः, चिकुडिष्यमाणः, चरीकुड्यमानः;
कर्डः, कर्डः, चिकुडिषः, चरीकुडः;
कुडितुम्, कर्डयितुम्, चिकुडिषितुम्, चरीकुडितुम्;
[2]कुड्ढिः, कर्डना, चिकुडिषा, चरीकुडा;
कुडनम्, कर्डनम्, चिकुडिषणम्, चरीकुडनम्;
कुडित्वा, कर्डयित्वा, चिकुडिषित्वा, चरीकुडित्वा;
विकुड्य, विकर्ड्य, विचिकुडिष्य, प्रचरीकुड्य;
कर्डम् २, कुडित्वा २, } कर्डम् २, कर्डयित्वा २, } चिकुडिषम् २, चिकुडिषित्वा २, } चरीकुडम् २; चरीकुडित्वा २. }

(248) "कृती छेदने" (VI-तुदादिः-1435. सक. सेट्. पर.) मुचादिः।

'कृणत्ति कृन्ततीत्येते वेष्टने च्छेदने क्रमात्।
कीर्तयेदिति संशब्दे—' (श्लो-95) इति देवः।

कर्तकः-र्तिका, कर्तकः-र्तिका, [3]चिकृत्सकः-[4]चिकर्तिषकः, [5]चरीकृतकः-तिका;
कर्तिता-त्री, कर्तयिता-त्री, चिकृत्सिता-त्री, चिकर्तिषिता-त्री, चरीकृतिता-त्री;
[6]कृन्तन्[A]-[7]न्ती-ती, कर्तयन्-न्ती, चिकृत्सन्-चिकर्तिषन्-न्ती; —
[8]कर्तिष्यन्[B]-कर्त्स्यन्-न्ती-ती, कर्तयिष्यन्-न्ती-ती, चिकृत्सिष्यन्-चिकर्तिषिष्यन्-न्ती-ती;

1. 'ऋदुपधाच्चाक्लृपिचृतेः' (3-1-110) इति क्यप्।
2. 'तितुत्र—' (7-2-9) इति इडभावे ढत्वे ष्टुत्वे च रूपम्।
3. 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वाद्गुणाभावः।
4. 'सेऽसिचि कृतचृतच्छृदतृदनृतः' (7-2-57) इति सनः इड्विकल्पः। इटि गुणः।
5. 'रीगृदुपधस्य च' (7-4-90) इत्यभ्यासस्य रीगागमः।
6. 'शे मुचादीनाम्' (7-1-59) इति नुम्।
7. 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम् वा।
8. 'सेऽसिचि—' (7-2-57) इति सादेरार्धधातुकस्य इड् वा।

A. 'भुक्त्वा गोरससिक्तमन्नमजितः कंसस्य **कृन्तन्** मुदं
तं खेटयन् पिशिताशदारुणमसौ मोदेन निन्ये निशाम्॥' धा. का. 2-84.
B. 'वनं चचार **कर्तिष्यन्** नरस्यन्निव निरङ्कुशः॥' भ. का. 9-42.

[1]व्यतिकृन्तमानः, कर्तयमानः, — चरीकृत्यमानः;

व्यतिकर्तिष्यमाणः-व्यतिकर्त्स्यमानः, कर्तयिष्यमाणः, [2]चरीकृतिष्यमाणः ;

काष्ठकृत्-कृतौ-कृतः ; — — —

[3]कृत्तम्[A]-त्तः, कर्तितः, चिकृत्सितः-चिकर्तिषितः, चरीकृततः-तवान् ;

[4]कृतः, [5]विकर्तनः, कर्तः, चिकृत्सुः-चिकर्तिषुः, चरीकृतः ;

कर्तितव्यम् , कर्तयितव्यम् , चिकृत्सितव्यम्-चिकर्तिषितव्यम् , चरीकृतितव्यम् ;

कर्तनीयम् , कर्तनीयम् , चिकृत्सनीयम्-चिकर्तिषणीयम् , चरीकृतनीयम् ;

[6]कृत्यम् , कर्त्यम् , चिकृत्स्यम्-चिकर्तिष्यम् , चरीकृत्यम् ;

ईषत्कर्तः-दुष्कर्तः-सुकर्तः ; — — —

कृत्यमानः, कर्त्यमानः, चिकृत्स्यमानः-चिकर्तिष्यमाणः, चरीकृत्यमानः ;

कर्तः, कर्तः, चिकृत्सः-चिकर्तिषः, चरीकृतः ;

कर्तितुम् , कर्तयितुम् , चिकृत्सितुम्-चिकर्तिषितुम् , चरीकृतितुम् ;

कृतिः, कर्तना-चिकृत्सा, चिकर्तिषा- चरीकृता ;

कर्तनम् , कर्तनम् , चिकृत्सनम्-चिकर्तिषणम् , चरीकृतनम् ;

[7]कर्तित्वा, कर्तयित्वा, चिकृत्सित्वा-चिकर्तिषित्वा, चरीकृतित्वा ;

विकृत्य, विकर्त्य, विचिकृत्स्य-विचिकर्तिष्य, प्रचरीकृत्य ; —

कर्तम् २, कर्तित्वा २, } कर्तम् २, कर्तयित्वा २, } चिकृत्सम् २, चिकृत्सित्वा २, चिकर्तिषम् २, चिकर्तिषित्वा २, } चरीकृतम् २; चरीकृतित्वा २. }

1. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानच् ।
2. यङः, अल्लोपस्य स्थानिवद्भावात् गुणो न ।
3. 'श्वीदितो निष्ठायाम्' (7-2-14) इति इण्णिषेधः ।
4. 'इगुपध—' (3-1-135) इति कर्तरि कः प्रत्ययः ।
5. नन्द्यादिपाठात् 'नन्दिग्रहि—' (3-1-134) इति कर्तरि ल्युः । विशेषेण कर्तयति भक्तानां रोगादिकमिति **विकर्तनः**=सूर्यः । 'आरोग्यं भास्करादिच्छेत्—' इति स्मरणात् ।
6. 'ऋदुपधाच्चाक्लृपि—' (3-1-110) इति क्यप् ।
7. 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् गुणः ।

A. '**निकृत्त**मत्तद्विपकुम्भमांसैः संपृक्तमुक्तैर्हरयोऽप्रपादैः ।' भ. का. 11-42.

(249) "कृती वेष्टने" (VII-रुधादिः-1447. सक. सेट्. पर.)

'कृणत्ति कृन्ततीत्येते वेष्टने च्छेदने क्रमात् ।
कीर्तयेदिति संशब्दे—' (श्लो. 95) इति देवः ।

कर्तकः-र्तिका, कर्तकः-र्तिका, चिकृत्सकः-चिकर्तिषकः-षिका, चरीकृतकः-तिका ; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककृतीधातुवत् (248) ज्ञेयानि । शतरि कृन्तन्-ती, 'रुधादिभ्यः श्नम्' (3-1-78) इति श्नमि, 'श्नसोरल्लोपः' (6-4-111) इत्यल्लोपः, इति विशेषः ।

(250) "कृप अवकल्कने" (X-चुरादिः-1749. सक. सेट्. उभ.)

अवकल्कनम्–मिश्रीकरणम् । [अ]

'कल्पते शपि सामर्थ्ये, कल्पयत्यवकल्कने ।
अदन्तस्य कृपेर्णौ तु दौर्बल्ये कृपयेदिति ॥ (श्लो. 135) इति देवः ।

[1]कल्पकः-ल्पिका, चिकल्पयिषकः-षिका ;
कल्पयिता-त्री, चिकल्पयिषिता-त्री ;
कल्पयन्-न्ती, चिकल्पयिषन्-न्ती ;
कल्पयिष्यन्-न्ती-ती, चिकल्पयिषिष्यन्-न्ती-ती ;
कल्पयमानः, चिकल्पयिषमाणः ;
कल्पयिष्यमाणः, चिकल्पयिषिष्यमाणः ;
[2]कल्-कल्पौ-कल्पः ; —
कल्पितम्-तः, चिकल्पयिषितः-तवान् ;
कल्पः, कल्पनः, चिकल्पयिषुः,
कल्पयितव्यम् , चिकल्पयिषितव्यम् ;

1. धातोरस्य णिजन्तत्वेनानेकाच्त्वात् यङ् न । '**कृपो** रो लः' (8-2-18) इति लत्वम् ।
2. पकारस्य 'संयोगान्तस्य लोपः' (8-2-23) इति लोपः । णिचः स्थानिवत्त्वं तु न, 'पूर्वत्रासिद्धे न स्थानिवत्' (वा. 1-1-58) इति निषेधात् ।

[अ] '**क्षीरस्वामी** तु '**कृपेस्तादर्थ्ये**' (ग. सू. चुरादौ) इति पठित्वा, '**तादर्थ्ये**' इति—प्रस्तुतस्य **भुवो**ऽर्थे मिश्रीकरणे ; अथवा, तच्छब्देन **क्लृपिः** परामृश्यते ; तस्य योऽर्थः=सामर्थ्यलक्षणः, तस्मिन्—इति द्वेधा व्याख्यत् ॥' इति **प्रौढमनोरमा** ।

कल्पनीयम्,	चिकल्पयिषणीयम्;
कल्प्यम्,	चिकल्पयिष्यम्;
कल्प्यमानः,	चिकल्पयिष्यमाणः;
ईषत्कल्पः-दुष्कल्पः-सुकल्पः;	—
कल्पः,	चिकल्पयिषः;
कल्पयितुम्,	चिकल्पयिषितुम्;
कल्पना,	चिकल्पयिषा;
कल्पनम्,	चिकल्पयिषणम्;
कल्पयित्वा,	चिकल्पयिषित्वा;
प्रकल्प्य,	प्रचिकल्पयिष्य;
कल्पम् २, } कल्पयित्वा २, }	चिकल्पयिषम् २; } चिकल्पयिषित्वा २. }

शुद्धिपत्रिका

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
1	7	मखिल। गम-	मखिलागम
,,	16	कृतन्त-	कृदन्त
3	24	असाग्य	असग्य
4	22	अङ्क्यमानः,	अङ्क्यमानः
5	8	अङ्कमङ्कम् २-	अङ्कमङ्कम्
6	26	कर्मण्यण्-	कर्मण्यण्
7	7	अरङ्कि	अरङ्खि
,,	8	सदा	तदा
8	13	वेवीयक ;	वेवीयकः ;
,,	22	वेबीय ;	वेवीयः ;
,,	24	(4-131)	(द. उ. 1-59)
,,	27	पशुम्रात	पशुम्रात
9	7	[1]समजः, [1A]समाजः [B],	[1]समजः[B], [1A]समाजः,
10	Title	अजि	अट
11	19	ऽरण्यानि	ऽरण्यानीं
,,	23	1-39-5	1-39.
,,	24	(वा. 1-1-64)	(वा. 6-1-94)
,,	27	यकिटयशब्दस्य	यकि टयशब्दस्य
12	7	-ती-ती ;	न्ती-ती ;
,,	28	संघोष्टि-	संगोष्टि-
,,	29	स्फुटद्रुमे	स्फुटद्द्रुमे
13	5	अट्टयित्वा	अट्टयित्वा 2
14	14	ड्डिका,	ड्डिका,
,,	17	न्ती-न्ती,	न्ती-ती,
,,	19	अद्[A]-	अद्[C]-
,,	23	खलैः	कलैः
,,	24	A	C
15	15	प्राणते	प्राणने
16	15	,,	,,
17	15	ऽतति चिन्तयेत्।	ऽतति—।
,,	24	उपधादी र्घः।	उपधादीर्घः।
18	17	ऽतति, चिन्तयेत्।	ऽतति—।

पृष्टम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
18	23	प्रस्थितं	प्रथितं
,,	28	दशपाद्गुणादिषुतौ 1-44	दशपाद्गुणादिषु (1. 44)
20	18	'वाऽसरूपो—'	'वाऽसरूपः—'
,,	22	(2-4-54)	(वा-2.4.54)
21	Title	अदि	अन
,,	18	हे⁵प्राण् ;	[द्वे] ⁵प्राण् ,
,,	21	ऋषिः।	ऋषिः।
24	22	उभ-से.)	सक. सेट्. उभ.)
25	Title	अञ्जू	अञ्जू
,,	28	....(6-4-111)	...(6-4-111) इत्यकारलोपः।
27	15	अन्धिदधिषित्वा	अन्दिधयिषित्वा
28	Title	अभि	अभ्र
,,	27	बभ्रद्रधू	वभ्रद्रधू
29	23	...(6-4-32)	(6-4-92)
,,	27	झमञ्झेमन	झमझेमन
34	25	लाञ्छिताङ्गे	लञ्छिताङ्गे
,,	27	अथार्घ्यं	अथार्घ्यं
35	5	से. उ.	सक. सेट्. उभ.
,,	8	इत्यादिकानां	इत्यादिकानां रूपाणां
37	1	उपयाच्ञ्नायाम्	उपयाञ्ञायाम्
,,	30	....वधा...	....वध....
,'	31	जिह्विया	जिह्वयां
38	2	ऽर्देर्घो—	ऽर्देद् यौ
,,	25	'नन्दिग्रहिपचादिभ्यो–' (3-1-134) इति नन्यादित्वात्	नन्यादित्वात् (3-1-134)
,,	27	स्वनैः	स्वरैः
40	28	मच्छंद	मच्छदन्
41	11	अर्वक A:-	Aअर्वकः—
,,	15	पूजाजाम्	पूजायाम्
42	2	Aअर्हूणीयम् ,	Aअर्हूणीयम् ,
44	22	ङीष्।	ङीष्।
45	26	ङीषि	ङीषि
,,	27	ऊद	ऊढ्
46	15	इति श्रा-	इति श्रा
,,	17	(6-4-111)	(6-4-112)
,,	27	(3-54)	9-54

पृष्टम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
46	28	'उपेयिवान्–'	'उपेयिवानश्वान्'
47	16	⁷आशितम्	आशितम्-
,,	20	3. इति श्नुविक-	(3-1-73) इति श्नुः विक-
,,	30	प्रायुः	प्रायुः
49	3	184	185
50	2	गत्यादौ '.......184	गत्यादौ,........185
,,	20	शानच्'।	शानच्।
,,	24	क्विति'	क्ङिति'
,,	25	आर्धधातुक......	आर्धधातुक........
51	7	अनुभावयिष्य,	अनुबिभावयिष्य,
,,	13	184	185
,,	19	निरस्यमानः, निरस्यन् ,	निरस्यमानः,
,,	24	बट्टयत्नेषु	बट्टयत्नेषु
53	26	बष्कयतीह	बष्कयतीह
56	2	Aदुरंहः, इति रूपाणि।	इति रूपाणि। Aदुरंहः।
57	16	आञ्छिच्छिषित्वा	आञ्चिच्छिषित्वा
59	Title	आप्लृ	आस
61	27	'सार्वधातुक........	'सार्वधातुक........
62	2	ईषिष्ययाणः	ईषिष्यमाणः
,,	23	(वा. 2-4-45)	(वा. 2-4-46)
,,	30	,,	,,
63	26	,,	,,
66	17	(6-4-16) दीर्घः।	(6-4-16) इति दीर्घः।
67	20	इयजनं	इयजमं
70	22	'सम्पदादित्वात्—'	सम्पदादित्वात् ,
,,	25	'कृत्यच'	'कृत्यचः'
,,	33	मार्च्चीत्	मार्चीत्
71	29	चितगजेन्द्र......	चित्तगजेन्द्र........
72	7	1548	1448
,,	22	का न	कालेन
,,	28	'कर्मण्यण्'	'कर्मण्यण्'
73	11	धातुकाव्ये	धातुकाव्ये (2-78)
75	25	'कुन् शिल्पिसंज्ञयोः'	'कुन् शिल्पिसंज्ञयोः' [द. उ. 3·5]
78	31	'इयजनं......	'इयजनं........
83	27	घुगर्दित	घुगुर्दित

पुटम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
85	10	‘ईरयतीरति ।	‘—ईरयतीरति ।
,,	18	ईररियिष्यमाणः ;	ईरिरयिष्यमाणः ;
87	20	ईर्प्यृषिषणम् ;	ईर्ष्यिषिषणम् ;
,,	22	समीयिष्य,	समीर्ष्स्यिष्य,
88	20	चानशू	चानश्
,,	25	सुस्वाय	सुखाय
89	20	भाष्ये ।	भाष्ये (3-3-43) ।
90	26	विश्वन्	विश्वं
91	30	...मुङ्कितं	......मुङ्खितं
93	17	ओकः, ओचिचिषुः,	ओचः, ओचिचिषुः,
,,	23	ओकः, ओचिचिषः ;	ओचः, ओचिचिषः ;
95	11	1254	1294
,,	19	(श्लो. 56)	(श्लो. 55-56)
96	21	(श्लो-55)	,,
,,	22	(6-3-19)	(6-4-19)
97	1	धातुकाव्ये ।	धातुकाव्ये (1-73) ।
100	21	उम्भितः-तम्-तवान्,	उभितः-तम्-तवान् ;
,,	26	(द. उ. 1-197)	(द. उ. 1-97)
102	10	ओनिभयिषा ;	ओबिभयिषा ;
103	11	उब्जः, समुद्रः, [1]न्युब्जा, (रोगः)	[1]न्युब्जः (रोगः), समुद्रः, उब्जः,
105	30	पूर्वित........	पूर्वित.......
109	5	ऊः-ऊनौ-	ऊ-ऊनौ-
113	26	स्नुतास्त्राः	स्नुतास्नाः ।
,,	28	तं प्रोर्णनूषु....	तं प्रोर्णुनूषु.......
114	22	सक्थिः ।	सक्थि ।
,,	26	...मजूषकत्वं	........मजूषकस्त्वं
115	26	....ध्रस्व	........ध्रस्व
116	17	(7-1-86)	(7-3-86)
,,	27	(7-2-20)	(7-2-70)
117	23	(वा. 4-1-40)	(वा. 4-1-49)
118	12	‘तत्रेयत्यृच्छ....	‘तत्रेयत्यृच्छ........
,,	23	अर्थकः	अर्भकः =
119	10	“ऋच....	“ऋच........
121	20	धातुकाव्ये ।	धातुकाव्ये (1-24) ।

पुटम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
124	1	“ऋणु........	“ऋणु......
,,	21	....कुऊभ्य ङः’	........कुम्भ्य उः’
,,	30	...र्घृणिमान्	.......र्घृणिमान्
126	20	दुऋतीयः-	दुर्ऋतीयः-
128	23	(7-3-56)	(7-2-56)
,,	28	....क्षीयमानां	....क्षीयमाणां
129	14	दुऋम्फः,	दुर्ऋम्फः,
131	3	तुदादिः. सक.	तुदादिः-1287. सक.
132	16	किद्वद्भवान्न	किद्वद्भावान्न
,,	30	किति’	क्किति’
133	27	‘ऋल्वादिभ्यः	‘ऋल्वादिभ्यः
140	27	वनप्रदेशात्	वनप्रदेशान्
142	19	कखयिष्यमाणः,	कखयिष्यमाणः, कखितः-तवान्,
146	12	शोके यो	शोके यौ
147	11	,,	,,
148	16	शोके स्यात्	शोके यौ
151	31	बनात......	वनात्
155	30	धा. का. 5. 93.	धा. का. 3. 59.
158	28	(धातुकाव्यव्याख्याने)	(धातुकाव्यव्याख्याने 2-5.)
159	28	स्तनात्	स्तनान्
160	23	....प्रत्ययेऽपि ।	........प्रत्ययेऽपि दीर्घः ।
163	23	(7-3-4)	(7-3-34)
164	32	‘प्रघिण्य...परिघुण्य...प्रघृण्य	‘प्रघिण्ण्य...परिघुण्ण्य...प्रघृण्ण्य
167	27	ज्ञेयानि ।	ज्ञेयानि । ‘कत्र’ इत्यस्य पाठभेदोऽयं धातुः ।
171	6	कलने	कलते
,,	27	....मवेलयद्	....मबेलयद्
,,	28	शूर्पनखा....	शूर्पणखा....
172	5	अदम्तः ।	अदम्तः ।)
173	18	प्रतिष्कशः, [6]काशः,	[6]प्रतिष्कशः, काशः,
,,	30	नतचित....	नतचित्त...
175	16	कस्ते	कंस्ते
181	30	स्ववैरि.......	स्वबैरि........
182	15	भ्वादिः-62.	भ्वादिः-623.
186	11	चिकिरिसिषुः,	चिकिरिसुः,

पृष्टम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
187	27	प्रचक्रमे	प्रचक्रमे
196	25	' सार्ववातुक...	' सार्वधातुक........
197	28	निष्ठायामनिद	निष्ठायामनिट्
204	16	सेट्ट्	सेट्
206	28	ऋष्यण्	ऋष्यण्
207	8	चुचुत्सयिषम्	चुकुत्समिषम्
,,	13	38	98
212	29	ऽकरो	करो
217	28	इत्युभयपि	इत्युभयमपि
221	3	चुकुशिषणम्	चुकुंशिषणम्
223	31	विसित	बिसित
228	27	किति	क्किति
229	29	प्रभ्रज्य	प्रधृज्य
230	29	इनण्णनपत्ये	इनण्यनपत्ये
232	2	चुकूलिषन्न्-ती;	चुकूलिषन्-न्ती;
234	Title	ड्ड कृञ्	ड्डु कृञ्
,,	21	ऋत	ऋृत
236	31	....मृतनुत्तमम्	मृतमनुत्तमम्
240	28	संख्यानौ	संव्यानौ

शुद्धाशुद्धपरिशिष्टम्

पु. २३४: अधः पादटिप्पण्यां २. इत्यङ्कितायां 'रिङ्शय—' इत्यादेः स्थाने
'रीङ्ृतः (7-4-27) इति अङ्गस्य रीङादेशः'
इति पठनीयम्।

पु. २१०-२१२:

(२२१) "कुन्च" कौटिल्याल्पीभावयोः"

(२२३) "कुन्थ" संश्लेषणे"

अनयोर्द्वयोरपि धात्वोः कृदन्तरूपेषु अन्त्यकोष्ठदत्तेषु रूपेषु सर्वत्र नुमं वर्जयित्वा
'चोकुचिकः' 'चोकुथकः' इत्येवं पठनीयम्।